5

Paiṅga(?)

Leaf - A02
Size - 10 X 14

जेवकोरै काजदेउअ
ीबभाइजीउपरम
छिउसु टणवगामिदे
अंगले लिषणउसका
नामध्यलिषणउग्रष
जंघोने

उ वासकी

क कृ पा कु

८	१	६	३	५
१	७	१५	२	८
३०	७	२	३	७
६	८	६	८	२
७	७	२	८	६

SKM 118/90



ॐनमोभगवतेवासुदेवाय॥ ॐअस्यश्रीभगवद्गीता
मालामंत्रस्य॥ श्रीभगवान्वेदव्यासऋषिः॥ अनुष्टुप्
छंदः॥ श्रीकृष्णःपरमात्मादेवता॥ अशोच्यान
न्वशोचस्त्वंप्रज्ञावादांश्चभाषसेतिबीजं॥ सर्वध
र्मान्परित्यज्यमामेकंशरणंव्रजेतिशक्तिः॥ अहं
त्वासर्वपापेभ्योमोक्षयिष्यामिमाशुच॥ इति
कीलकं॥ नैनंछिंदंतिशस्त्राणिनैनंदहतिपा

ज्य ३

वक॥ इत्यंगुष्ठाभ्यांनमः॥ नचैनंक्लेदयंत्यापोनशो
षयतिमारुत॥ इतितर्जनीभ्यांनमः॥ अछेद्योयम
दाह्योयमक्लेद्योशोष्यएवचेतिमध्यमाभ्यांनमः
नित्यःसर्वगतःस्थाणुरचलोयंसनातन॥ इत्य
नामिकाभ्यांनमः॥ पश्यमेपार्थरूपाणिशत
शोथसहस्रशः॥ इतिकनिष्ठिकाभ्यांनमः॥ ना
नाविधानिदिव्यानिनानावर्णाकृतीनिचेतिक

रतलकरपृष्ठाभ्यांनमः ।। नैनंछिंदंतिशस्त्राणी
तिहृदयायनमः ।। नचैनंक्लेदयंत्यापइतिशिरसे
स्वाहा ।। अच्छेद्योयमदाह्योयमितिशिखायैवष
ट् ।। नित्यःसर्वगतःस्थाणुरितिकवचायहुं ।। प
श्यमेपार्थरूपाणीतिनेत्रत्रयायवौषट् ।। नाना
विधानिदिव्यानीत्यस्त्रायफट् ।। श्रीकृष्णप्रीत्यर्थे
जपेविनियोगः ।। अथध्यानम् ।। ॐपार्थाय

प्रतिबोधितांभगवतानारायणेनस्वयं॥ व्यासे
नग्रथितांपुराणमुनिनामध्येमहाभारते॥ अ
द्वैतामृतवर्षिणींभगवतीमष्टादशाध्यायि
नी॥ अंबत्वामनुसंदधामिभगवद्गीतेभवद्वे
षिणीं॥ २॥ नमोस्तुतेव्यासविशालबुद्धेफुल्ला
रविंदायतपत्रनेत्र॥ येनत्वयाभारततैलपू
र्णः प्रज्वालितोज्ञानमयः प्रदीपः॥ ३॥ प्रपन्न

पारिजातायतोत्रवेत्रैकपाणये॥ ज्ञानमुद्रायकृ
ष्णायगीतामृतदुहेनमः॥३॥ सर्वोपनिषदोगा-
वोदोग्धागोपालनंदनः॥ पार्थोवत्सःसुधीर्भो
क्तादुग्धंगीतामृतंमहत्॥४॥ वसुदेवसुतंदेवंकं
सचाणूरमर्दनं॥ देवकीपरमानंदंकृष्णंवंदेज
गद्गुरुं॥५॥ भीष्मद्रोणतटाजयद्रथजलागां-
धारनीलोत्पलाशल्यग्राहवतीकृपेणवहिनी

कर्णेनवेलाकुला॥ अश्वत्थामविकर्णघोरमक
रादुर्योधनावर्तिनी॥ सोत्तीर्णाखलुपांडवैःर
णनदीकैवर्तकःकेशवः॥६॥ पाराशर्यवचःस
रोजममलंगीतार्थगंधोत्कटं॥ नानाख्यानककेस
रंहरिकथासंबोधनाबोधितं॥ लोकेसज्जन
षट्पदैरहरहःपेपीयमानंमुदा॥ भूयाद्भार
तपंकजंकलिमलप्रध्वंसिनःश्रेयसे॥७॥ मू

कंकरोतिवाचालंपंगुंलंघयतेगिरिं ॥ यत्कृपातम
हंवंदेपरमानंदमाधवं ॥ ८ ॥ यंब्रह्मावरुणेंद्ररुद्रम
रुतः स्तुन्वंतिदिव्यैः स्तवै ॥ वेदैःसांगपदक्रमोप
निषदैर्गायंतियंसामगाः ॥ ध्यानावस्थिततद्गतेन
मनसापश्यंतियंयोगिनो ॥ यस्यांतंनविदुःसुरा
सुरगणादेवायतस्मैनमः ॥ ९ ॥ इति ध्यानं ॥ धृ
त रा ष्ट्र उ वा च ॥ ॐ धर्मक्षेत्रेकुरुक्षेत्रेसमवेतायु

युत्सवः ॥ मामकाः पांडवाश्चैव किमकुर्वत संजय
१ ॥ संजय उवाच ॥ दृष्ट्वा तु पांडवानीकं व्यूढं दुर्योध
नस्तदा ॥ आचार्यमुपसंगम्य राजा वचनमब्र
वीत ॥ २ ॥ पश्यैतां पांडुपुत्राणामाचार्य महतीं च
मूं ॥ व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥ अ
त्र शूरा महेष्वासा भीमार्जुनसमा युधि ॥ युयुधा
नो विराटश्च द्रुपदश्च महारथः ॥ ४ ॥ धृष्टकेतुश्चे

कितानः काशिराजश्च वीर्यवान् ॥ पुरुजित्कुंति
भोजश्च शैब्यश्च नरपुंगवः ॥५॥ युधामन्युश्च
विक्रांत उत्तमौजाश्च वीर्यवान् ॥ सौभद्रो द्रौप
देयाश्च सर्व एव महारथाः ॥६॥ अस्माकं तु वि
शिष्टा ये तान्निबोध द्विजोत्तम ॥ नायका मम
सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥७॥ भवान्भी
ष्मश्च कर्णश्च कृपश्च समितिंजयः ॥ अश्वत्थामा

श्री

श्री
गी
६

विकर्णश्चसौमदत्तिस्तथैवच॥८॥अन्येचबहु-
वःशूरामदर्थेत्यक्तजीविताः॥नानाशस्त्रप्र-
हरणाःसर्वेयुद्धविशारदाः॥९॥अपर्या-
प्तंतदस्माकंबलंभीष्माभिरक्षितं॥पर्याप्तं-
त्विदमेतेषांबलंभीमाभिरक्षितं॥१०॥अ-
यनेषुचसर्वेषुयथाभागमवस्थिताः॥भी-
ष्ममेवाभिरक्षंतुभवंतःसर्वएवहि॥११॥त

स्य संजनयन्हर्षं कुरुवृद्धः पितामहः॥ सिंह
नादं विनद्योच्चैः शंखं दध्मौ प्रतापवान्॥ १२
ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः
सहसैवाभ्यहन्यंत स शब्दस्तुमुलोऽभवत्॥
१३॥ ततः श्वेतैर्हयैर्युक्ते महति स्यंदने स्थितौ
माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः॥
१४॥ पांचजन्यं हृषीकेशो देवदत्तं धनंजयः॥ पौं

श्री॰
गी॰
७

ड्रंदध्मौमहाशंखंभीमकर्मावृकोदरः॥१५॥अ
नंतविजयंराजाकुंतीपुत्रोयुधिष्ठिरः॥नकुलः
सहदेवश्चसुघोषमणिपुष्पकौ॥१६॥का
श्यश्चपरमेष्वासःशिखंडीचमहारथः॥धृ
ष्टद्युम्नोविराटश्चसात्यकिश्चापराजितः॥१७॥
द्रुपदोद्रौपदेयाश्चसर्वशःपृथिवीपते॥सौ
भद्रश्चमहाबाहुःशंखान्दध्मुःपृथक्पृथ

कुः॥१८॥ स घोषो धार्तराष्ट्राणां हृदयानि व्यदार
यत्॥ नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन्॥
१९॥ अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपि
ध्वजः॥ प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः॥२०
हृषीकेशं तदा वाक्यमिदमाह महीपते॥ सेन
योरुभयोर्मध्ये रथं स्थापय मेऽच्युत॥२१॥ यावदे
तान्निरीक्षेऽहं योद्धुकामानवस्थितान्॥ कैर्मयास

हयोद्धव्यमस्मिनरणसमुद्यमे ॥२२॥ योत्स्यमा
नानवेक्षेहंयएतेत्रसमागताः ॥ धार्तराष्ट्रस्य द
र्बुद्धेर्युद्धेप्रियचिकीर्षव ॥२३॥ संजय उवाच ॥
एवमुक्तोहृषीकेशोगुडाकेशेनभारत ॥ सेन
योरुभयोर्मध्येस्थापयित्वारथोत्तमं ॥२४॥ भी
ष्मद्रोणप्रमुखतः सर्वेषांचमहीक्षितां ॥ उवा
चपार्थपश्यैतान्समवेतान्कुरूनिति ॥२५॥ न

त्रापश्यत्स्थितान्पार्थः पितॄनथपितामहान्
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्त
थथा ॥२६॥ श्वशुरान्सुहृदश्चैव सेनयोरुभयो
रपि ॥ तान्समीक्ष्य स कौंतेयः सर्वान्बंधूनव
स्थितान् ॥२७॥ कृपया परयाविष्टो विषीदन्नि
दमब्रवीत् ॥ अर्जुन उवाच ॥ दृष्ट्वेमं स्वजनं कृष्ण
युयुत्सुं समुपस्थितं ॥२८॥ सीदंति मम गात्रा

श्री॰
गी॰
८

णि मुखंचपरिशुष्यति॥ वेपथुश्चशरीरेमेरो
महर्षश्चजायते॥२९॥ गांडीवंस्रंसतेहस्तात्त्व
क्चैवपरिदह्यते॥ नचशक्नोम्यवस्थातुंभ्रम
तीवचमेमनः॥३०॥ निमित्तानिचपश्यामि
विपरीतानिकेशव॥ नचश्रेयोनुपश्यामि
हत्वास्वजनमाहवे॥३१॥ नकांक्षेविजयंकृ
ष्णनचराज्यंसुखानिच॥ किंनोराज्येनगो २

विंदकिंभोगैर्जीवितेनवा ॥ ३२ ॥ येषामर्थेकां
क्षितंनोराज्यंभोगाःसुखानिच ॥ तइमेवस्थि
तायुद्धेप्राणांस्त्यक्त्वाधनानिच ॥ ३३ ॥ आचा
र्याःपितरःपुत्रास्तथैवचपितामहाः ॥ मातुलाः
श्वशुराःपौत्राःस्यालाःसंबंधिनस्तथा ॥ ३४ ॥
एतान्नहंतुमिच्छामिघ्नतोपिमधुसूदन ॥ अ
पित्रैलोक्यराज्यस्यहेतोःकिंनुमहीकृते ॥ ३५ ॥

श्री·
गी·
१०

निहत्यधार्त्तराष्ट्रान्नःकाप्रीतिःस्याज्जनार्दन॥
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः
॥३६॥ तस्मान्नार्हावयंहंतुंधार्त्तराष्ट्रान्स्वबां
धवान्॥ स्वजनंहिकथंहत्वासुखिनःस्याममा
धव॥३७॥ यद्यप्येतेनपश्यंतिलोभोपहतचे
तसः॥ कुलक्षयकृतंदोषंमित्रद्रोहेचपात
कं॥३८॥ कथंनज्ञेयमस्माभिःपापादस्मान्नि

वर्जितं ॥ कुलक्षयकृतंदोषंप्रपश्यद्भिर्जनार्द-
न ॥ ३९ ॥ कुलक्षयेप्रणश्यंतिकुलधर्माःसनात-
नाः ॥ धर्मेनष्टेकुलंकृत्स्नमधर्मोभिभवत्यु-
त ॥ ४० ॥ अधर्माभिभवात्कृष्णप्रदुष्यंतिकुल-
स्त्रियः ॥ स्त्रीषुदुष्टासुवार्ष्णेयजायतेवर्णसं-
करः ॥ ४१ ॥ संकरोनरकायैवकुलघ्नानांकु-
लस्यच ॥ पतंतिपितरोह्येषांलुप्तपिंडोदक-

श्री॰
गी॰
२२

क्रियाः॥४२॥दोषैरेतैःकुलघ्नानांवर्णसंकरका
रकैः॥उत्साद्यंतेजातिधर्माःकुलधर्माश्चशाश्व
ताः॥४३॥उत्सन्नकुलधर्माणांमनुष्याणांजना
र्दन॥नरकेनियतंवासोभवतीत्यनुशुश्रुम
४४॥अहोवतमहत्पापंकर्तुंव्यवसितावयं
यद्राज्यसुखलोभेनहंतुंस्वजनमुद्यताः॥४५
यदिमामप्रतीकारमशस्त्रंशस्त्रपाणयः॥

धार्त्तराष्ट्रारणेहन्युस्तन्मेक्षेमतरंभवेत् ॥४६॥
संजयउवाच ॥ एवमुक्त्वार्जुनःसंख्येरथोपस्थ
उपाविशत् ॥ विसृज्यसशरंचापंशोकसं
विग्नमानसः ॥४७॥ इतिश्रीभगवद्गीतासूपनि
षत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवा
दे अर्जुनविषादोनामप्रथमोध्यायः ॥१॥ सं
जयउवाच ॥ तंतथाकृपयाविष्टमश्रुपूर्णा

श्री. गी. १२

ऊलेक्षणं ।। विषीदंतमिदं वाक्यमुवाच मधुसूदनः
१ ।। श्रीभगवानुवाच ।। कुतस्त्वा कश्मलमिदं विष
मे समुपस्थितं ।। अनार्यजुष्टमस्वर्ग्यमकीर्ति
करमर्जुन ।। २ ।। क्लैब्यं मास्मगमः पार्थ नैतत्त्व
य्युपपद्यते ।। क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परं
तप ।। ३ ।। अर्जुन उवाच ।। कथं भीष्ममहं संख्ये
द्रोणं च मधुसूदन ।। इषुभिः प्रतियोत्स्यामि पू

जार्हावरिसूदन ॥ ४ ॥ गुरूनहत्वाहिमहानुभा
वान्श्रेयोभोक्तुंभैक्ष्यमपीहलोके ॥ हत्वार्थका
मांस्तुगुरूनिहैवभुंजीयभोगान्रुधिरप्रदिग्धा
न् ॥ ५ ॥ नचैतद्विद्मः कतरन्नोगरीयो ॥ यद्वाज
येमयदिवानोजयेयुः ॥ यानेवहत्वानजिजी
विषामस्तेवस्थिताः प्रमुखेधार्तराष्ट्राः ॥ ६ ॥ का
र्पण्यदोषोपहतस्वभावः पृच्छामित्वांधर्मसं

मूढचेताः॥ यच्छ्रेयःस्यान्निश्चितंब्रूहितन्मे॥ शि
ष्यस्तेहंशाधिमांत्वांप्रपन्नं॥७॥ नहिप्रपश्यामि
ममापनुद्या॥ यच्छोकमुच्छोषणमिंद्रियाणां
अवाप्यभूमावसपत्नमृद्धं॥ राज्यंसुराणामपि
चाधिपत्यं॥८॥ संजय उवाच॥ एवमुक्त्वाहृषीके
शंगुडाकेशःपरंतप॥ नयोत्स्यइतिगोविंदमु
क्त्वातूष्णींबभूवह॥९॥ तमुवाचहृषीकेशःप्र

हसन्निवभारत ॥ सेनयोरुभयोर्मध्येविषीदंतमि
दंवचः ॥१०॥ श्रीभग॰ वा॰ उ॰ वा॰ ॥ अशोच्या
नन्वशोचस्त्वंप्रज्ञावादांश्चभाषसे ॥ गतासूनग॰
तासूंश्चनानुशोचंतिपंडिताः ॥११॥ नत्वेवाहं
जातुनासंनत्वंनेमेजनाधिपाः ॥ नचैवनभवि
ष्यामःसर्वेवयमतःपरं ॥१२॥ देहिनोस्मिन्य॰
थादेहेकौमारंयौवनंजरा ॥ तथादेहांतरप्रा

श्री.
गी.
२५

प्तिर्द्धीरस्तत्रनमुह्यति ॥२३॥ मात्रास्पर्शास्तुकौं-
तेयशीतोष्णसुखदुःखदाः ॥ आगमापायि-
नोनित्यास्तांस्तितिक्षस्वभारत ॥२४॥ यंहि-
व्यथयंत्येतेपुरुषंपुरुषर्षभ ॥ समदुःखसु-
खंधीरंसोमृतत्वायकल्पते ॥२५॥ नासतोसं-
तोंविद्यतेभावोनाभावोविद्यतेसतः ॥ उभयोर-
पिदृष्टोंतस्त्वनयोस्तत्त्वदर्शिभिः ॥२६॥ अवि-

न ५

नाशितुतद्विद्धियेनसर्वमिदंततं॥ विनाशम
व्ययस्यास्यनकश्चित्कर्तुमर्हसि॥१७॥ अंतवं
तइमेदेहानित्यस्योक्ताःशरीरिणः॥ अनाशि
नोप्रमेयस्यतस्माद्युध्यस्वभारत॥१८॥ यएनं
वेत्तिहंतारंयश्चैनंमन्यतेहतं॥ उभौतौनविजा
नीतौनायंहंतिनहन्यते॥१९॥ नजायतेम्रि
यतेवाकदाचिन्नायंभूत्वाभवितावानभूयः॥

श्री॰
गी॰
१५

अजोनित्यःशाश्वतोयंपुराणोनहन्यतेहन्य
मानेशरीरे॥२०॥वेदाविनाशिनंनित्यंयएन
मजमव्ययं॥कथंसपुरुषःपार्थकंघातयति
हंतिकं॥२१॥वासांसिजीर्णानियथाविहाय
नवानिगृह्णातिनरोपराणि॥तथाशरीराणि
विहायजीर्णा॥न्यन्यानिसंयातिनवानिदेही
२२॥नैनंछिंदंतिशस्त्राणिनैनंदहतिपावकः

नचैनंक्लेदयंत्यापोनशोषयतिमारुतः॥ अछे
द्योयमदाह्योयमक्लेद्योशोष्यएवच॥ नित्यः
सर्वगतःस्थाणुरचलोयंसनातनः॥२४॥ अ
व्यक्तोयमचिंत्योयमविकार्योयमुच्यते॥ त
स्मादेवंविदित्वैनंनानुशोचितुमर्हसि॥२५॥
अथचैनंनित्यजातंनित्यंवामन्यसेमृतं॥ त
थापित्वंमहाबाहोनैवंशोचितुमर्हसि॥२६॥

श्री गी २६

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ॥ तस्मा
दपरिहार्येर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥ अ
व्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ॥ अ
व्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥ आ
श्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथै
व चान्यः ॥ आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वा
प्येनं वेद न चैव कश्चित् ॥ २९ ॥ देही नित्यमव

ध्योयंदेहेसर्वस्यभारत ॥ तस्मात्सर्वाणिभूतानि
नत्वंशोचितुमर्हसि ॥ ३० ॥ स्वधर्ममपिचावेक्ष्य
नविकंपितुमर्हसि ॥ धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्ष
त्रियस्यनविद्यते ॥ ३१ ॥ यदृच्छयाचोपपन्नंस्व
र्गद्वारमपावृतं ॥ सुखिनःक्षत्रियाःपार्थलभं
तेयुद्धमीदृशं ॥ ३२ ॥ अथचेत्त्वमिमंधर्मसंग्रा
मंनकरिष्यसि ॥ ततःस्वधर्मंकीर्तिंचहित्वापा

पमवाप्स्यसि ॥३३॥ अकीर्त्तिं चापि भूतानि कथ
यिष्यंति तेव्ययां ॥ संभावितस्य चाकीर्त्तिर्मरणा
दतिरिच्यते ॥३४॥ भयाद्रणादुपरतं मंस्यंते त्वां
महारथाः ॥ येषां च त्वं बहुमतो भूत्वा यास्यसि
लाघवं ॥३५॥ अवाच्यवादांश्च बहून्वदि
ष्यंति तवाहिताः ॥ निंदंतस्तव सामर्थ्यं ततो दुःख
तरं नु किं ॥३६॥ हतो वा प्राप्स्यसि स्वर्गं जि

त्वावाभोक्ष्यसेमहीं॥तस्मादुत्तिष्ठकौंतेययुद्धायकृ
तनिश्चय॥३७॥सुखदुःखेसमेकृत्वालाभालाभौज
याजयौ॥ततोयुद्धाययुज्यस्वनैवंपापमवाप्स्यसि॥
३८॥एषातेभिहितासांख्येबुद्धिर्योगेत्विमांशृणु॥
बुद्ध्यायुक्तोययापार्थकर्मबंधंप्रहास्यसि॥३९॥ने
हाभिक्रमनाशोस्तिप्रत्यवायोनविद्यते॥स्वल्पम
प्यस्यधर्मस्यत्रायतेमहतोभयात्॥४०॥व्यवसा

यात्मिकाबुद्धिरेकेहकुरुनंदन ॥ बहुशाखाह्यनंता
श्चबुद्धयोव्यवसायिनां ॥४१॥ यामिमांपुष्पितांवा
चंप्रवदंत्यविपश्चितः ॥ वेदवादरताःपार्थनान्यद
स्तीतिवादिनः ॥४२॥ कामात्मानःस्वर्गपराजन्म
कर्मफलप्रदां ॥ क्रियाविशेषबहुलांभोगैश्वर्यग
तिंप्रति ॥४३॥ भोगैश्वर्यप्रसक्तानांतयापहृत
चेतसां ॥ व्यवसायात्मिकाबुद्धिःसमाधौनविधी

धीयते ॥४४॥ त्रैगुण्यविषयावेदानिस्त्रैगुण्यो
भवार्जुन ॥ निर्द्वन्द्वोनित्यसत्त्वस्थोनिर्योगक्षेम
आत्मवान् ॥४५॥ यावानर्थउदपानेसर्वतःसं
प्लुतोदके ॥ तावान्सर्वेषुवेदेषुब्राह्मणस्यविजा
नतः ॥४६॥ कर्मण्येवाधिकारस्तेमाफलेषुक
दाचन ॥ माकर्मफलहेतुर्भूर्मातेसंगोस्त्वक
र्मणि ॥४७॥ योगस्थःकुरुकर्माणिसंगंत्य

न्याधनंजय ॥ सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं यो
ग उच्यते ॥४८॥ यस्य सर्वे समारंभा निराशाबंध
नास्त्विह ॥ त्यागे यस्य हुतं सर्वं स त्यागी स च बुद्धि
मान् ॥४८॥ दूरेण ह्यवरं कर्म बुद्धियोगाद्धनं
जय ॥ बुद्धौ शरणमन्विच्छ कृपणाः फलहेत
वः ॥४९॥ बुद्धियुक्तो जहातीह उभे सुकृतदुः
कृते ॥ तस्माद्योगाय युज्यस्व योगः कर्मसु कौ

शलं ॥५१॥ कर्मजंबुद्धियुक्ताहिफलंत्यक्त्वाम
नीषिणः ॥ जन्मबंधविनिर्मुक्ताःपदंगच्छंत्यना
मयं ॥५२॥ यदातेमोहकलिलंबुद्धिर्व्यतितरि
ष्यति ॥ तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुत
स्यच ॥५२॥ श्रुतिविप्रतिपन्नातेयदास्थास्य
तिनिश्चला ॥ समाधावचलाबुद्धिस्तदायो
गमवाप्स्यसि ॥५३॥ अर्जुन उवाच ॥ स्थितप्र

श्री.
गी.
२०

प्रज्ञस्यकाभाषासमाधिस्थस्यकेशव॥ स्थित
धीः किंप्रभाषेतकिमासीतव्रजेतकिं॥५४॥श्री
भगवानुवाच॥ प्रजहातियदाकामान्सर्वान्पा
र्थमनोगतान्॥ आत्मन्येवात्मनातुष्टः स्थित२
नप्रज्ञस्तदोच्यते॥५५॥ दुःखेष्वनुद्विग्नमनाः
सुखेषुविगतस्पृहः॥ वीतरागभयक्रोधः२
स्थितधीर्मुनिरुच्यते॥५६॥ यः सर्वत्रानभिस्ने

स्तत्तत्प्राप्यशुभाशुभं ॥ नाभिनंदतिनद्वेष्टित
स्यप्रज्ञाप्रतिष्ठिता ॥५७॥ यदासंहरतेचायंकू
र्मोंगानीवसर्वशः ॥ इंद्रियाणींद्रियार्थेभ्यस्त
स्यप्रज्ञाप्रतिष्ठिता ॥५८॥ विषयाविनिवर्तंते
निराहारस्यदेहिनः ॥ रसवर्जंरसोप्यस्यपरंदृ
ष्ट्वानिवर्तते ॥५९॥ यततोह्यपिकौंतेयपुरुष
स्यविपश्चितः ॥ इंद्रियाणिप्रमाथीनिहरंतिप्र

श्री॰
गी॰
२१

प्रसभंमनः ॥६०॥ तानिसर्वाणिसंयम्ययुक्तआ
सीतमत्परः ॥ वशेहियस्येंद्रियाणितस्यप्रज्ञाप्र
तिष्ठिता ॥६१॥ ध्यायतोविषयान्पुंसः संगस्तेषू
पजायते ॥ संगात्संजायतेकामः कामात्क्रोधो
भिजायते ॥६२॥ क्रोधाद्भवतिसंमोहः संमोहा
त्स्मृतिविभ्रमः ॥ स्मृतिभ्रंशाद्बुद्धिनाशोबुद्धि
नाशात्प्रणश्यति ॥६३॥ रागद्वेषवियुक्तैस्तुवि

षयानींद्रियैश्चरन् ॥ आत्मवश्यैर्विधेयात्मा प्र
सादमधिगच्छति ॥ ६४ ॥ प्रसादे सर्वदुःखानां हा
निरस्योपजायते ॥ प्रसन्नचेतसो ह्याशु बुद्धिः प
र्यवतिष्ठते ॥ ६५ ॥ नास्ति बुद्धिरयुक्तस्य न चायु
क्तस्य भावना ॥ न चाभावयतः शांतिरशांत
स्य कुतः सुखं ॥ ६६ ॥ इंद्रियाणां हि चरतां यन्म
नोनुविधीयते ॥ तदस्य हरति प्रज्ञां वायुर्नावमि

वांभसि ॥६७॥ तस्माद्यस्य महाबाहो निग्रहीता
नि सर्वशः ॥ इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा
प्रतिष्ठिता ॥६८॥ या निशा सर्वभूतानां तस्यां
जागर्ति संयमी ॥ यस्यां जाग्रति भूतानि सा नि
शा पश्यतो मुनेः ॥६९॥ आपूर्यमाणमचलं
प्रतिष्ठं ॥ समुद्रमापः प्रविशंति यद्वत् ॥ तद्व
त्कामा यं प्रविशंति सर्वे ॥ स शांतिमाप्नोति न

कामकामी ॥७०॥ विहायकामान्यः सर्वान्पु

मांश्चरतिनिःस्पृहः ॥ निर्ममोनिरहंकारः स

शांतिमधिगच्छति ॥७१॥ एषाब्राह्मीस्थितिः

पार्थनैनंप्राप्यविमुह्यति ॥ स्थित्वास्यामंत

कालेपिब्रह्मनिर्वाणमृच्छति ॥७२॥ इति श्रीभग

वद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रे

श्रीकृष्णार्जुनसंवादे सांख्ययोगोनामद्विती

श्री· गी· २३

योमायः ॥ अर्जुन उवाच ॥ ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ॥ तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥१॥ व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ॥ तदेकं वद निश्चित्य येन श्रेयोहमाप्नुयात ॥२॥ श्रीभगवानुवाच ॥ लोकेस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ॥ ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनां ॥

नकर्मणामनारंभान्नैष्कर्म्यंपुरुषोश्नुते॥ नचसं
न्यसनादेवसिद्धिंसमधिगच्छति॥४॥ नहिकश्चि
त्क्षणमपिजातुतिष्ठत्यकर्मकृत॥ कार्यतेह्यवशः
कर्मसर्वैःप्रकृतिजैर्गुणैः॥५॥ कर्मेंद्रियाणिसंय
म्ययआस्तेमनसास्मरन्॥ इंद्रियार्थान्विमूढा
त्मामिथ्याचारःसउच्यते॥६॥ यस्त्विंद्रियाणि
मनसानियम्यारभतेर्जुन॥ कर्मेंद्रियैःकर्मयोग

श्री· गी· २४

रसमुद्भवं ॥ तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितं
१५ ॥ एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ॥ अघायु
रिंद्रियारामो मोघं पार्थ स जीवति ॥ १६ ॥ यस्त्वात्म
रतिरेव स्यादात्मतृप्तश्च मानवः ॥ आत्मन्येव च सं
तुष्टस्तस्य कार्यं न विद्यते ॥ १७ ॥ नैव तस्य कृतेनार्
थो नाकृतेनेह कश्चन ॥ न चास्य सर्वभूतेषु क
श्चिदर्थव्यपाश्रयः ॥ १८ ॥ तस्मादसक्तः सततं कार्यं

कर्मसमाचर॥ असक्तोह्याचरन्कर्मपरमाप्नो
तिपूरुषः॥ १९॥ कर्मणैवहिसंसिद्धिमास्थि
ताजनकादयः॥ लोकसंग्रहमेवापिसंपश्य
न्कर्तुमर्हसि॥ २०॥ यद्यदाचरतिश्रेष्ठस्तत्तदेवे
तरोजनः॥ सयत्प्रमाणंकुरुतेलोकस्तदनु
वर्तते॥ २१॥ नमेपार्थास्तिकर्तव्यंत्रिषुलोके
षुकिंचन॥ नानवाप्तमवाप्तव्यंवर्तएवचक

श्री॰
गी॰
२६

र्मणि॥२२॥यदिह्यहंनवर्तेयंजातुकर्मण्यतंद्रि
तः॥ममवर्त्मानुवर्तंतेमनुष्याःपार्थसर्वशः॥
२३॥उत्सीदेयुरिमेलोकानकुर्यांकर्मचेदहं॥
संकरस्यचकर्तास्यामुपहन्यामिमाःप्रजाः॥
२४॥सक्ताःकर्मण्यविद्वांसोयथाकुर्वंतिभा
रत॥कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसं
ग्रहं॥२५॥नबुद्धिभेदंजनयेदज्ञानांकर्मसंगि

नां ॥ जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचर
न् ॥२६॥ प्रकृतेः क्रियमाणानि गुणैः कर्माणि
सर्वशः ॥ अहंकारविमूढात्मा कर्ताहमिति म
न्यते ॥२७॥ तत्त्ववित्तु महाबाहो गुणकर्मविभा
गयोः ॥ गुणा गुणेषु वर्तंत इति मत्वा न सज्जते
॥२८॥ प्रकृतेर्गुणसंमूढाः सज्जंते गुणकर्मसु ॥
तानकृत्स्नविदो मंदान्कृत्स्नविन्न विचालयेत् ॥ २९

श्री. गी. २

मयिसर्वाणिकर्माणिसंन्यस्याध्यात्मचेतसा ॥
निराशीर्निर्ममोभूत्वायुध्यस्वविगतज्वरः ॥३०॥
येमेमतमिदंनित्यमनुतिष्ठंतिमानवाः ॥ श्रद्धा-
वंतोनसूयंतोमुच्यंतेतेपिकर्मभिः ॥३१॥ येत्वे-
तदभ्यसूयंतोनानुतिष्ठंतिमेमतं ॥ सर्वज्ञान-
विमूढांस्तान्विद्धिनष्टानचेतसः ॥३२॥ सदृशं
चेष्टतेस्वस्याःप्रकृतेर्ज्ञानवानपि ॥ प्रकृतिंयां

ति भूतानि निग्रहः किं करिष्यति ॥३३॥ इंद्रिय
स्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ॥ तयोर्नवश
मागच्छेत्तौ ह्यस्य परिपंथिनौ ॥३४॥ श्रेयान्स्व
धर्मो विगुणः परधर्मात्स्वनुष्ठितात ॥ स्वधर्मे नि
धनं श्रेयः परधर्मो भयावहः ॥३५॥ अर्जुन उवा
च ॥ अथ केन प्रयुक्तोयं पापं चरति पूरुषः ॥ अ
निच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥३६॥

श्री·
गी·
२८

श्रीभगवानुवाच॥ कामएषक्रोधएषरजोगुणसमु
द्भवः॥ महाशनोमहापाप्माविद्ध्येनमिहवैरि
णं॥ ३७॥ धूमेनाव्रियतेवह्निर्यथादर्शोमले
नच॥ यथोल्बेनावृतोगर्भस्तथातेनेदमावृतं॥
३८॥ आवृतंज्ञानमेतेनज्ञानिनोनित्यवैरिणा
कामरूपेणकौंतेयदुःपूरेणानलेनच॥ ३९॥
इंद्रियाणिमनोबुद्धिरस्याधिष्ठानमुच्यते॥ ए

तैर्विमोहयत्येषज्ञानमावृत्यदेहिनं॥४०॥तस्मा
त्वमिंद्रियाण्यादौनियम्यभरतर्षभ॥पाप्मानं
प्रजहिह्येनंज्ञानविज्ञाननाशनं॥४१॥इंद्रिया
णिपराण्याहुरिंद्रियेभ्यःपरंमनः॥मनसस्तु
पराबुद्धिर्योबुद्धेःपरतस्तुसः॥४२॥एवंबुद्धेःप
रंबुद्ध्वासंस्तभ्यात्मानमात्मना॥जहिशत्रुंम
हाबाहोकामरूपंदुरासदं॥४३॥इतिश्रीभगव

द्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णा
र्जुनसंवादेकर्मयोगोनामतृतीयोध्यायः॥३॥श्री
भगवानुवाच॥ इमंविवस्वतेयोगंप्रोक्तवानहम
व्ययं॥ विवस्वान्मनवेप्राहमनुरिक्ष्वाकवेब्रवी
त्॥१॥एवंपरंपराप्राप्तमिमंराजर्षयोविदुः॥सका
लेनेहमहतायोगोनष्टःपरंतप॥२॥सएवायंम
यातेद्ययोगःप्रोक्तःपुरातनः॥भक्तोसिमेसखा

चेति रहस्यं ह्येतदुत्तमं ॥ ३ ॥ अर्जुन उवाच ॥ अ
परं भवतो जन्म परं जन्म विवस्वतः ॥ कथमेत
द्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४ ॥ श्रीभ
गवानुवाच ॥ बहूनि मे व्यतीतानि जन्मानि त
व चार्जुन ॥ तान्यहं वेद सर्वाणि न त्वं वेत्थ परंत
प ॥ ५ ॥ अजोपि सन्नव्ययात्मा भूतानामीश्वरो
पि सन् ॥ प्रकृतिं स्वामधिष्ठाय संभवाम्यात्म

मायया॥६॥यदायदाहिधर्मस्यग्लानिर्भवतिभारत॥
अभ्युत्थानमधर्मस्यतदात्मानंसृजाम्यहं॥७॥परि
त्राणायसाधूनांविनाशायचदुष्कृतां॥धर्मसंस्था
पनार्थायसंभवामियुगेयुगे॥८॥जन्मकर्मचमे
दिव्यमेवंयोवेत्तितत्वतः॥त्यक्त्वादेहंपुनर्जन्मने
तिमामेतिसोर्जुन॥९॥वीतरागभयक्रोधामन्म
यामामुपाश्रिताः॥बहवोज्ञानतपसापूतामद्

द्भावमागताः॥१०॥ येयथामांप्रपद्यंतेतांस्तथै
वभजाम्यहं॥ ममवर्त्मानुवर्तंतेमनुष्याःपार्थस
र्वशः॥११॥ कांक्षंतःकर्मणांसिद्धिंयजंतइह
देवताः॥ क्षिप्रंहिमानुषेलोकेसिद्धिर्भवतिक
र्मजा॥१२॥ चातुर्वर्ण्यंमयासृष्टंगुणकर्मवि
भागशः॥ तस्यकर्तारमपिमांविद्ध्यकर्तारम
व्ययं॥१३॥ नमांकर्माणिलिंपंतिनमेकर्मफ

श्री॰
गी॰
३१

लेस्पृहा ॥ इतिमांयोभिजानातिकर्मभिर्नसब
ध्यते ॥ १४ ॥ एवंज्ञात्वाकृतंकर्मपूर्वैरपिमुमुक्षु
भिः ॥ कुरुकर्मैवतस्मात्त्वंपूर्वैःपूर्वतरंकृतं ॥ १५
किंकर्मकिमकर्मेतिकवयोप्यत्रमोहिता ॥ त
त्तेकर्मप्रवक्ष्यामियज्ज्ञात्वामोक्ष्यसेशुभात् ॥ १६
कर्मणोह्यपिबोद्धव्यंबोद्धव्यंचविकर्मणः ॥ अ
कर्मणश्चबोद्धव्यंगहनाकर्मणोगतिः ॥ १७ ॥

कर्मण्यकर्मयःपश्येदकर्मणिचकर्मयः॥सबु
द्धिमान्मनुष्येषुसयुक्तःकृत्स्नकर्मकृत॥१८॥य
स्यसर्वेसमारंभाःकामसंकल्पवर्जिताः॥ज्ञाना
ग्निदग्धकर्माणंतमाहुःपंडितंबुधाः॥१९॥त्य
क्त्वाकर्मफलासंगंनित्यतृप्तोनिराश्रयः॥क
र्मण्यभिप्रवृत्तोपिनैवकिंचित्करोतिसः॥२०॥
निराशीर्यतचित्तात्मात्यक्तसर्वपरिग्रहः॥शारी

श्री॰
गी॰
३२

रं केवलं कर्म कुर्वन्नाप्नोति किल्बिषं ॥२१॥ यदृच्छा
लाभसंतुष्टो द्वंद्वातीतो विमत्सरः ॥ समः सिद्धा
वसिद्धौ च कृत्वापि न निबध्यते ॥२२॥ गतसंगस्य
मुक्तस्य ज्ञानावस्थितचेतसः ॥ यज्ञायाचरतः क
र्म समग्रं प्रविलीयते ॥२३॥ ब्रह्मार्पणं ब्रह्म हवि
र्ब्रह्माग्नौ ब्रह्मणा हुतं ॥ ब्रह्मैव तेन गंतव्यं ब्रह्म
कर्मसमाधिना ॥२४॥ दैवमेवापरे यज्ञं योगिनः

पर्युपासते

र्वानेवंज्ञात्वाविमोक्ष्यसे॥३२॥श्रेयान्द्रव्यमयाद्य
ज्ञाज्ज्ञानयज्ञःपरंतप॥सर्वंकर्माखिलंपार्थज्ञाने
परिसमाप्यते॥३३॥तद्विद्धिप्रणिपातेनपरिप्र
श्नेनसेवया॥उपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्वदर्
शिनः॥३४॥यज्ज्ञात्वानपुनर्मोहमेवंयास्यसिपा
ण्डव॥येनभूतान्यशेषेणद्रक्ष्यस्यात्मन्यथोमयि॥३५
अपिचेदसिपापेभ्यःसर्वेभ्यःपापकृत्तमः॥सर्वंज्ञा

श्री०
गी०
३०

नप्लवेनैववृजिनंसंतरिष्यसि ॥३६॥ यथैधांसिसमि
द्धोग्निर्भस्मसात्कुरुतेर्जुन ॥ ज्ञानाग्निःसर्वकर्मा
णिभस्मसात्कुरुतेतथा ॥३७॥ नहिज्ञानेनसदृशं
पवित्रमिहविद्यते ॥ तत्स्वयंयोगसंसिद्धःकालेना
त्मनिविंदति ॥३८॥ श्रद्धावांल्लभतेज्ञानंतत्परःसं
यतेंद्रियः ॥ ज्ञानंलब्ध्वापरांशांतिमचिरेणाधिगच्छ
ति ॥३९॥ अज्ञश्चाश्रद्दधानश्चसंशयात्माविनश्य

ति ॥ नायं लोकोस्ति न परो न सुखं संशयात्मनः ॥ ४० ॥
योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयं ॥ आत्मवंतं
न कर्माणि निबध्नंति धनंजय ॥ ४१ ॥ तस्मादज्ञानसंभू
तं हृत्स्थं ज्ञानासिनात्मनः ॥ छित्वैनं संशयं योगमाति
ष्ठोत्तिष्ठ भारत ॥ ४२ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्र
ह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मसं
न्यासयोगो नाम चतुर्थोध्यायः ॥ ४ ॥ अर्जुन उवाच ॥

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ॥ यच्छ्रेय ए-
तयोरेकं तन्मे ब्रूहि सुनिश्चितं ॥१॥ श्रीभगवानुवाच
संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ॥ तयो-
स्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥२॥ ज्ञेयः स
स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति ॥ निर्द्वंद्वो हि
महाबाहो सुखं बंधात्प्रमुच्यते ॥३॥ सांख्ययोगौ पृ-
थग्बालाः प्रवदंति न पंडिताः ॥ एकमप्यास्थितः स-

म्यगुभयोर्विंदतेफलं ॥४॥ यत्सांख्यैःप्राप्यतेस्थानंत
द्योगैरपिगम्यते ॥ एकंसांख्यंचयोगंचयःपश्यतिसप
श्यति ॥५॥ संन्यासस्तुमहाबाहोदुःखमाप्तुमयोगतः
योगयुक्तोमुनिर्ब्रह्मनचिरेणाधिगच्छति ॥६॥ योगयु
क्तोविशुद्धात्माविजितात्माजितेंद्रियः ॥ सर्वभूतात्म
भूतात्माकुर्वन्नपिनलिप्यते ॥७॥ नैवकिंचित्करोमी
तियुक्तोमन्येततत्ववित् ॥ पश्यन्शृण्वन्स्पृशञ्जि

श्री॰
गी॰
३६

शृण्वन्स्पृशन्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन् ॥८॥ प्रलपन्विसृजन्गृ-
ह्णन्नुन्मिषन्निमिषन्नपि ॥ इंद्रियाणींद्रियार्थेषुवर्तंत
इतिधारयन् ॥९॥ ब्रह्मण्याधायकर्माणिसंगंत्यक्त्वा
करोतियः ॥ लिप्यतेनसपापेनपद्मपत्रमिवांभसा ॥
१०॥ कायेनमनसाबुद्ध्याकेवलैरिंद्रियैरपि ॥ योगि-
नः कर्मकुर्वंतिसंगंत्यक्त्वात्मशुद्धये ॥११॥ युक्तः कर्मफ
लंत्यक्त्वाशांतिमाप्नोतिनैष्ठिकीं ॥ अयुक्तः कामका

रेणफलेसक्तोनिबध्यते॥१२॥सर्वकर्माणिमनसा
संन्यस्यास्तेसुखंवशी॥नवद्वारेपुरेदेहीनैवकुर्वन्न
कारयन्॥१३॥नकर्तृत्वंनकर्माणिलोकस्यसृजति
प्रभुः॥नकर्मफलसंयोगंस्वभावस्तुप्रवर्तते॥१४॥
नादत्तेकस्यचित्पापंनचैवसुकृतंविभुः॥अज्ञानेना
वृतंज्ञानंतेनमुह्यंतिजंतवः॥१५॥ज्ञानेनतुतदज्ञा
नंयेषांनाशितमात्मनः॥तेषामादित्यवज्ज्ञानंप्रका

श्री· गी· ३८

शयति तत्परं ॥ १६ ॥ तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्प
रायणाः ॥ गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥
१७ ॥ विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ॥ शुनि
चैव श्वपाके च पंडिताः समदर्शिनः ॥ १८ ॥ इहैव तै
र्जितः सर्गो येषां साम्ये स्थितं मनः ॥ निर्दोषं हि समं
ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥ १९ ॥ न प्रहृष्येत्प्रियं
प्राप्य नोद्विजेत्प्राप्य चाप्रियं ॥ स्थिरबुद्धिरसंमूढो ब्र

ब्रह्मविद्ब्रह्मणिस्थितः २

पर्युपासते ॥ ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति
२५ ॥ श्रोत्रादीनींद्रियाण्यन्ये संयमाग्निषु जुह्वति ॥
शब्दादीन्विषयानन्य इंद्रियाग्निषु जुह्वति ॥ २६ ॥
सर्वाणींद्रियकर्माणि प्राणकर्माणि चापरे ॥ २
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७ ॥
द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ॥ स्वाध्या
यज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ २८ ॥ अपरे

नेजुह्वतिप्राणंप्राणेपानंतथापरे॥ प्राणापानग
तीरुद्ध्वाप्राणायामपरायणाः॥२९॥ अपरेनिय
ताहाराःप्राणान्प्राणेषुजुह्वति॥ सर्वेप्येतेयज्ञ
विदोयज्ञक्षपितकल्मषाः॥३०॥ यज्ञशिष्टामृ
तभुजोयांतिब्रह्मसनातनं॥ नायंलोकोस्त्यय
ज्ञस्यकुतोन्यःकुरुसत्तम॥३१॥ एवंबहुविधा
यज्ञावितताब्रह्मणोमुखे॥ कर्मजान्विद्धितान्स

ब्रह्मविद्ब्रह्मणि स्थितः ॥२०॥ बाह्यस्पर्शेष्वसक्ता
त्मा विंदत्यात्मनि यत्सुखं ॥ स ब्रह्मयोगयुक्ता
त्मा सुखमक्षयमश्नुते ॥२१॥ ये हि संस्पर्शजा भो
गा दुःखयोनय एव ते ॥ आद्यंतवंतः कौंतेय न ते
षु रमते बुधः ॥२२॥ शक्नोतीहैव यः सोढुं प्राक्शरी
रविमोक्षणात ॥ कामक्रोधोद्भवं वेगं स युक्तः
स सुखी नरः ॥२३॥ योंतःसुखोंतरारामस्तथांत

श्री
गी
३८

र्ज्योतिरेवयः॥सयोगीब्रह्मनिर्वाणंब्रह्मभूतो॰
धिगछति॥२४॥लभंतेब्रह्मनिर्वाणमृषयःक्षी
णकल्मषाः॥छिन्नद्वैधायतात्मानःसर्वभूत
हितेरताः॥२५॥कामक्रोधवियुक्तानांयतीनां
यतचेतसां॥अभितोब्रह्मनिर्वाणंवर्त्ततेविदि॰
तात्मनां॥२६॥स्पर्शान्कृत्वाबहिर्बाह्यांश्चक्षु॰
श्चैवांतरेभ्रुवोः॥प्राणापानौसमौकृत्वानासाभ्यं

तरचारिणौ ॥२७॥ यतेंद्रियमनोबुद्धिर्मुनिर्मो
क्षपरायणः ॥ विगतेच्छाभयक्रोधो यः सदामु
क्त एव सः ॥२८॥ भोक्तारं यज्ञतपसां सर्वलोकम
हेश्वरं ॥ सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छ
ति ॥२९॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्या
यां योगशास्त्रे श्रीकृष्णार्जुनसंवादे संन्यासयो
गो नाम पंचमोऽध्यायः ॥५॥ श्रीभगवानुवाच ॥

श्री
गी
३९

अनाश्रितःकर्मफलंकार्यंकर्मकरोतियः॥सस
न्यासीचयोगीचननिरग्निर्नचाक्रियः॥१॥यंसं
न्यासमितिप्राहुर्योगंतंविद्धिपांडव॥नह्यसंन्य
स्तसंकल्पोयोगीभवतिकश्चन॥२॥आरुरुक्षो
र्मुनेर्योगंकर्मकारणमुच्यते॥योगारूढस्यत
स्यैवशमःकारणमुच्यते॥३॥यदाहिनेंद्रियार्थे
षुनकर्मस्वनुषज्जते॥सर्वसंकल्पसंन्यासीयो

गारूढस्तदोच्यते ॥ ४ ॥ उद्धरेदात्मनात्मानं नात्मा
नमवसादयेत् ॥ आत्मैव ह्यात्मनो बंधुरात्मैव रि
पुरात्मनः ॥ ५ ॥ बंधुरात्मात्मनस्तस्य येनात्मैवात्म
नाजितः ॥ अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रु
वत् ॥ ६ ॥ जितात्मनः प्रशांतस्य परमात्मा समाहि
तः ॥ शीतोष्णसुखदुःखेषु तथा मानापमानयोः
७ ॥ ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः ॥

श्री॰
गी॰
४०

युक्तइत्युच्यतेयोगीसमलोष्टाश्मकांचनः॥८॥सु
हृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु॥साधुष्व
पिचपापेषुसमबुद्धिर्विशिष्यते॥९॥योगीयुं
जीतसततमात्मानंरहसिस्थितः॥एकाकीयत
चित्तात्मानिराशीरपरिग्रहः॥१०॥शुचौदेशेप्र
तिष्ठाप्यस्थिरमासनमात्मनः॥नात्युच्छ्रितंना
तिनीचंचैलाजिनकुशोत्तरं॥११॥नत्रैकाग्रंम

नःकृत्वायतचित्तेंद्रियक्रियः ॥ उपविश्यासने
युंज्याद्योगमात्मविशुद्धये ॥ १२ ॥ समंकायशिरो
ग्रीवंधारयन्नचलंस्थिरः ॥ संप्रेक्ष्यनासिकाग्रंस्वं
दिशश्चानवलोकयन् ॥ १३ ॥ प्रशांतात्माविग
तभीर्ब्रह्मचारिव्रतेस्थितः ॥ मनःसंयम्यमच्चित्तो
युक्तआसीतमत्परः ॥ १४ ॥ युंजन्नेवंसदात्मानं
योगीनियतमानसः ॥ शांतिंनिर्वाणपरमांमत्सं

स्थामधिगच्छति ॥१५॥ नात्यश्नतस्तु योगोस्ति न चै
कांतमनश्नतः ॥ न चातिस्वप्नशीलस्य जाग्रतो नै
व चार्जुन ॥१६॥ युक्ताहारविहारस्य युक्तचेष्टस्य
कर्मसु ॥ युक्तस्वप्नावबोधस्य योगो भवति दुःख
हा ॥१७॥ यदा विनियतं चित्तमात्मन्येवावतिष्टते
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥१८॥
यथा दीपो निवातस्थो नेंगते सोपमा स्मृता ॥ यो

गिनोयतचित्तस्ययुंजतोयोगमात्मनः॥१९॥य
त्रोपरमतेचित्तंनिरुद्धंयोगसेवया॥यत्रचैवा
त्मनात्मानंपश्यन्नात्मनितुष्यति॥२०॥सुखमा
त्यंतिकंयत्तद्बुद्धिग्राह्यमतींद्रियं॥वेत्तियत्रनचै
वायंस्थितश्चलतितत्त्वतः॥२१॥यंलब्ध्वाचापरं
लाभंमन्यतेनाधिकंततः॥यस्मिन्स्थितोनदुः
खेनगुरुणापिविचाल्यते॥२२॥तंविद्याद्दुःखसं

श्री गी० ४२

योगंवियोगंयोगसंज्ञितं ॥ सनिश्चयेनयोक्तव्यो
योगोनिर्विण्णचेतसा ॥ २३ ॥ संकल्पप्रभवान्
कामांस्त्यक्त्वासर्वानशेषतः ॥ मनसैवेंद्रिय
ग्रामंविनियम्यसमंततः ॥ २४ ॥ शनैःशनैरुप
रमेद्बुद्ध्याधृतिगृहीतया ॥ आत्मसंस्थंमनःकृ
त्वानकिंचिदपिचिंतयेत् ॥ २५ ॥ यतोयतोनि
श्चरतिमनश्चंचलमस्थिरं ॥ ततस्ततोनियम्यै

व

तदात्मन्येववशंनयेत्॥२६॥प्रशांतमनसंह्येनं
योगिनंसुखमुत्तमं॥उपैतिशांतरजसंब्रह्मभू
तमकल्मषं॥२७॥युंजन्नेवंसदात्मानंयोगीवि
गकल्मषः॥सुखेनब्रह्मसंस्पर्शमत्यंतंसुखम
श्नुते॥२८॥सर्वभूतस्थमात्मानंसर्वभूतानिचा
त्मनि॥ईक्षतेयोगयुक्तात्मासर्वत्रसमदर्शनः॥
२९॥योमांपश्यतिसर्वत्रसर्वंचमयिपश्यति॥त

स्याहंनप्रणश्यामिसचमेनप्रणश्यति ॥३०॥ स
र्वभूतस्थितंयोमांभजत्येकत्वमास्थितः ॥ सर्व
थावर्तमानोपिसयोगीमयिवर्तते ॥३१॥ आ
त्मौपम्येनसर्वत्रसमंपश्यतियोर्जुन ॥ सुखंवा
यदिवादुःखंसयोगीपरमोमतः ॥३२॥ अर्जुन
उवाच ॥ योयंयोगस्त्वयाप्रोक्तःसाम्येनमधुसू
दन ॥ एतस्याहंनपश्यामिचंचलत्वात्स्थितिं

स्थिरां ॥३३॥ चंचलं हि मनः कृष्ण प्रमाथि बल
वद्दृढं ॥ तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं
॥३४॥ श्रीभगवानुवाच ॥ असंशयं महाबाहो म
नो दुर्निग्रहं चलं ॥ अभ्यासेन तु कौंतेय वैराग्ये
ण च गृह्यते ॥३५॥ असंयतात्मनो योगो दुःप्राप
इति मे मतिः ॥ वश्यात्मना तु यतता शक्योवाप्तु
मुपायतः ॥३६॥ अर्जुन उवाच ॥ अयतिः श्रद्धयो

पेतोयोगाच्चलितमानसः॥ अप्राप्ययोगसंसिद्धिं
कांगतिंकृष्णगच्छति॥३७॥ कच्चिन्नोभयविभ्रष्टः
छिन्नाभ्रमिवनश्यति॥ अप्रतिष्ठोमहाबाहोवि
मूढोब्रह्मणःपथि॥३८॥ एतन्मेसंशयंकृष्णछे
त्तुमर्हस्यशेषतः॥ त्वदन्यःसंशयस्यास्यछेत्तान
ह्युपपद्यते॥३९॥ श्रीभगवानुवाच॥ पार्थनैवे
हनामुत्रविनाशस्तस्यविद्यते॥ नहिकल्या

णकृत्कश्चिद्दुर्गतिंतातगच्छति ॥४०॥ प्राप्यपु
ण्यकृतांलोकानुषित्वाशाश्वतीःसमाः ॥ शु
चीनांश्रीमतांगेहेयोगभ्रष्टोभिजायते ॥४१॥ अ
थवायोगिनामेवकुलेभवतिधीमतां ॥ एतद्धि
दुर्लभतरंलोकेजन्मयदीदृशं ॥४२॥ तत्रतंबुद्धि
संयोगंलभतेपौर्वदेहिकं ॥ यततेचततोभूयः
संसिद्धौकुरुनंदन ॥४३॥ पूर्वाभ्यासेनतेनैव

श्री॰
गी॰
४५

क्रियते ह्यवशोपि सः ॥ जिज्ञासुरपि योगस्य शब्द
ब्रह्मातिवर्त्तते ॥ ४४ ॥ प्रयत्नाद्यतमानस्तु योगी
संशुद्धकिल्बिषः ॥ अनेकजन्मसंसिद्धस्ततो
याति परां गतिं ॥ ४५ ॥ तपस्विभ्योधिको योगी
ज्ञानिभ्योपि मतोधिकः ॥ कर्मिभ्यश्चाधिको
योगी तस्माद्योगी भवार्जुन ॥ ४६ ॥ योगिनाम
पि सर्वेषां मद्गतेनांतरात्मना ॥ श्रद्धावान्भज

नेयो मां स मे युक्ततमो मतः ॥४७॥ इति श्रीभगव
द्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्री
कृष्णार्जुनसंवादे ध्यानसंयमयोगो नाम षष्ठो
ध्यायः ॥६॥ श्रीभगवानुवाच ॥ मय्यासक्तमनाः
पार्थ योगं युंजन्मदाश्रयः ॥ असंशयं समग्रं मां
यथा ज्ञास्यसि तच्छृणु ॥१॥ ज्ञानं तेऽहं सविज्ञा
नमिदं वक्ष्याम्यशेषतः ॥ यज्ज्ञात्वा नेह भूयोन्य

ज्ञातव्यमवशिष्यते॥ २॥ मनुष्याणांसहस्रेषुक
श्चिद्यततिसिद्धये॥ यततामपिसिद्धानांकश्चि
न्मांवेत्तितत्वतः॥ ३॥ भूमिरापोनलोवायुःखं
मनोबुद्धिरेवच॥ अहंकारइतीयंमेभिन्नाप्रकृ
तिरष्टधा॥ ४॥ अपरेयमितस्त्वन्यांप्रकृतिंवि
द्धिमेपरां॥ जीवभूतांमहाबाहोययेदंधार्यतेज
गत॥ ५॥ एतद्योनीनिभूतानिसर्वाणीत्युपधा

रय॥ अहंकृत्स्नस्यजगतःप्रभवःप्रलयस्त
था॥६॥ मत्तःपरतरंनान्यत्किंचिदस्तिधनंजय
मयिसर्वमिदंप्रोक्तंसूत्रेमणिगणाइव॥७॥ र
सोहमप्सुकौंतेयप्रभास्मिशशिसूर्ययोः॥ प्र
णवःसर्ववेदेषुशब्दःखेपौरुषंनृषु॥८॥ पुण्यो
गंधःपृथिव्यांचतेजश्चास्मिविभावसौ॥ जीव
नंसर्वभूतेषुतपश्चास्मितपस्विषु॥९॥ बीजंमां

श्री. गी. ४०

सर्वभूतानांविद्धिपार्थसनातनं॥बुद्धिर्बुद्धिमता
मस्मितेजस्तेजस्विनामहं॥१०॥बलंबलवता
चाहंकामरागविवर्जितं॥धर्माविरुद्धोभूतेषु
कामोस्मिभरतर्षभ॥११॥येचैवसात्विकाभा
वाराजसास्तामसाश्चये॥मत्तएवेतितान्विद्धि
नत्वहंतेषुतेमयि॥१२॥त्रिभिर्गुणमयैर्भावैरे
भिःसर्वमिदंजगत॥मोहितंनाभिजानाति

मामेभ्यःपरमव्ययं॥१३॥दैवीह्येषागुणम
यीमममायादुरत्यया॥ मामेवयेप्रपद्यंते
मायामेतांतरंतिते॥१४॥नमांदुःकृतिनो
मूढाःप्रपद्यंतेनराधमाः॥ माययापहृतज्ञा
नाआसुरंभावमाश्रिताः॥१५॥चतुर्विधाभ
जंतेमांजनाःसुकृतिनोर्जुन॥ आर्तोजिज्ञासु
रर्थार्थीज्ञानीचभरतर्षभ॥१६॥ तेषांज्ञानी

श्री॰
गी॰
४८

नित्ययुक्तएकभक्तिर्विशिष्यते॥ प्रियोहिज्ञानिनो
ऽत्यर्थमहंसचममप्रियः॥१७॥ उदाराःसर्वएवै
तेज्ञानीत्वात्मैवमेमतं॥ आस्थितःसहियुक्ता
त्मामामेवानुत्तमांगतिं॥१८॥ बहूनांजन्मना
मंतेज्ञानवान्मांप्रपद्यते॥ वासुदेवःसर्वमिति
सममहात्मासुदुर्लभः॥१९॥ कामैस्तैस्तै
र्हृतज्ञानाःप्रपद्यंतेन्यदेवताः॥ तंतंनियममा

स्थायप्रकृत्यानियताःस्वयाः॥२०॥योयोयांयां
तनुंभक्तःश्रद्धयार्चितुमिछति॥ तस्यतस्याचलां
श्रद्धांतामेवविदधाम्यहं॥२१॥सतयाश्रद्धयायु
क्तस्तस्याराधनमीहते॥ लभतेचततःकामान्मयै
वविहितान्हितान्॥२२॥ अंतवंतुफलंतेषांतद्भ
वत्यल्पमेधसां॥ देवान्देवयजोयांतिमद्भक्तायां
तिमामपि॥२३॥ अव्यक्तंव्यक्तिमापन्नंमन्यंतेमा

श्री. गी. ४९

मबुद्धय: ॥ परं भावमजानंतो ममाव्ययमनुत्तमं
२४ ॥ नाहं प्रकाश: सर्वस्य योगमायासमावृत:
मूढोयं नाभिजानाति लोको मामजमव्ययं ॥
२५ ॥ वेदाहं समतीतानि वर्तमानानि चार्जुन ॥ भ
विष्याणि च भूतानि मां तु वेद न कश्चन ॥ २६ ॥ इच्छा
द्वेषसमुत्थेन द्वंद्वमोहेन भारत ॥ सर्वभूतानि सं
मोहं सर्गे यांति परंतप ॥ २७ ॥ येषां त्वंतगतं पापं

जनानांपुण्यकर्मणां ।। तेद्वंद्वमोहनिर्मुक्ताभजं
तेमांदृढव्रता: ।।२८।। जरामरणमोक्षायमामाश्रि
त्ययतंतिये ।। तेब्रह्मतद्विदु:कृत्स्नमध्यात्मंकर्म
चाखिलं ।।२९।। साधिभूताधिदैवंमांसाधियज्ञंच
येविदु: ।। प्रयाणकालेपिचमांतेविदुर्युक्तचेत
स: ।। ३० ।। इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्म
विद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेज्ञानविज्ञा

श्री गी. ५०

ने योगोनामसप्तमोध्यायः ॥७॥ अर्जुन उवाच ॥
किंतद्ब्रह्मकिमध्यात्मंकिंकर्मपुरुषोत्तम ॥ अधि
भूतंचकिंप्रोक्तमधिदैवंकिमुच्यते ॥१॥ अधियज्ञः
कथंकोत्रदेहेस्मिन्मधुसूदन ॥ प्रयाणकालेच
कथंज्ञेयोसिनियतात्मभिः ॥२॥ श्रीभगवानुवा
च ॥ अक्षरंब्रह्मपरमंस्वभावोध्यात्ममुच्यते ॥ भू
तभावोद्भवकरोविसर्गःकर्मसंज्ञितः ॥३॥ अधि

भूतंक्षरोभाव:पुरुषश्चाधिदैवतं॥ अधियज्ञोह
मेवात्रदेहेदेहभृतांवर॥४॥ अंतकालेचमामे
वस्मरन्मुक्त्वाकलेवरं॥ य:प्रयातिसमद्भावं
यातिनास्त्यत्रसंशय:॥५॥ यंयंवापिस्मरन्भा
वंत्यजत्यंतेकलेवरं॥ तंतमेवैतिकौंतेयसदा
तद्भावभावित:॥६॥ तस्मात्सर्वेषुकालेषु
मामनुस्मरयुध्यच॥ मय्यर्पितमनोबुद्धिर्मामे

वैष्यस्यसंशयः ॥७॥ अभ्यासयोगयुक्तेन चेतसा
नान्यगामिना ॥ परमं पुरुषं दिव्यं याति पार्थानु
चिंतयन् ॥८॥ कविं पुराणमनुशासितारं ॥ म
णोरणीयांसमनुस्मरेद्यः ॥ सर्वस्य धातारमचिंत्य
रूप ॥ मादित्यवर्णं तमसः परस्तात् ॥९॥ प्रया
णकाले मनसाचलेन ॥ भक्त्यायुक्तो योगब
लेन चैव ॥ भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् ॥ स

तंपरंपुरुषमुपैतिदिव्यं ॥१०॥ यदक्षरंवेदविदोवदंति
विशंतियद्यतयोवीतरागाः ॥ यदिच्छंतोब्रह्मच
र्यंचरंतितत्तेपदंसंग्रहेणप्रवक्ष्ये ॥११॥ सर्वद्वाराणि
संयम्यमनोहृदिनिरुध्यच ॥ मूर्ध्न्याधायात्मनःप्रा
णमास्थितोयोगधारणां ॥१२॥ ओमित्येकाक्षरंब्र
ह्मव्याहरन्मामनुस्मरन् ॥ यःप्रयातित्यजन्देहंस
यातिपरमांगतिं ॥१३॥ अनन्यचेताःसततंयोमां

श्री
गी
५२

स्मरति नित्यशः ॥ तस्याहं सुलभः पार्थ नित्ययुक्तस्य
योगिनः ॥१४॥ मामुपेत्य पुनर्जन्म दुःखालयमशा
श्वतं ॥ नाप्नुवंति महात्मानः संसिद्धिं परमां गताः
१५॥ आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ॥
मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते ॥१६॥ सह
स्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः ॥ रात्रिं युगस
हस्रांतां तेऽहोरात्रविदो जनाः ॥१७॥ अव्यक्ताद्

क्तयः सर्वाः प्रभवंत्यहरागमे ॥ रात्र्यागमे प्रलीयंते
तत्रैवाव्यक्तसंज्ञके ॥ १८ ॥ भूतग्रामः स एवायं भूत्वा
भूत्वा प्रलीयते ॥ रात्र्यागमेवशः पार्थ प्रभवंत्यह
रागमे ॥ १९ ॥ परस्तस्मात्तु भावोन्योव्यक्तोव्यक्ता
त्सनातनः ॥ यः स सर्वेषु भूतेषु नश्यत्सु न विनश्य
ति ॥ २० ॥ अव्यक्तोक्षर इत्युक्तस्तमाहुः परमां ग
तिं ॥ यं प्राप्य न निवर्तंते तद्धाम परमं मम ॥ २१ ॥ पुरु

षःसपरःपार्थभक्त्यालभ्यस्त्वनन्यया॥यस्यांतःस्था
निभूतानियेनसर्वमिदंततं॥२२॥यत्रकालेत्वना
वृत्तिमावृत्तिंचैवयोगिनः॥प्रयातायांतितंकालं
वक्ष्यामिभरतर्षभ॥२३॥अग्निर्ज्योतिरहःशुक्लः
षण्मासाउत्तरायणं॥तत्रप्रयातागच्छंतिब्रह्मब्र
ह्मविदोजनाः॥२४॥धूमोरात्रिस्तथाकृष्णःषण्मा
सादक्षिणायनं॥तत्रचांद्रमसंज्योतिर्योगीप्राप्य

निवर्त्तते ॥२५॥ शुक्लकृष्णे गती ह्येते जगतः शाश्व
ते मते ॥ एकया यात्यनावृत्तिमन्ययावर्त्तते पु
नः ॥२६॥ नैते सृती पार्थ जानन्योगी मुह्यति क
श्चन ॥ तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जु
न ॥२७॥ वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्य
फलं प्रदिष्टं ॥ अत्येति तत्सर्वमिदं विदित्वा यो
गी परं स्थानमुपैति चाद्यं ॥२८॥ इति श्रीभगवद्गी

श्री॰
गी॰
५८

तासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णा
र्जुनसंवादेअक्षरब्रह्मयोगोनामाष्टमोऽध्यायः॥८
श्रीभगवानुवाच॥ इदंतुतेगुह्यतमंप्रवक्ष्याम्य
नसूयवे॥ ज्ञानंविज्ञानसहितंयज्ज्ञात्वामोक्ष्यसे
ऽशुभात्॥१॥ राजविद्याराजगुह्यंपवित्रमिदमु
त्तमं॥ प्रत्यक्षावगमंधर्म्यंसुसुखंकर्तुमव्ययं॥
२॥ अश्रद्दधानाःपुरुषाधर्मस्यास्यपरंतप॥ अप्र

प्राप्य मां निवर्तंते मृत्युसंसारवर्त्मनि ॥३॥ मया
ततमिदं सर्वं जगदव्यक्तमूर्तिना ॥ मत्स्थानि
सर्वभूतानि न चाहं तेष्ववस्थितः ॥४॥ न च मत्स्था
नि भूतानि पश्य मे योगमैश्वरं ॥ भूतभृन्न च भूत
स्थो ममात्मा भूतभावनः ॥५॥ यथाकाशस्थि
तो नित्यं वायुः सर्वत्रगो महान् ॥ तथा सर्वाणि
भूतानि मत्स्थानीत्युपधारय ॥६॥ सर्वभूतानि

कौंतेयप्रकृतिंयांतिमामिकां॥ कल्पक्षयेपुन
स्तानिकल्पादौविसृजाम्यहं॥ प्रकृतिंस्वाम
वष्टभ्यविसृजामिपुनःपुनः॥ भूतग्राममिमं
कृत्स्नमवशंप्रकृतेर्वशात॥८॥ नचमांतानि
कर्माणिनिबध्नंतिधनंजय॥ उदासीनवदा
सीनमसक्तंतेषुकर्मसु॥९॥ मयाध्यक्षेण
प्रकृतिःसूयतेसचराचरं॥ हेतुनानेनकौंते

यनजगद्विपरिवर्त्तते ॥१०॥ अवजानंतिमांमूढामा
नुषींतनुमाश्रितं ॥ परंभावमजानंतोममभूतम
हेश्वरं ॥११॥ मोघाशामोघकर्माणोमोघज्ञाना
विचेतसः ॥ राक्षसीमासुरींचैवप्रकृतिंमोहि
नींश्रिताः ॥१२॥ महात्मानस्तुमांपार्थदैवींप्र
कृतिमाश्रिताः ॥ भजंत्यनन्यमनसोज्ञात्वा
भूतादिमव्ययं ॥१३॥ सततंकीर्त्तयंतोमांयतं

नश्चदृढव्रताः॥नमस्यंतश्चमांभक्त्यानित्ययुक्ता
उपासते॥१४॥ज्ञानयज्ञेनचाप्यन्येयजंतोमा
मुपासते॥एकत्वेनपृथक्त्वेनबहुधाविश्वतो
मुखं॥१५॥अहंक्रतुरहंयज्ञःस्वधाहमहमौ
षधं॥मंत्रोहमहमेवाज्यमहमग्निरहंहुतं॥१६॥
पितामहस्यजगतोमाताधातापितामहः॥वे
द्यंपवित्रमोंकारऋक्सामयजुरेवच॥१७॥ग

तिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत ॥ प्र
भवः प्रलयः स्थानं निधानं बीजमव्ययं ॥ १८ ॥ त
पाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ॥ अमृ
तं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९ ॥ त्रैविद्या
मां सोमपाः पूतपापा ॥ यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थ
यंते ॥ ते पुण्यमासाद्य सुरेंद्रलोकं ॥ मश्नंति दि
व्यान्दिवि देवभोगान् ॥ २० ॥ ते तं भुक्त्वा स्वर्गलो

श्री·
गी·
५०

केविशालं ॥ क्षीणेपुण्येमर्त्यलोकंविशंति ॥ ए
वंत्रयीधर्ममनुप्रपन्नागतागतंकामकामालभं
ते ॥ २१ ॥ अनन्याश्चिंतयंतोमांयेजनाःपर्युपा
सते ॥ तेषांनित्याभियुक्तानांयोगक्षेमंवहा १
म्यहं ॥ २२ ॥ येप्यन्यदेवताभक्तायजंतेश्रद्धया १
न्विताः ॥ तेपिमामेवकौंतेययजंत्यविधिपू १
र्वकं ॥ २३ ॥ अहंहिसर्वयज्ञानांभोक्ताचप्रभुरे १

व च नतुमामभिजानंतितत्वेनातश्चवंतिते ॥ २४ ॥
यांतिदेवव्रतादेवान्पितृन्यांतिपितृव्रताः ॥ भूता-
नियांतिभूतेज्यायांतिमद्याजिनोपिमां ॥ २५ ॥ प
त्रंपुष्पंफलंतोयंयोमेभक्त्याप्रयच्छति ॥ तदहंभ
क्त्युपहृतमश्नामिप्रयतात्मनः ॥ २६ ॥ यत्करोषि
यदश्नासियज्जुहोषिददासियत् ॥ यत्तपस्य-
सिकौंतेयतत्कुरुष्वमदर्पणं ॥ २७ ॥ शुभाशु

श्री॰
गी॰
२८

भफलैरेवंमोक्ष्यसेकर्मबंधनैः॥संन्यासयोग
युक्तात्माविमुक्तोमामुपैष्यसि॥२८॥समोहंस
र्वभूतेषुनमेद्वेष्योस्तिनप्रियः॥येभजंतितु
मांभक्त्यामयितेतेषुचाप्यहं॥२९॥अपिचे
त्सुदुराचारोभजतेमामनन्यभाक्॥साधुरेवस
मंतव्यःसम्यग्व्यवसितोहिसः॥३०॥क्षिप्रं
भवतिधर्मात्माशश्वच्छांतिंनिगच्छति॥कौंते

यप्रतिजानीहिनमेभक्तःप्रणश्यति॥३१॥मांहि
पार्थव्यपाश्रित्ययेपिस्युःपापयोनयः॥स्त्रियोवै
श्यास्तथाशूद्रास्तेपियांतिपरांगतिं॥३२॥किं
पुनर्ब्राह्मणाःपुण्याभक्ताराजर्षयस्तथा॥अ
नित्यमसुखंलोकमिमंप्राप्यभजस्वमां॥३३॥म
न्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु॥मामेवै
ष्यसियुक्त्वैवमात्मानंमत्परायणः॥३४॥श्री

श्री. गी. ५५

भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशा
स्त्रे श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो
नाम नवमोऽध्यायः ॥ ९ ॥ श्रीभगवानुवाच ॥
भूय एव महाबाहो शृणु मे परमं वचः ॥ यत्तेऽहं
प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥ १ ॥ न मे वि
दुः सुरगणाः प्रभवं न महर्षयः ॥ अहमादिर्हि दे
वानां महर्षीणां च सर्वशः ॥ २ ॥ यो मामजमना

दिंचवेत्तिलोकमहेश्वरं॥ असंमूढःसमर्त्येषुसर्व
पापैःप्रमुच्यते॥३॥ बुद्धिर्ज्ञानमसंमोहःक्षमा
सत्यंदमःशमः॥ सुखंदुःखंभवोभावोभयंचा
भयमेवच॥४॥ अहिंसासमतातुष्टिस्तपोदानं
यशोयशः॥ भवंतिभावाभूतानांमत्तएवपृ
थग्विधाः॥५॥ महर्षयःसप्तपूर्वेचत्वारोमन
वस्तथा॥ मद्भावामानसाजातायेषांलोकइ

श्री
गी
१०

मात्मना॥६॥ एतां विभूतियोगं च मम यो वेत्ति तत्व
तः॥ सो विकंपेन योगेन युज्यते नात्र संशयः॥७॥
अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते॥ इति मत्
त्वा भजंते मां बुधा भावसमन्विताः॥८॥ मच्चि
त्ता मद्गतप्राणा बोधयंतः परस्परं॥ कथयंतश्च
मां नित्यं तुष्यंति च रमंति च॥९॥ तेषां सततयु
क्तानां भजतां प्रीतिपूर्वकं॥ ददामि बुद्धियोगं

तंयेनमामुपयांतिते ॥१०॥ तेषामेवानुकंपार्थ
महमज्ञानजंतमः । नाशयाम्यात्मभावस्थोज्ञा
नदीपेनभास्वता ॥११॥ अर्जुन उवाच ॥ परंब्रह्म
परंधामपवित्रंपरमंभवान् । पुरुषंशाश्वतंदि
व्यमादिदेवमजंविभुं ॥१२॥ आहुस्त्वामृषयःसर्वे
देवर्षिर्नारदस्तथा । असितोदेवलोव्यासःस्व
यंचैवब्रवीषिमे ॥१३॥ सर्वमेतदृतंमन्येयन्मांव

दसिकेशव॥ नहितेभगवान्व्यक्तिंविदुर्देवान
दानवाः॥१४॥ स्वयमेवात्मनात्मानंवेत्थत्वंपुरु
षोत्तम॥ भूतभावनभूतेशदेवदेवजगत्पते॥१५॥
वक्तुमर्हस्यशेषेणदिव्याह्यात्मविभूतयः॥ या
भिर्विभूतिभिर्लोकानिमांस्त्वंव्याप्यतिष्ठसि॥
१६॥ कथंविद्यामहंयोगिंस्त्वांसदापरिचिंतय
न्॥ केषुकेषुचभावेषुचिंत्योसिभगवन्मया॥१७॥ वि

मया

स्तरेणात्मनो योगिं विभूतिं च जनार्दन ॥ भूयः क-
थय तृप्तिर्हि शृण्वतो नास्ति मे मृतं ॥ १८ ॥ श्री
भगवानुवाच ॥ हंत ते कथयिष्यामि दिव्या ह्या-
त्मविभूतयः ॥ प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो
विस्तरस्य मे ॥ १९ ॥ अहमात्मा गुडाकेश सर्व-
भूताशयस्थितः ॥ अहमादिश्च मध्यं च भूता-
नामंत एव च ॥ २० ॥ आदित्यानामहं विष्णुर्ज्यो-

तिषांरविरंशुमान् ॥ मरीचिर्मरुतामस्मिनक्षत्रा
णामहंशशी ॥ २१ ॥ वेदानांसामवेदोस्मिदेवाना
मस्मिवासवः ॥ इंद्रियाणांमनश्चास्मिभूताना
मस्मिचेतना ॥ २२ ॥ रुद्राणांशंकरश्चास्मिवि
त्तेशोयक्षरक्षसां ॥ वसूनांपावकश्चास्मिमेरुः
शिखरिणामहं ॥ २३ ॥ पुरोधसांचमुख्यंमांवि
द्धिपार्थबृहस्पतिं ॥ सेनानीनामहंस्कंदःस

रसामस्मिसागरः॥२४॥ महर्षीणांभृगुरहंगि
रामस्म्येकमक्षरं॥ यज्ञानांजपयज्ञोस्मिस्थाव
राणांहिमालयः॥२५॥ अश्वत्थःसर्ववृक्षाणां
देवर्षीणांचनारदः॥ गंधर्वाणांचित्ररथःसिद्धा
नांकपिलोमुनिः॥२६॥ उच्चैःश्रवसमश्वानांवि
द्धिमामम्रुतोद्भवं॥ ऐरावतंगजेंद्राणांनराणांच
नराधिपः॥२७॥ आयुधानामहंवज्रंधेनूनाम

स्मिकामधुक॥ प्रजनश्चास्मिकंदर्पःसर्पाणाम
स्मिवासुकिः॥२८॥ अनंतश्चास्मिनागानांवरु
णोयादसामहं॥ पितॄणामर्यमाचास्मियमः
संयमतामहं॥२९॥ प्रह्लादश्चास्मिदैत्यानांका
लःकलयतामहं॥ मृगाणांचमृगेंद्रोहंवैनते
यश्चपक्षिणां॥३०॥ पवनःपवतामस्मिरामःश
स्त्रभृतामहं॥ झषाणांमकरश्चास्मिस्रोतसाम

स्मिजान्हवी ॥३१॥ सर्गाणामादिरंतश्चमध्यंचैवा
हमर्जुन ॥ अध्यात्मविद्याविद्यानांवादःप्रवदता
महं ॥३२॥ अक्षराणामकारोस्मिद्वंद्वःसामासि
कस्यच ॥ अहमेवाक्षयःकालोधाताहंविश्वतो
मुखः ॥३३॥ मृत्युःसर्वहरश्चाहमुद्भवश्चभविष्य
तां ॥ कीर्तिःश्रीर्वाक्चनारीणांस्मृतिर्मेधाधृतिः
क्षमा ॥३४॥ बृहत्सामतथासाम्नांगायत्रीछं

द्रसामहं ॥ मासानांमार्गशीर्षोहमृतूनांकुसुमा
करः ॥३५॥ द्यूतंछलयतामस्मितेजस्तेजस्विना
महं ॥ जयोस्मिव्यवसायोस्मिसत्वंसत्ववताम
हं ॥३६॥ वृष्णीनांवासुदेवोस्मिपांडवानांधनंज
यः ॥ मुनीनामप्यहंव्यासः कवीनामुशनाकवि
ः ॥३७॥ दंडोदमयतामस्मिनीतिरस्मिजिगीषतां
मौनंचैवास्मिगुह्यानांज्ञानंज्ञानवतामहं ॥३८॥

यच्चापिसर्वभूतानांबीजंतदहमर्जुन॥ नतद
स्तिविनायत्स्यान्मयाभूतंचराचरं॥३९॥ नांतो
स्तिममदिव्यानांविभूतीनांपरंतप॥ एषतूद्देश
तःप्रोक्तोविभूतेर्विस्तरोमया॥४०॥ यद्यद्विभू
तिमत्सत्वंश्रीमदूर्जितमेववा॥ तत्तदेवावगच्छ
त्वंममतेजोंशसंभवं॥४१॥ अथवाबहुनैतेन
किंज्ञातेनतवार्जुन॥ विष्टभ्याहमिदंकृत्स्नमे

श्री॰
गी॰
६८

कांशेन स्थितो जगत् ॥४२॥ इति श्रीभगवद्गीतासू
पनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसं
वादे विभूतियोगो नाम दशमोऽध्यायः ॥१०॥ अर्जुन
उवाच ॥ मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितं
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥१॥
भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ॥
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययं ॥२॥





एवमेतद्यथात्थत्वमात्मानंपरमेश्वरं॥द्रष्टुमि
च्छामितेरूपमैश्वरंपुरुषोत्तम॥३॥मन्यसेयदित
च्छक्यंमयाद्रष्टुमितिप्रभो॥योगेश्वरततोमेत्वं
दर्शयात्मानमव्ययं॥४॥श्रीभगवानुवाच॥
पश्यमेपार्थरूपाणिशतशोथसहस्रशः॥ना
नाविधानिदिव्यानिनानावर्णाकृतीनिच॥५
पश्यादित्यान्वसून्रुद्रानश्विनौमरुतस्तथा

श्री॰
गी॰
६५

बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ६ ॥ इ
हैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरं ॥ मम दे
हे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ७ ॥ न तु मां
शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ॥ दिव्यं ददामि ते
चक्षुः पश्य मे योगमैश्वरं ॥ ८ ॥ संजय उवाच ॥ ए
वमुक्त्वा ततो राजन्महायोगेश्वरो हरिः ॥ दर्शया
मास पार्थाय परमं रूपमैश्वरं ॥ ९ ॥ अनेक

वक्त्रनयनमनेकाद्भुतदर्शनं ॥ अनेकदिव्या-
भरणंदिव्यानेकोद्यतायुधं ॥१०॥ दिव्यमाल्यां-
बरधरंदिव्यगंधानुलेपनं ॥ सर्वाश्चर्यमयंदेव-
मनंतंविश्वतोमुखं ॥११॥ दिविसूर्यसहस्रस्य
भवेद्युगपदुत्थिता ॥ यदिभाःसदृशीसास्या-
द्भासस्तस्यमहात्मनः ॥१२॥ तत्रैकस्थंजगत्कृ-
त्स्नंप्रविभक्तमनेकधा ॥ अपश्यद्देवदेवस्यश-

श्री·
गी·
९९

रीरेपांडवस्तदा॥१३॥ ततःसविस्मयाविष्टो
हृष्टरोमाधनंजय॥ प्रणम्यशिरसादेवंकृतां
जलिरभाषत॥१४॥ अर्जुनउवाच॥ पश्यामि
देवांस्तवदेवदेहे सर्वांस्तथाभूतविशेषसंघा
न्॥ ब्रह्माणमीशंकमलासनस्थमृषींश्चसर्वा
नुरगांश्चदिव्यान॥१५॥ अनेकबाहूदरवक्त्रने
त्रंपश्यामित्वांसर्वतोनंतरूपं॥ नांतंनमध्यंन

पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूपं॥ १६॥
किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो
दीप्तमंतं॥ पश्यामि त्वां दुर्निरीक्ष्यं समंताद्दी
प्तानलार्कद्युतिमप्रमेयं॥ १७॥ त्वमक्षरं पर
मं वेदितव्यं त्वमस्य विश्वस्य परं निधानं॥ त्व
मव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो म
तो मे॥ १८॥ अनादिमध्यांतमनंतवीर्यमनं

श्री॰
गी॰
६०

नंतबाहुं शशिसूर्यनेत्रं ॥ पश्यामि त्वां दीप्तहु
ताशवक्त्रं स्वतेजसा विश्वमिदं तपंतं ॥१९॥ द्या
वापृथिव्योरिदमंतरं हि व्याप्तं त्वयैकेन दि
शश्च सर्वाः ॥ दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लो
कत्रयं प्रव्यथितं महात्मन् ॥२०॥ अमी हि
त्वां सुरसंघा विशंति केचिद्भीता प्रांजलयो
गृणंति ॥ स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तु

वंतित्वांस्तुतिभिःपुष्कलाभिः॥२१॥रुद्रादि
त्यावसवोयेचसाध्याविश्वेश्विनौमरुतश्चोष्म
पाश्च॥गंधर्वयक्षासुरसिद्धसंघावीक्षंतेत्वां
विस्मिताश्चैवसर्वे॥२२॥रूपंमहत्तेबहुवक्त्रने
त्रंमहाबाहोबहुबाहूरुपादं॥बहूदरंबहु
दंष्ट्राकरालंदृष्ट्वालोकाःप्रव्यथितास्तथाहं
२३॥नभःस्पृशंदीप्तमनेकवर्णंव्यात्ताननं

श्री·
गी·
६८

दीप्तविशालनेत्रं ॥ दृष्ट्वा हि त्वां प्रव्यथितांत
रात्मा धृतिं न विंदामि शमं च विष्णो ॥ २४ ॥ दं
ष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसं
निभानि ॥ दिशो न जाने न लभे च शर्म प्रसी
द देवेश जगन्निवास ॥ २५ ॥ अमी च त्वां धृत
राष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः ॥ भी
ष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैर

पियोधमुख्यैः॥२६॥ वक्त्राणितेत्वरमाणाविशंति
दंष्ट्राकरालानिभयानकानि॥ केचिद्विलग्नाद
शनांतरेषुसंदृश्यंतेचूर्णितैरुत्तमांगैः॥२७॥
यथानदीनांबहवोंबुवेगाःसमुद्रमेवाभिमु
खाद्रवंति॥ तथातवामीनरलोकवीराविशं
तिवक्त्राण्यभिविज्वलंति॥२८॥ यथाप्रदीप्तं
ज्वलनंपतंगाविशंतिनाशायसमृद्धवेगाः

श्री. गी. ६८

थैवनाशायविशंतिलोकास्तवापिवक्त्राणिस
मृद्धवेगाः॥२९॥लेलिह्यसेग्रसमानःसमंताल्लो
कान्समग्रान्वदनैर्ज्वलद्भिः॥तेजोभिरापूर्यज
गत्समग्रंभासस्तवोग्राःप्रतपंतिविष्णो॥३०॥
आख्याहिमेकोभवानुग्ररूपोनमोस्तुतेदेवव
रप्रसीद॥विज्ञातुमिच्छामिभवंतमाद्यं नहि
प्रजानामितवप्रवृत्तिं॥३१॥श्रीभगवानुवाच॥

कालोस्मिलोकक्षयकृत्प्रवृद्धोलोकान्समाहृ
र्तुमिहप्रवृत्तः॥ ऋतेपित्वांनभविष्यंतिसर्वे
येवस्थिताःप्रत्यनीकेषुयोधाः॥३२॥ तस्मा
त्वमुत्तिष्ठयशोलभस्वजित्वाशत्रून्भुंक्ष्वरा
ज्यंसमृद्धं॥ मयैवैतेनिहताःपूर्वमेवनिमि
त्तमात्रंभवसव्यसाचिन्॥३३॥ द्रोणंचभी
ष्मंचजयद्रथंचकर्णंतथान्यानपियोधवीरा

श्री. गी. ८०

न॥ मयाहतांस्त्वंजहिमाव्यथिष्ठायुध्यस्वजेतासि
रणेसपत्नान्॥३४॥ संजय उवाच॥ एतच्छ्रुत्वाव-
चनंकेशवस्यकृतांजलिर्वेपमानःकिरीटी॥ न-
मस्कृत्वाभूयएवाहकृष्णंसगद्गदंभीतभीतः-
प्रणम्य॥३५॥ अर्जुन उवाच॥ स्थानेहृषीकेश
तवप्रकीर्त्याजगत्प्रहृष्यत्यनुरज्यतेच॥ रक्षां-
सिभीतानिदिशोद्रवंतिसर्वेनमस्यंतिचसि-

द्धसंघा॥३६॥ कस्माच्चतेननमेरन्महात्मनगरी-
यसेब्रह्मणोप्यादिकर्त्रे॥ अनंतदेवेशजगन्नि-
वासत्वमक्षरंसदसत्तत्परंयत्॥३७॥त्वमादिदे-
वःपुरुषःपुराणस्त्वमस्यविश्वस्यपरंनिधानं॥
वेत्तासिवेद्यंचपरंचधामत्वयाततंविश्वमनंत-
रूप॥३८॥वायुर्यमोग्निर्वरुणःशशांकःप्रजाप-
तिस्त्वंप्रपितामहश्च॥ नमोनमस्तेस्तुसहस्रकृ-

श्रीः
गीः
७२

त्वः पुनश्चभूयोपिनमोनमस्ते ॥३९॥ नमः पुरस्ता
दथपृष्ठतस्तेनमोस्तुतेसर्वतएवसर्व ॥ अनंतं
वीर्यामितविक्रमस्त्वंसर्वंसमाप्नोषि[illegible]
ततोसिसर्वः ॥४०॥ सखेतिमत्वाप्रसभंयदुक्तं
हेकृष्णहेयादवहेसखेति ॥ अजानतामहिमा
नंतवेदंमयाप्रमादात्प्रणयेनवापि ॥४१॥ यच्चा
वहासार्थमसत्कृतोसिविहारशय्यासनभो

नेषु॥ एकोथवाप्यच्युततत्समक्षंतत्क्षा
मयेत्वामहमप्रमेयं॥४२॥ पितासिलोकस्य
चराचरस्यत्वमस्यपूज्यश्चगुरुर्गरीयान्॥ न
त्वत्समोस्त्यभ्यधिकः कुतोन्यो लोकत्रयेप्यप्र
तिमप्रभावः॥४३॥ तस्मात्प्रणम्यप्रणिधाय
कायंप्रसादयेत्वामहमीशमीड्यं॥ पितेवपु
त्रस्यसखेवसख्युः प्रियाप्रियायार्हसिदेवसो

श्री· गी· ७२

हं ॥४४॥ अदृष्टपूर्वं हृषितोस्मि दृष्ट्वा भयेन च
प्रव्यथितं मनो मे ॥ तदेव मे दर्शय देवरूपं प्र
सीद देवेश जगन्निवास ॥४५॥ किरीटिनं गदि
नं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव ॥ ते
नैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्व
मूर्ते ॥४६॥ श्रीभगवानुवाच ॥ मया प्रसन्नेन
तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् ॥ तेजो

मयंविश्वमनंतमाद्यंयन्मेत्वदन्येननदृष्टपूर्वं॥
४७॥ नवेदयज्ञाध्ययनैर्नदानैर्नचक्रियाभिर्न
तपोभिरुग्रैः॥ एवंरूपःशक्यअहंनृलोकेद्रष्टुं
त्वदन्येनकुरुप्रवीर॥४८॥ मातेव्यथामाचवि
मूढभावोदृष्ट्वारूपंघोरमीदृङ्ममेदं॥ व्यपेतभी
प्रीतमनाःपुनस्त्वंतदेवमेरूपमिदंप्रपश्य॥
४९॥ संजयउवाच॥ इत्यर्जुनंवासुदेवस्तथोक्त्वा

श्री. गी. ७२

स्वकंरूपंदर्शयामासभूयः॥ आश्वासयामास चभीतमेनंभूत्वापुनःसौम्यवपुर्महात्मा॥५०॥ अर्जुनउवाच॥ दृष्ट्वेदंमानुषंरूपंतवसौम्यंजनार्दन॥ इदानीमस्मिसंवृत्तःसचेताःप्रकृतिंगतः॥५१॥ श्रीभगवानुवाच॥ सुदुर्दर्शमिदंरूपंदृष्टवानसियन्मम॥ देवाअप्यस्यरूपस्यनित्यंदर्शनकांक्षिणः॥५२॥ नाहंवेदैर्नतपसा

रू५२

न दानेन न चेज्यया ॥ शक्य एवंविधो द्रष्टुं दृष्टवा-
नसि मां यथा ॥ ५३ ॥ भक्त्या त्वनन्यया शक्य अह-
मेवंविधोऽर्जुन ॥ ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परं-
तप ॥ ५४ ॥ मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जि-
तः ॥ निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥
५५ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्वरूपद-

श्री गी. ७४

र्शनयोगोनामैकादशोध्यायः॥११॥ अर्जुनउवाच॥ एवंसततयुक्तायेभक्तास्त्वांपर्युपासते॥ येचाप्यक्षरमव्यक्तंतेषांकेयोगवित्तमाः॥१॥ श्रीभगवानुवाच॥ मय्यावेश्यमनोयेमांनित्ययुक्ताउपासते॥ श्रद्धयापरयोपेतास्तेमेयुक्ततमामताः॥२॥ येत्वक्षरमनिर्देश्यमव्यक्तंपर्युपासते॥ सर्वत्रगमचिंत्यंचकूटस्थमचलं

ध्रुवं ॥ ३ ॥ संनियम्येंद्रियग्रामं सर्वत्र समबुद्ध
यः ॥ ते प्राप्नुवंति मामेव सर्वभूतहिते रताः ॥
क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसां
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५ ॥
ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः
अनन्येनैव योगेन मां ध्यायंत उपासते ॥ ६ ॥ ते
षामहं समुद्धर्त्ता मृत्युसंसारसागरात् ॥ भवा

मिनचिरात्पार्थमय्यावेशितचेतसां ॥७॥ मय्ये
वमनआधत्स्वमयिबुद्धिंनिवेशय ॥ निवसि
ष्यसिमय्येवअतऊर्ध्वंनसंशयः ॥८॥ अथचि
त्तंसमाधातुंनशक्नोषिमयिस्थिरं ॥ अभ्यास
योगेनततोमामिच्छाप्तुंधनंजय ॥९॥ अभ्यासे
प्यसमर्थोसिमत्कर्मपरमोभव ॥ मदर्थम
पिकर्माणिकुर्वन्सिद्धिमवाप्स्यसि ॥१०॥ अथै

थैतदप्यसक्तोसिकर्तुंमद्योगमाश्रितः॥ स
र्वकर्मफलत्यागंततःकुरुयतात्मवान्॥११॥ श्रे
योहिज्ञानमभ्यासाज्ज्ञानाद्ध्यानंविशिष्यते
ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनंतरं
॥१२॥ अद्वेष्टासर्वभूतानांमैत्रःकरुणएवच॥ नि
र्ममोनिरहंकारःसमदुःखसुखःक्षमी॥१३॥
संतुष्टःसततंयोगीयतात्मादृढनिश्चयः॥ म

श्री॰
गी॰
७८

य्यर्पितमनोबुद्धिर्योमद्भक्तःसमेप्रियः ॥१४॥ य
स्मान्नोद्विजतेलोकोलोकान्नोद्विजतेचयः ॥ ह
र्षामर्षभयोद्वेगैर्मुक्तोयःसचमेप्रियः ॥१५॥ अ
नपेक्षःशुचिर्दक्षउदासीनोगतव्यथः ॥ सर्वा
रंभपरित्यागीयोमद्भक्तःसमेप्रियः ॥१६॥ यो
नहृष्यतिनद्वेष्टिनशोचतिनकांक्षति ॥ शुभा
शुभपरित्यागीभक्तिमान्यःसमेप्रियः ॥१७॥ सम

मः शत्रौचमित्रेचतथामानापमानयोः।शी
तोष्णसुखदुःखेषुसमःसंगविवर्जितः॥१८॥
तुल्यनिंदास्तुतिर्मौनीसंतुष्टोयेनकेनचित्॥
अनिकेतःस्थिरमतिर्भक्तिमान्मेप्रियोनरः
१९॥ येतुधर्मामृतमिदंयथोक्तंपर्युपासते॥
श्रद्दधानामत्परमाभक्तास्तेतीवमेप्रियः॥२०
इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायां

श्री· गी· ७७

योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगोना
म द्वादशोध्यायः ॥१२॥ अर्जुन उवाच ॥ प्रकृ
तिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च ॥ एतद्वेदितुमि
च्छामि ज्ञानं ज्ञेयं च केशव ॥१॥ श्रीभगवानुवा
च इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते ॥ एतद्यो
वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥२॥ क्षेत्रज्ञं चा
पि मां विद्धि सर्वक्षेत्रेषु भारत ॥ क्षेत्रक्षेत्रज्ञयो

र्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ ३ ॥ तत्क्षेत्रं यच्च यादृ ८
क्च यद्विकारि यतश्च यत् ॥ स च यो यत्प्रभावश्च
तत्समासेन मे शृणु ॥ ४ ॥ ऋषिभिर्बहुधा गी
तं छंदोभिर्विविधैः पृथक् ॥ ब्रह्मसूत्रपदैश्चैव
हेतुमद्भिर्विनिश्चितैः ॥ ५ ॥ महाभूतान्यहंका
रो बुद्धिरव्यक्तमेव च ॥ इंद्रियाणि दशैकं च पं
च चेंद्रियगोचराः ॥ ६ ॥ इच्छा द्वेषः सुखं दुःखं सं

श्री· गी·
७१

ताश्चेतनाधृतिः॥ एतत्क्षेत्रंसमासेनसविकार
मुदाहृतं॥७॥ अमानित्वमदंभित्वमहिंसाक्षां
तिरार्जवं॥ आचार्योपासनंशौचंस्थैर्यमा
त्मविनिग्रहः॥८॥ इंद्रियार्थेषुवैराग्यमनहंका
रमेवच॥ जन्ममृत्युजराव्याधिदुःखदोषानुद
र्शनं॥९॥ असक्तिरनभिष्वंगःपुत्रदारगृहादि
षु॥ नित्यंचसमचित्तत्वमिष्टानिष्टोपपत्तिषु

मयिचानन्ययोगेनभक्तिरव्यभिचारिणी ॥ १
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ ११ ॥
अध्यात्मज्ञाननित्यत्वंतत्वज्ञानार्थदर्शनं ॥ ए
तज्ज्ञानमितिप्रोक्तमज्ञानंयदतोन्यथा ॥ १२ ॥
ज्ञेयंयत्तत्प्रवक्ष्यामियज्ज्ञात्वामृतमश्नुते ॥ अ
नादिमत्परंब्रह्मनसत्तन्नासदुच्यते ॥ १३ ॥ स
र्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखं ॥ स

श्री
गी
७५

र्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १४ ॥ स
र्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं ॥ असक्तं
सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १५ ॥ बहिरंत
श्च भूतानामचरं चरमेव च ॥ सूक्ष्मत्वात्तदवि
ज्ञेयं दूरस्थं चांतिके च तत् ॥ १६ ॥ अविभक्तं च
भूतेषु विभक्तमिव च स्थितं ॥ भूतभर्तृ च तज्ज्ञे
यं ग्रसिष्णु प्रभविष्णु च ॥ १७ ॥ ज्योतिषामपि त

ज्योतिस्तमसः परमुच्यते॥ ज्ञानंज्ञेयंज्ञानग
म्यंहृदिसर्वस्यधिष्टितं॥१८॥ इतिक्षेत्रंतथा
ज्ञानंज्ञेयंचोक्तंसमासतः॥ मद्भक्तएतद्विज्ञा
यमद्भावायोपपद्यते॥१९॥ प्रकृतिंपुरुषं
चैवविद्ध्यनादीउभावपि॥ विकारांश्चगुणां
श्चैवविद्धिप्रकृतिसंभवान्॥२०॥ कार्यका
रणकर्तृत्वेहेतुःप्रकृतिरुच्यते॥ पुरुषः

त:२

श्री
गी.
८०

सुखदुःखानांभोक्तृत्वेहेतुरुच्यते ।।२१।। पुरुषः
प्रकृतिस्थोहिभुंक्तेप्रकृतिजानगुणान ।। कार
णंगुणसंगोस्यसदसद्योनिजन्मसु ।।२२।। उप
द्रष्टानुमंताचभर्त्ताभोक्तामहेश्वरः ।। परमा
त्मेतिचाप्युक्तोदेहेस्मिन्पुरुषःपरः ।।२३।। यएवं
वेत्तिपुरुषंप्रकृतिंचगुणैःसह ।। सर्वथावर्त्त
मानोपिनसभूयोभिजायते ।।२४।। ध्यानेना

त्मनि पश्यंति केचिदात्मानमात्मना ॥ अन्ये
सांख्येन योगेन कर्मयोगेन चापरे ॥ २५ ॥ अ
न्येत्वेवमजानंतः श्रुत्वान्येभ्य उपासते ॥ तेपि
चातितरंत्येव मृत्युं श्रुतिपरायणाः ॥ २६ ॥ या
वत्संजायते किंचित्सत्वं स्थावरजंगमं ॥ क्षेत्रक्षे
त्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥ २७ ॥ समं स
र्वेषु भूतेषु तिष्ठंतं परमेश्वरं ॥ विनश्यत्स्व

२

विनश्यंतंयःपश्यतिसपश्यति ॥२७॥ समंप
श्यंहिसर्वत्रसमवस्थितमीश्वरं ॥ नहिनस्त्या
त्मनात्मानंततोयातिपरांगतिं ॥२८॥ प्रकृत्यै
वचकर्माणिक्रियमाणानिसर्वशः ॥ यःप
श्यतितथात्मानमकर्त्तारंसपश्यति ॥२९॥ यदाभू
तपृथग्भावमेकस्थमनुपश्यति ॥ ततए
वचविस्तारंब्रह्मसंपद्यतेतदा ॥३०॥ अनादि

त्वान्निर्गुणत्वात्परमात्मायमव्ययं॥ शरीरस्थो
पिकौंतेयनकरोतिनलिप्यते॥३२॥ यथासर्व
गतंसौक्ष्म्यादाकाशंनोपलिप्यते॥ सर्वत्राव
स्थितोदेहेतथात्मानोपलिप्यते॥३३॥ य
थाप्रकाशयत्येकः कृत्स्नंलोकमिमंरविः॥
क्षेत्रंक्षेत्रीतथाकृत्स्नंप्रकाशयतिभारत॥३४
क्षेत्रक्षेत्रज्ञयोरेवमंतरंज्ञानचक्षुषा॥ भूतप्र

श्री०
गी०
८२

कृतिमोक्षं च ये विदुर्यांति ते परं ॥३४॥ इति श्रीभ
गवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञदेयोगो नाम
त्रयोदशोऽध्यायः ॥१३॥ श्रीभगवानुवाच ॥ परं भू
यः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमं ॥ यज्ज्ञात्वा मु
नयः सर्वे परां सिद्धिमितो गता ॥१॥ इदं ज्ञानमु
पाश्रित्य मम साधर्म्यमागता ॥ सर्गेपि नोपजा

सि योगो

यंते प्रलयेनव्यथंतिच ॥२॥ ममयोनिर्महद्ब्रह्म
तस्मिन्गर्भंदधाम्यहं ॥ संभवःसर्वभूतानांततोभ
वतिभारत ॥३॥ सर्वयोनिषुकौंतेयमूर्तयःसंभ
वंतियाः ॥ तासांब्रह्ममहद्योनिरहंबीजप्रदः
पिता ॥४॥ सत्वंरजस्तमइतिगुणाःप्रकृतिसंभ
वः ॥ निबध्नंतिमहाबाहोदेहेदेहिनमव्ययं ॥५
तत्रसत्वंनिर्मलत्वात्प्रकाशकमनामयं ॥ सुख

श्री. गी. १३

संगेन बध्नाति ज्ञानसंगेन चानघ ॥६॥ रजो रागात्म
कं विद्धि तृष्णासंगसमुद्भवं ॥ तन्निबध्नाति कौंते
य कर्मसंगेन देहिनां ॥७॥ तमस्त्वज्ञानजं विद्धि
मोहनं सर्वदेहिनां ॥ प्रमादालस्यनिद्राभिस्त
न्निबध्नाति भारत ॥८॥ सत्वं सुखे संजयति रजः
कर्मणि भारत ॥ ज्ञानमावृत्य तु तमः प्रमादे
संजयत्युत ॥९॥ रजस्तमश्चाभिभूय सत्वं भवति

भारत॥रजःसत्वंतमश्चैवतमःसत्वंरजस्तथा
१०॥सर्वद्वारेषुदेहेस्मिनप्रकाशउपजायते॥
ज्ञानंयदातदाविद्याद्विवृद्धंसत्वमित्युत॥११॥
लोभःप्रवृत्तिरारंभःकर्मणामशमःस्पृहा
रजस्येतानिजायंतेविवृद्धेभरतर्षभ॥१२॥
अप्रकाशोप्रवृत्तिश्चप्रमादोमोहएवच॥त
मस्येतानिजायंतेविवृद्धेकुरुनंदन॥१३॥य

श्री॰
गी॰
८७

दासत्वे प्रवृद्धेतुप्रलयंयातिदेहभृत॥तदोत्तम
विदांल्लोकानमलान्प्रतिपद्यते॥१४॥रजसि
प्रलयंगत्वाकर्मसंगिषुजायते॥तथाप्रली
नस्तमसिमूढयोनिषुजायते॥१५॥कर्मणः
सुकृतस्याहुःसात्विकंनिर्मलंफलं॥रजस
स्तुफलंदुःखमज्ञानंतमसःफलं॥१६॥स
त्वात्संजायतेज्ञानंरजसोलोभएवच॥प्रमा

दमोहौतमसोभवतोज्ञानमेवच॥१६॥ ऊर्ध्वं
गच्छंतिसत्वस्थामध्येतिष्ठंतिराजसाः॥ जघ
न्यगुणवृत्तिस्थाअधोगच्छंतितामसाः॥१७॥
नान्यंगुणेभ्यःकर्त्तारंयदाद्रष्टानुपश्यति॥
गुणेभ्यश्चपरंवेत्तिमद्भावंसोधिगच्छति॥१८॥
गुणानेतानतीत्यत्रीन्देहीदेहसमुद्भवा
न्॥ जन्ममृत्युजरादुःखैर्विमुक्तोमृतमश्नु

श्री॰
गी॰
८५

ते॥ २०॥ अर्जुन उवाच॥ कैर्लिंगैस्त्रीन्गुणाने-
तानतीतो भवति प्रभो॥ किमाचारः कथं चैतां-
स्त्रीन्गुणानतिवर्तते॥ २१॥ श्रीभगवानुवा-
च॥ प्रकाशं च प्रवृत्तिं च मोहमेव च पांडव॥
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति॥ २२
उदासीनवदासीनो गुणैर्यो न विचाल्यते॥
गुणा वर्तंत इत्येव योवतिष्ठति नेंगते॥ २३॥

समदुःखसुखःस्वस्थःसमलोष्टाश्मकांच
नः॥ तुल्यप्रियाप्रियोधीरस्तुल्यनिंदात्मसं
स्तुतिः॥२३॥ मानापमानयोस्तुल्यस्तुल्यो
मित्रारिपक्षयोः॥ सर्वारंभपरित्यागीगुणा
तीतःसउच्यते॥२४॥ मांचयोऽव्यभिचारेण
भक्तियोगेनसेवते॥ सगुणान्समतीत्यै
तान्ब्रह्मभूयायकल्पते॥२५॥ ब्राह्मणोहि

श्री॰
गी॰
८५

प्रतिष्ठाहममृतस्याव्ययस्य च॥ शाश्वतस्य च
धर्मस्य सुखस्यैकांतिकस्य च॥२७॥ इति श्रीभ
गवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योग
शास्त्रे श्रीकृष्णार्जुनसंवादे गुणत्रयविभा
गयोगो नाम चतुर्दशोऽध्यायः॥१४॥ श्रीभग
वानुवाच॥ ऊर्ध्वमूलमधःशाखमश्वत्थं प्रा
हुरव्ययं॥ छंदांसि यस्य पर्णानि यस्तं वेद स

वेदवित॥१॥ अधश्चोर्ध्वंप्रसृतास्तस्यशाखागु
णप्रवृद्धाविषयप्रवाला॥ अधश्चमूलान्यनु
संततानिकर्मानुबंधीनिमनुष्यलोके॥२॥
नरूपमस्येहतथोपलभ्यतेनांतोनचादिर्न
चसंप्रतिष्ठा॥ अश्वत्थमेनंसुविरूढमूलम
संगशस्त्रेणदृढेनछित्वा॥३॥ ततःपदंतत्प
रिमार्गितव्यंयस्मिन्गतानानिवर्त्तंतिभूयः

श्री. गी. ८६

तमेवचाद्यंपुरुषंप्रपद्येयतः प्रवृत्तिः प्रसृतापुरा
णी॥४॥ निर्मानमोहाजितसंगदोषा अध्या
त्मनित्याविनिवृत्तकामा॥ द्वंद्वैर्विमुक्ताः सु
खदुःखसंज्ञैर्गच्छंत्यमूढाः पदमव्ययंतत्॥
५॥ नतद्भासयतेसूर्योनशशांकोनपावकः
यद्गत्वाननिवर्तंतेतद्धामपरमंमम॥६॥ममै
वांशोजीवलोकेजीवभूतः सनातनः॥ मनः

षष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति ॥७॥
शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ॥ गृ
हीत्वैतानि संयाति वायुर्गंधानिवाशयात् ॥
८॥ श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥९॥ उ
त्क्रामंतं स्थितं वापि भुंजानं वा गुणान्वितं ॥१०
विमूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषा

श्री.
गी.
१६

यतंतोयोगिनश्चैनंपश्यंत्यात्मन्यवस्थितं॥य
तंतोप्यकृतात्मानोनैनंपश्यंत्यचेतसः॥११
यदादित्यगतंतेजोजगद्भासयतेखिलं॥य
च्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमामकं॥१२॥
गामाविश्यचभूतानिधारयाम्यहमोजसा
पुष्णामिचौषधीःसर्वाःसोमोभूत्वारसात्म
कः॥१३॥अहंवैश्वानरोभूत्वाप्राणिनांदे

हमाश्रिताः॥ प्राणापानसमायुक्तः पचा
म्यन्नं चतुर्विधं॥१४॥ सर्वस्य चाहं हृदि संनि
विष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च॥ वेदैश्च
सर्वैरहमेव वेद्यो वेदांतकृद्वेदविदेव चाहं
॥१५॥ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च॥
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥
१६॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः

श्री·
गी·
८८

योलोकत्रयमाविश्यबिभर्त्यव्ययईश्वरः॥१७
यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः॥अ
तोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः॥
१८॥योमामेवमसंमूढोजानातिपुरुषोत्त
म॥सस्सर्वविद्भजतिमांसर्वभावेनभारत॥
१९॥इतिगुह्यतमंशास्त्रमिदमुक्तंमयानघ
एतद्बुद्ध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभारत॥२०

१ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्या
यां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषो
त्तमयोगो नाम पंचदशोध्यायः ॥१५॥ श्रीभ
गवानुवाच ॥ अभयं सत्त्वसंशुद्धिर्ज्ञानयो
गव्यवस्थितिः ॥ दानं दमश्च यज्ञश्च स्वाध्याय
स्तप आर्जवं ॥१॥ अहिंसा सत्यमक्रोधस्त्या
गः शांतिरपैशुनं ॥ दया भूतेष्वलोलुत्वं मा

श्री गी॰ ९९

र्दवंह्रीरचापलं ॥२॥ तेजः क्षमाधृतिः शौचमद्रो
होनातिमानिता ॥ भवंतिसंपदंदैवीमभिजा
तस्यभारत ॥३॥ दंभोदर्पोभिमानश्चक्रोधः
पारुष्यमेवच ॥ अज्ञानंचाभिजातस्यपार्थ
संपदमासुरीं ॥४॥ दैवीसंपद्विमोक्षायनि
बंधायासुरीमता ॥ माशुचः संपदंदैवीमभि
जातोसिपांडव ॥५॥ द्वौभूतसर्गौलोकेस्मि

नैदेव आसुर एव च ॥ दैवो विस्तरशः प्रोक्त आसु
रं पार्थ मे शृणु ॥६॥ प्रवृत्तिं च निवृत्तिं च जना न
विदुरासुरा ॥ न शौचं नापि चाचारो न सत्यं ते
षु विद्यते ॥७॥ असत्यमप्रतिष्ठं ते जगदाहुरनी
श्वरं ॥ अपरस्परसंभूतं किमन्यत्कामहैतुकं ॥८
एतां दृष्टिमवष्टभ्य नष्टात्मानोल्पबुद्धयः ॥ प्रभ
वंत्युग्रकर्माणः क्षयाय जगतोहिताः ॥९॥ का

श्री॰ गी॰ अ॰

ममाश्रित्यदुःपूरंदंभमानमदान्विताः॥मोहाद्गृही
त्वासद्ग्राहान्प्रवर्त्तंतेशुचिव्रताः॥१०॥चिंतामप
रिमेयांचप्रलयांतामुपाश्रिताः॥कामोपभोगपर
माएतावदितिनिश्चिताः॥११॥आशापाशशतैर्ब
द्धाःकामक्रोधपरायणाः॥ईहंतेकामभोगार्थ
मन्यायेनार्थसंचयान्॥१२॥इदमद्यमयालब्ध
मिदंप्राप्स्येमनोरथं॥इदमस्तीदमपिमेभवि

ष्यतिपुनर्द्धनं ॥१३॥ असौमयाहतःशत्रुर्हनिष्ये
चापरानपि॥ ईश्वरोहमहंभोगीसिद्धोहंबलवा
न्सुखी॥१४॥ आढ्योभिजनवानस्मिकोन्योस्ति
सदृशोमया॥ यक्ष्येदास्यामिमोदिष्यइत्यज्ञान
विमोहिताः॥१५॥ अनेकचित्तविभ्रांतामोहजा
लसमावृताः॥ प्रसक्ताःकामभोगेषुपतंतिनर
केशुचौ॥१६॥ आत्मसंभाविताःस्तब्धाधनमान

मदान्विताः॥ यजंतेनामयज्ञैस्तेदंभेनाविधिपूर्वकं
॥१७॥ अहंकारंबलंदर्पंकामंक्रोधंचसंश्रिताः॥
मामात्मपरदेहेषुप्रद्विषंतोभ्यसूयकः॥१८॥ ता
नहंद्विषतःक्रूरान्संसारेषुनराधमान्॥ क्षिपाम्य
जस्रमशुभानासुरीष्वेवयोनिषु॥१९॥ आसुरीं
योनिमापन्नामूढाजन्मनिजन्मनि॥ मामप्राप्यै
वकौंतेयततोयांत्यधमांगतिं॥२०॥ त्रिविधंनर

कस्येदं द्वारं नाशनमात्मनः॥ कामक्रोधस्तथा
लोभस्तस्मादेतत्त्रयं त्यजेत्॥२१॥ एतैर्विमुक्तः कौं
तेय तमोद्वारैस्त्रिभिर्नरैः॥ आचरत्यात्मनः श्रेय
स्ततो यानि परां गतिं॥२२॥ यः शास्त्रविधिमुत्सृ
ज्य वर्तते कामकारतः॥ न स सिद्धिमवाप्नोति न
सुखं न परां गतिं॥२३॥ तस्माच्छास्त्रं प्रमाणं ते का
र्याकार्यव्यवस्थितौ॥ ज्ञात्वा शास्त्रविधानोक्तं क

मेकर्त्तुमिहार्हसि ॥२४॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसंपवियोगोनाम षोडशोऽध्यायः ॥१६॥ अर्जुन उवाच ॥ ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विता ॥ तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥१॥ श्रीभगवानुवाच ॥ त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ॥ सात्विकी राजसी चैव ताम

सोचेतितांशृणु॥२॥सत्वानुरूपासर्वस्यश्रद्धाभ
वतिभारत॥श्रद्धामयोयंपुरुषोयोयच्छ्रद्धःसए
वसः॥३॥यजंतेसात्विकादेवान्यक्षरक्षांसिराज
साः॥प्रेतान्भूतगणांश्चान्येयजंतेतामसाजना
ः॥४॥अशास्त्रविहितंघोरंतप्यंतेयेतपोजनाः॥दं
भहंकारसंयुक्ताःकामरागबलान्विताः॥५॥
कर्षयंतःशरीरस्थंभूतग्राममचेतसः॥मांचै

श्री॰
गी॰
८२

वांतःशरीरस्थंतान्विद्ध्यासुरनिश्चयान् ॥६॥ आहा
रस्त्वपिसर्वस्यत्रिविधोभवतिप्रियः ॥ यज्ञस्तपस्त
थादानंतेषांभेदमिमंशृणु ॥७॥ आयुःसत्वब
लारोग्यसुखप्रीतिविवर्द्धनाः ॥ रस्याःस्निग्धाः
स्थिराहृद्याआहाराःसात्विकप्रियाः ॥८॥ कट्वम्ल
लवणात्युष्णतीक्ष्णरूक्षविदाहिनः ॥ आहारारा
जसस्येष्टादुःखशोकामयप्रदाः ॥९॥ यातयामं

रा

गतरसंपूतिपर्युषितंचयत॥ उच्छिष्टमपिचा
मेध्यंभोजनंतामसप्रियं॥१०॥अफलाकांक्षि
भिर्यज्ञोविधिदृष्टोयइज्यते॥यष्टव्यमेवेतिम
नःसमाधायससात्विकः॥११॥अभिसंधाय
तुफलंदंभार्थमपिचैवयत॥इज्यतेभरतश्रेष्ठ
तंयज्ञंविद्धिराजसं॥१२॥विधिहीनमसृष्टान्नंमं
त्रहीनमदक्षिणं॥श्रद्धाविरहितंयज्ञंतामसं

परिचक्षते ॥१३॥ देवद्विजगुरुप्राज्ञपूजनं शौचमा
र्जवं ॥ ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥१४॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ॥ स्वा
ध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥१५॥ म
नःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ॥
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥१६॥
श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ॥ अफला

कांक्षिभिर्युक्तैःसात्विकंपरिचक्षते ॥१७॥ सत्का
रमानपूजार्थंतपोदंभेनचैवयत् ॥ क्रियतेत
दिहंप्रोक्तंराजसंचलमध्रुवं ॥१८॥ मूढग्राहे
णात्मनोयत्पीडयाक्रियतेतपः ॥ परस्योत्सा
दनार्थंवातत्तामसमुदाहृतं ॥१९॥ दातव्यमि
तियद्दानंदीयतेनुपकारिणे ॥ देशेकालेच
पात्रेचतद्दानंसात्विकंस्मृतं ॥२०॥ यत्तुप्रत्यु

पकारार्थंफलमुद्दिश्यवापुनः ॥ दीयतेचपरि-
क्लिष्टंतद्दानंराजसंस्मृतं ॥२१॥ अदेशकालेय
द्दानमपात्रेभ्यश्चदीयते ॥ असत्कृतमवज्ञातं
तत्तामसमुदाहृतं ॥२२॥ ॐतत्सदितिनिर्देशो
ब्रह्मणस्त्रिविधःस्मृतः ॥ ब्राह्मणास्तेनवेदा
श्चयज्ञाश्चविहिताःपुरा ॥२३॥ तस्मादोमित्यु
दाहृत्ययज्ञदानतपःक्रियाः ॥ प्रवर्त्तन्तेविधा

नोक्ताः सततंब्रह्मवादिनां ॥२४॥ तदित्यनभिसं
धायफलंयज्ञतपःक्रियः। दानक्रियाश्चविवि
धाः क्रियंतेमोक्षकांक्षिभिः ॥२५॥ सद्भावेसा
धुभावेचसदित्येतत्प्रयुज्यते॥ प्रशस्तेकर्मणि
तथासच्छब्दःपार्थयुज्यते॥२६॥ यज्ञेतपसिदा
नेचस्थितिःसदितिचोच्यते॥ कर्मचैवतदर्थी
यंसदित्येवाभिधीयते॥२७॥ अश्रद्धयाहुतंद

श्री॰
गी॰
९८

तं तपस्तप्तं कृतं च यत ॥ असदित्युच्यते पार्थ न च
तत्प्रेत्य नो इह ॥२८॥ इति श्रीभगवद्गीतासूपनिष
त्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवा
दे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्या
यः ॥१७॥ अर्जुन उवाच ॥ संन्यासस्य महाबा
हो तत्त्वमिच्छामि वेदितुं ॥ त्यागस्य च हृषीकेश
पृथक्केशिनिषूदन ॥१॥ श्रीभगवानुवाच ॥

काम्यानांकर्मणांन्यासंसंन्यासंकवयोविदुः॥
सर्वकर्मफलत्यागंप्राहुस्त्यागंविचक्षणाः॥२
त्याज्यंदोषवदित्येकेकर्मप्राहुर्मनीषिणः॥यज्ञ
दानतपःकर्मनत्याज्यमितिचापरे॥३॥निश्चयं
शृणुमेतत्रत्यागेभरतसत्तमः॥त्यागोहिपुरु
षव्याघ्रत्रिविधःसंप्रकीर्तितः॥४॥यज्ञदान
तपःकर्मनत्याज्यंकार्यमेवतत्॥यज्ञोदानंत

पःकर्मनत्याज्यंकार्यमेवतत् ॥ यज्ञोदानंतपश्चैव । पावनानिमनीषिणां ॥ ५ ॥ एतान्यपितुकर्माणि संगंत्यक्त्वाफलानिच ॥ कर्त्तव्यानीतिमेपार्थ । निश्चितंमतमुत्तमं ॥ ६ ॥ नियतस्यतुसंन्यासः कर्मणोनोपपद्यते ॥ मोहात्तस्यपरित्यागस्ता मसःपरिकीर्त्तितः ॥ ७ ॥ दुःखमित्येवयत्कर्म । कायक्लेशभयंत्यजेत् ॥ सकृत्वाराजसंत्यागं

नैवत्यागफलंलभेत ॥८॥ कार्यमित्येवयत्कर्म
नियतंक्रियतेर्जुन ॥ संगंत्यक्त्वाफलंचैवसत्या
गःसात्त्विकोमतः ॥९॥ नद्वेष्ट्यकुशलंकर्मकु
शलेनानुषज्जते ॥ त्यागीसत्त्वसमाविष्टोमेधा
वीछिन्नसंशयः ॥१०॥ नहिदेहभृताशक्यंत्य
क्तुंकर्माण्यशेषतः ॥ यस्तुकर्मफलत्यागीस
त्यागीत्यभिधीयते ॥११॥ अनिष्टमिष्टंमिश्रंच

श्री
गी.
९८

त्रिविधंकर्मणःफलं भवत्यत्यागिनांप्रेत्यनतुसं
न्यासिनांक्वचित ॥१२॥ पंचैतानिमहावाहोका
रणानिनिबोधमे॥ सांख्येकृतांतेप्रोक्तानिसि
द्धयेसर्वकर्मणां॥१३॥ अधिष्टानंतथाकर्ता
करणंचपृथग्विधं॥ विविधाश्चपृथक्चेष्टा
दैवंचैवात्रपंचमं॥१४॥ शरीरवाङ्मनोभिर्य
त्कर्मप्रारभतेनरः॥ न्याय्यंवाविपरीतंवापं

चैतेनस्यहेतवः॥१५॥तत्रैवंसतिकर्तारंमात्मानंके
वलंतुयः॥पश्यत्यकृतबुद्धित्वान्नसपश्यतिदु
र्मति॥१६॥यस्यनाहंकृतोभावोबुद्धिर्यस्यन
लिप्यते॥हत्वापिसइमांल्लोकान्नहंतिननिब
ध्यते॥१७॥ज्ञानंज्ञेयंपरिज्ञातात्रिविधाकर्मचो
दना॥कारणंकर्मकर्त्रेतित्रिविधाकर्मसंग्रहा
१८॥ज्ञानंकर्मचकर्त्ताचत्रिधैवगुणभेदतः॥प्रो

श्री॰ गी॰ ९६

च्यतेगुणसंख्यानेयथावछृणुतान्यपि॥१९॥सर्व
भूतेषुयेनैकंभावमव्ययमीक्षते॥अविभक्तंवि
भक्तेषुतज्ज्ञानंविद्धिसात्विकं॥२०॥पृथक्त्वेनतु
यज्ज्ञानंनानाभावान्पृथग्विधान्॥वेत्तिसर्वेषु
तज्ज्ञानंविद्धिराजसं॥२१॥यत्तुकृत्स्नवदेकस्मि
न्कार्येसक्तमहैतुकं॥अतत्वार्थवदल्पंचतत्ता
मसमुदाहृतं॥२२॥नियतंसंगरहितंमरागद्वे

भूतेषु२

षतःकृतं॥ अफलप्रेप्सुनाकर्मयत्तत्सात्विकमु
च्यते॥२३॥ यत्तुकामेप्सुनाकर्मसाहंकारेणवा
पुनः॥ क्रियतेबहुलायासंतद्राजसमुदाहृतं॥
२४॥ अनुबंधंक्षयंहिंसामनपेक्ष्यचपौरुषं॥ मो
हादारभ्यतेकर्मयत्तत्तामसमुच्यते॥२५॥ मुक्त
संगोनहंवादीधृत्युत्साहसमन्वितः॥ सिद्ध्यसि
द्ध्योर्निर्विकारःकर्त्तासात्विकउच्यते॥२६॥ रागी

श्री·
गी·
१००

कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ॥ हर्षशो
कान्वितः कर्त्ता राजसः परिकीर्त्तितः ॥२७॥ अ
युक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ॥
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते ॥२८॥
बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ॥ प्रोच्य
मानमशेषेण पृथक्त्वेन धनंजय ॥२९॥ प्रवृ
त्तिं च निवृत्तिं च कार्याकार्ये भयाभये ॥ बंधं मो

त्तंबधयोवेत्तिबुद्धिःसापार्थसात्विकी ॥३०॥ यया
धर्ममधर्मंचकार्यंचाकार्यमेवच ॥ अयथावप्र
जानातिबुद्धिःसापार्थराजसी ॥३१॥ अधर्मंध
र्ममितियामन्यतेतामसावृता ॥ सर्वार्थान्वि
परीतांश्चबुद्धिःसापार्थतामसी ॥३२॥ धृत्यायया
धारयतेमनःप्राणेंद्रियक्रिया ॥ योगेनाव्यभि
चारिण्याधृतिःसापार्थसात्विकी ॥३३॥ ययातु

श्री·
गी·
२·२

धर्मकामार्थान्धृत्याधारयतेर्जुन॥ प्रसंगेनफला
कांक्षीधृतिःसापार्थराजसी॥३४॥ ययास्वप्नं
भयंशोकंविषादंमदमेवच॥ नविमुंचतिदु
र्मेधाधृतिःपार्थतामसी॥३५॥ सुखंत्विदानीं
त्रिविधंशृणुमेभरतर्षभ॥ अभ्यासाद्रमतेयत्र
दुःखांतंचनिगछति॥३६॥ यत्तदग्रेविषमिव
परिणामेमृतोपमं॥ तत्सुखंसात्विकंप्रोक्तं

मात्मबुद्धिप्रसादजं ॥३७॥ विषयेंद्रियसंयोगा
द्यत्तदग्रेमृतोपमं ॥ परिणामेविषमिवतत्सुखं
राजसंस्मृतं ॥३८॥ यदग्रेचानुबंधेचसुखंमोह
नमात्मनः ॥ निद्रालस्यप्रमादोत्थंतत्तामस
मुदाहृतं ॥३९॥ नतदस्तिपृथिव्यांवादिविदे
वेषुवापुनः ॥ सत्वंप्रकृतिजैर्मुक्तंयदेभिःस्या
त्त्रिभिर्गुणैः ॥४०॥ ब्राह्मणक्षत्रियविशांशूद्रा

णांचपरंतप॥ कर्माणिप्रविभक्तानिस्वभावप्र
भवैर्गुणैः॥४१॥शमोदमस्तपःशौचंक्षांतिरा
र्जवमेवच॥ज्ञानंविज्ञानमास्तिक्यंब्रह्मक
र्मस्वभावजं॥४२॥शौर्यंतेजोधृतिर्दाक्ष्यंयुद्धे
चाप्यपलायनं॥दानमीश्वरभावश्चक्षात्रंक
र्मस्वभावजं॥४३॥कृषिगोरक्ष्यवाणिज्यंवैश्य
कर्मस्वभावजं॥परिचर्यात्मकंकर्मशूद्रस्यापि

पिस्वभावजं॥४४॥ स्वेस्वेकर्मण्यभिरतःसंसिद्धिं
लभतेनरः॥ स्वकर्मनिरतःसिद्धिंयथाविंदति
तच्छृणु॥४५॥ यतःप्रवृत्तिर्भूतानांयेनसर्वमि
दंततं॥ स्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमान
वः॥४६॥ श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनु
ष्ठितात्॥ स्वभावनियतंकर्मकुर्वन्नाप्नोतिकि
ल्बिषं॥४७॥ सहजंकर्मकौंतेयसदोषमपिन

श्री·
गी·
९२

मपेन॥ सर्वारंभाहिदोषेणधूमेनाग्निरिवावृता
॥४८॥ असक्तबुद्धिःसर्वत्रजितात्माविगतस्पृहः॥
नैष्कर्म्यसिद्धिंपरमांसंन्यासेनाधिगच्छति॥४९॥
सिद्धिंप्राप्तोयथाब्रह्मतथाप्नोतिनिबोधमे
समासेनैवकौंतेयनिष्ठाज्ञानस्ययापरा॥५०॥
बुद्ध्याविशुद्धयायुक्तोधृत्यात्मानंनियम्यच॥
शब्दादीन्विषयांस्त्यक्त्वारागद्वेषौव्युदस्यच॥५१

विविक्तसेवीलघ्वाशीजितवाक्कायमानसः॥
ध्यानयोगपरोनित्यंवैराग्यंसमुपाश्रितः॥५२
अहंकारंबलंदर्पंकामंक्रोधंपरिग्रहं॥ विमु
च्यनिर्ममःशांतोब्रह्मभूयायकल्पते॥५३
ब्रह्मभूतःप्रसन्नात्मानशोचतिनकांक्षति
समःसर्वेषुभूतेषुमद्भक्तिंलभतेपरां॥५४
भक्त्यामामभिजानातियावान्यश्चास्मितत्त्व

श्री॰
गी॰
१०८

मः॥ ततोमांतत्त्वतोज्ञात्वाविशतेतदनंतरं॥ ५५॥
सर्वकर्माण्यपिसदाकुर्वाणोमद्व्यपाश्रयः॥ मत्प्र
सादादवाप्नोतिशाश्वतंपदमव्ययं॥ ५६॥ चेतसा
सर्वकर्माणिमयिसंन्यस्यमत्परः॥ बुद्धियोगमु
पाश्रित्यमच्चित्तःसततंभव॥ ५७॥ मच्चित्तःस
र्वदुर्गाणिमत्प्रसादात्तरिष्यसि॥ अथचेत्त्वमहं
कारान्नश्रोष्यसिविनंक्ष्यसि॥ ५८॥ यदहंकार

रा

माश्रित्यनयोत्स्यइतिमन्यसे॥ मिथ्यैषव्यवसाय
स्तेप्रकृतिस्त्वांनियोक्ष्यति॥५९॥ स्वभावजेनकौं
तेयनिबद्धःस्वेनकर्मणा॥ कर्तुंनेच्छसियन्मोहा
त्करिष्यस्यवशोपितत्॥६०॥ ईश्वरःसर्वभूता
नांहृद्देशेर्जुनतिष्ठति॥ भ्रामयन्सर्वभूतानियं
त्रारूढानिमायया॥६१॥ तमेवशरणंगच्छसर्व
भावेनभारत॥ तत्प्रसादात्परांशांतिंस्थानंप्रा

प्स्यसिशाश्वतं॥६२॥इतितेज्ञानमाख्यातंगुह्याद्गु
ह्यतरंमया॥विमृश्यैतदशेषेणयथेच्छसितथा
कुरु॥६३॥सर्वगुह्यतमंभूयः शृणुमेपरमंवचः॥
इष्टोसिमेदृढमितिततोवक्ष्यामितेहितं॥६४॥
मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु॥मामे
वैष्यसिसत्यंतेप्रतिजानेप्रियोसिमे॥६५॥सर्व
धर्मान्परित्यज्यमामेकंशरणंव्रज॥अहंत्वांस

र्वपापेभ्योमोक्षयिष्यामिमाशुच॥६६॥इदंतेनातपस्का
यनाभक्तायकदाचन॥नचाशुश्रूषवेवाच्यंन
चमांयोभ्यसूयति॥६७॥यइदंपरमंगुह्यंमद्भक्ते
ष्वभिधास्यति॥भक्तिंमयिपरांकृत्वामामेवैष्य
त्यसंशयः॥६८॥नचतस्मान्मनुष्येषुकश्चिन्मे
प्रियकृत्तमः॥भवितानचमेतस्मादन्यःप्रिय
तरोभुवि॥६९॥अध्येष्यतेचयइमंधर्म्यंवादमा

सं१

वया॥ ज्ञानयज्ञेनतेनाहमिष्टःस्यामितिमेमति
७०॥ श्रद्धावाननसूयश्चशृणुयादपियोनरः॥
सोपिमुक्तःशुभाल्लोकान्प्राप्नुयात्पुण्यकर्मणा॥
७१॥ कच्चिदेतच्छ्रुतंपार्थत्वयैकाग्रेणचेतसा॥
कच्चिदज्ञानसंमोहःप्रनष्टस्तेधनंजय॥ ७२॥ अ
र्जुन उवाच॥ नष्टोमोहःस्मृतिर्लब्धात्वत्प्रसा
दान्मयाच्युत॥ स्थितोस्मिगतसंदेहःकरिष्ये

वचनंतव ॥७३॥ संजय उवाच ॥ इत्यहंवासुदेव
स्यपार्थस्यचमहात्मनः ॥ संवादमिममश्रौषमद्भु
तंरोमहर्षणं ॥७४॥ व्यासप्रसादाच्छ्रुतवानेतद्गु
ह्यमहंपरं ॥ योगंयोगेश्वरात्कृष्णात्साक्षात्कथय
तःस्वयं ॥७५॥ राजन्संस्मृत्यसंस्मृत्यसंवादमि
ममद्भुतं ॥ केशवार्जुनयोःपुण्यंहृष्यामिचमु
हुर्मुहुः ॥७६॥ तच्चसंस्मृत्यसंस्मृत्यरूपमत्यद्भु

भ १

कृ.स्ना ४

श्री.
गी.
१८७

नंहरे॥ विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः
७७॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः॥ त
त्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥ ७८॥ इ
ति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां यो
गशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगो
नामाष्टादशोऽध्यायः॥१८॥ शुभमस्तु शुभं

श्रीगणेशाय नमः ॥ ॐ विघ्नहर्त्तिलतल्लप
मधुगलेदंनादात्सूत्रेभे ॥ वामेमोदकपूर्ण
पात्रपुरुषोनाग्रोपविश्रीशिहकु ॥ श्रीमांस्मिंह
मुगासिनाधातिफणेगणांवोवहन्मोलिमा
नरिपणदीप्तवक्त्रमयुक्तगवालंबोधराघण
मेनः ॥ १ ॥ स्वर्णाकांवरधरंविघ्नपाधिवंशीचवक्रे
विघ्नोपशांतये ॥ २ ॥
नं ॥ प्रसन्नवदनंध्यायेत्सर्व

ग॰
स्तो॰
२

सिंदूरकुंकुमरुक्तलोचनविद्रुमार्करक्तांबुदाडिम
निभायचतुर्भुजाय॥ हेरंबभैरवगणेश्वरपाल
यकाय॥ सर्वार्थसिद्धिफलदायनमःशिवाय
चिरचिन्मयंगंभीरंगमागमपदोक्तितं॥ गह
नाकाशसंकाशंवंदेदेवंगणेश्वरं॥ ७॥ श्रीस
नत्कुमारउवाच॥ पांकराद्वलक्षणाप्रांसंपद्य
योनिममप्रभो॥ नदहंकौलिनिधिष्यामिस्तोत्रं

परमदुर्लभं ॥५॥ चक्रध्वजाब्जपद्मस्थां चतुर्भुजां
चभक्तिनः ॥ एतयेत्तगणाध्यतं श्रद्धाभक्तिस
मन्वितः ॥६॥ अर्घैः पुष्पैस्तथा धूपैर्दीपैर्माल्यै
श्चचामरैः ॥ वस्त्रैः कुंडलकेयूरैर्मौलिभिश्च
वितानकैः ॥७॥ भक्तैर्भोज्यैरपूपैश्च मत्स्यैर्मां
सैश्च मोदकैः ॥ पानकैफलमूलैश्च होमैर्मंत्रा
रिभिस्तथा ॥८॥ गंगाहृदयतुगांगेयंश्रीपे

लेन्नगणेश्वरम॥ वातागणस्पांयवद्दामृक्रोगयाया
टंकधारिणं॥ प्रयागेलगणाध्यक्षंकेदारेवि
दाननं॥ लंबोदरंकुरुक्षेत्रेनैमिषेचमदोत्कट
म्॥ जंबुकंदंडकारण्येलोकेशंहिमवद्गिरौ॥
विघ्नांतकंचविंध्याद्रौमालयेहेमकुंभकं॥ ना
यकंपुष्करद्वीपेविघ्नेशंकल्मलोस्थितं॥ ६॥
लावंतेविघ्नरूपंहविविर्षमदोत्कटं॥ त्रिनेत्रंसिं

ग॰
स्तो॰
३

हलाहलीपेश्वनदीपेत्रवामनं॥ उज्जयिन्याचलंवो
हंमालवेस्थूपेकलंकं॥ सौराष्ट्रेवरदंनित्यंका
पर्मीरेभीमरूपिणं॥ सिंधुसागरयोर्मध्येवि
हेयंमंचनायकं॥ हर्यंत्तंयत्रभवनेकेलसेपर
श्वरं॥ महायोगंमहेंद्रेचसहसेवाराहरूपिणं
महोधरंचलंपायांचंपायंफितिविवाहनं॥ पा
पाहलंत्रिकूटेचपूजयेत्सर्वसिद्धिदं॥ बलम

त्रिउत्सायांचपाटलेसिंहवाहनं॥पौंड्रेरौद्रमुखंवा
पिकलापिग्रामकेजयं॥मेरुपृष्ठेकामरूपंनंदनं
नंदनेवने॥विजयंवैगंधर्वेनेदेवदारुवनेगलं॥ग्रा
ह्राणंविग्रहस्पं॥गंगामारसंगमेमहापथिवि
रूपांतंचित्रमेनंतुपुष्करंदुर्मेथेपुमुनानीरेलभवं
गंधमादने॥अंबरेपंभद्रवटेमोहनंहस्तिनापु
रे॥किष्किंधायांमृग्रमला लंकायांतुविभीषं।

ग.
स्तो.
४

लं ॥ कलिंगेवहलं चैव विंध्यापादेमहोत्कटम् ॥
स्वच्छन्यंचवनहरिकेषुचीनेप्राज्ञुनयावहं ॥ वज्रहलंको
सलेषुरत्तिल्गाख्रोवरोहितं ॥ श्लोघतकरंचै
वमध्यदेशेप्रकीर्तितं ॥ एकदंतंपश्चिमाद्रौ एवं
देशेपराजितं ॥ उत्तरेवाहवक्रंचवरिष्ठंत्रिपुरेषुच
हिरण्यकंवचंचैवगिरिसंश्लिष्टसंस्थितं ॥ स्वर्ग
त्वंचकलिंगेषुनर्मदायांवनर्भजं ॥ महाण्णप

मस्तमाथं भद्रकालि ह्रदे शिवं ॥ गोकर्णे गण
कन्यऊझे वगाननं ॥ पद्मासनं कामरूपं श्रीमु
खं सर्वतः स्थितं ॥ वेदवेदांगशास्त्रेषु चिंतये
गणनायकं ॥ अष्टाषष्टिस्तनामानि ना
म्नां मङ्गलकर्मणि ॥ नित्यं प्रभातकाले तु
चिंतयेत्सर्वसिद्धिदं ॥ एतत्स्तोत्रं पवित्रं च
मंगलं पापनाशनं ॥ यस्त्वद्धद्वेनालो

यत्रतत्रोभयापहम॥ चौरादिकनयव्याघ्र
व्यादिदुर्गेनिनाशनं॥ कृत्यादिमायाप्रमनं
सर्वपापविमर्दनम॥ त्रिसंध्यंयः पठेदेतत्स
लभेत्सर्वसिद्धिदं॥ गणेश्वरप्रसादेनल
भतेवांछितंपदं॥ इतिश्रीगणेश्वरस्तोत्रंसंपूर्ण
समाप्तं॥ शुभमस्तु शुभमस्तु शुभमस्तु

हरि ताल १ मो सका कुप. २ २ तोला सि
[illegible] दनउ के मरध [illegible] दे दुध
पारा २ त [illegible]
माल घ [illegible]
स मा वसदे [illegible]


अथ वांविगायत्री मंत्रः। ॐ भूः
ॐ भुवः ॐ स्वः ॐ वासुदेवा
य विद्महे [illegible] नारायणा
य धीमहि तन्नो विष्णुः प्रचो
दयात् ॥ १ ॥

अथ वैष्णव गायत्री ॐ विरूपाय विद्महे [illegible]
[illegible] धीमहि तन्नो [illegible]

घातः॥ २ ॥ अथ षष्ठ दुर्गा पत्रि मंत्रः ॐ जि
सं ते पुंडरीकाद नमस्ते विश्व भावन
नमस्ते स्तु पीकेश महा पुरुष पूर्व



जा॥ ३ ॥
अथ श्री गा
यत्री॥ ॐ न
रायणाय
विद्महे वा
सुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात्॥
४



दनीएउंत्ररर दे जुलाभानीला
घोजानीलाघोजानीलालान
नीलापत्ताननीलां दनीलाधु
धाना इतिश्रीविदेवके कारराम
श्रीमनेराम वेदलो
घोशिरमारघोशिर रावबे इतपिं
उवदेनीलेकेंदेवरपदेः

धो वा की मउली वड़े गुरू जो
र रव नाथ की ग्रा तो म ले ग्र
धी नि र ध कु ट म रे म ही
म ग गु रू दी प्रा ग त कु रो
प्र दु र ष वा चा कु रो ॥ ॐ

ॐ नमः श्री दे प्रा गु रू को प्रा देश
का ली मै वा ले क्षे त्र पा

स्पे जिनजा घाकालाव
कावह्रुंग्रंदरकालजाक
जा घटेंसरवघेफुरोम

मे
स
२

(अ)नमाभग
वा॥ गेश्वक
वक्रमध्यस्तु
प्रुपिवंनीकं
नोरुरिनम्र
कान्याघयं
गतिर्दृगीश्री



वनमाभरण
लजालपतंत
यंनी॥ मधुराम
ठकान्मदयं
पहुरंनीसाध
नी॥ नयनि
संसुदरीक्रीडयं
श्री

ॐचतुर्भुजामेकवक्त्रांपूर्णेंदुवदनप्रभां॥ खड्गपाशांकुशध
रांदेवींवरदाभयपाणिकां॥ ३॥ प्रेतसंस्थांमहारौद्रींभु
जंगेनोपवीतिनीं॥ भवानीकालसंहारवंदनाविभू
षितां॥ ४॥ जगत्स्थितिकरींब्रह्मविष्णुरुद्रादिभिःस्तु
तः॥ स्तुतानांपरमेशानींनौम्यहंविघ्नहारिणीं॥ ५॥
कैलासशिखरेरम्येदेवदेवंमहेश्वरं॥ ध्यानेनास्यरमा
सीनंप्रसन्नमुखपंकजं॥ ६॥ हारासरपिणारत्नसंनिनां

त्रियुगं धर्मं शूलम्याशिरसानंदीवद्धांजलिरभाषत
७॥ श्रीनंदिकेश्वरउवाच॥ देवदेवजगन्नाथसंशयोस्ति
महान्मम॥ रहस्यमेकमिच्छामि प्रष्टुं त्वां भक्तवत्सल
८॥ देवनाथा त्वयाकस्याः स्तोत्रमेवदिवानिशं॥ पठ
नेविरचितानाथत्वनःकिमपरात्परं॥ ९॥ इति पृष्टस्तदादे
वोनंदिकेनजगद्गुरुः॥ प्रोवाचभगवान्नीकोविकस
न्नेत्रपंकजः॥ १०॥ श्रीभगवानुवाच॥ साधुसाधुगणश्रे

भ॰
स॰
२

एएष्टवानस्मिमांचयत ॥ स्कंदस्यापिवयक्रोपंरहस्यं
वाच्यामितत ॥ ११ ॥ पुराकल्पात्तयोलोकान्सिसृक्षुर्मेढ
वेतनः ॥ गुणत्रयमयी शक्तिर्मोकाप्या लिंग्पनस्युषी
२२ ॥ हेतुसंकल्पजालस्य मनोधिष्ठायनीशुभाः ॥ इच्छे
तिपरमाशक्तिरुन्मिमीलनतः परं ॥ २३ ॥ ततोवांगिति
विख्याताशक्तिः शाद्बमयीपुरा ॥ प्रादुरासीज्जगन्माता
वेदमातासरस्वती ॥ २४ ॥ ब्राह्मीचवैस्नवीरौद्रीकौमारी

भ॰
स॰
१

पार्वती शिवा ॥ सिद्धिदा बुद्धिदा शुद्धा सर्वमंगलदा
यिनी ॥ २५ ॥ नयेन सृज्यते विश्वं मना धार्यं च धार्यते
नयेन पाल्यते सर्वं तस्यामेव प्रलीयते ॥ २६ ॥ स्मर्चिता
प्रणता ध्याता सर्वभावविनिश्चितैः ॥ स्माराधिता स्त
तासैव सर्वसिद्धिप्रदायिनी ॥ २७ ॥ तस्याः प्रसन्न ग्रहारे
वतामेव स्नानवानहं ॥ सहस्रेनामभिर्दिव्यैः स्तैलोक्य
प्राणिपूजितैः ॥ २८ ॥ स्तवेनानेन संतुष्टामामेव प्रिवि

वेशासा ॥ नरारभ्य मयाप्राप्तमैश्वर्यमिदमुत्तमं ॥ १९ ॥ न
त्वभावान्मयास्रष्टुं जगदेतच्चराचरं ॥ मत्तस्तान्सुरगंधर्वा
यक्षराक्षसमानवं ॥ २० ॥ सपन्नगं सपाशुदं सशैलवनका
ननं ॥ मयग्रहाणापि न तत्त्वं पंचभूतगुणान्वितं ॥ २१ ॥ नेरि
नोमसहस्रेणस्तवेनानेन सर्वदा ॥ स्तौमि परां परा
क्तिं ममानुग्रहकारिणीं ॥ २२ ॥ इत्युक्तो परतं देवं वराच
रगुरुं विभुं ॥ प्रणम्यापि रमानंदी प्रोवाच परमेश्वरं ॥ २३ ॥

श्रीनंदिकेश्वरउवाच॥ भगवंदेवदेवेशलोकनाथजगत्प
ते॥ भक्तोस्मितवदासोस्मिप्रसादःक्रियतांमयि॥२४॥दे
व्याःस्तवमिमंपुण्यंदुर्लभंचसुरैरपि॥ श्रोतुमिच्छाम्य
हंदेवंप्रभावमपिचास्यतु॥२५॥ श्रीभगवानुवाच॥
शृणुनंदिन्महाभागस्तवराजमिमंशुभं॥ सहस्रैर्ना
मभिर्दिव्यैःसिद्धिदंसुखमोक्षदं॥२६॥ शुचिभिःप्रातरु
त्थायपठितव्यंसमाहितैः॥ त्रिकालंश्रद्धयायुक्तैःना

भ॰ स॰ ४

नः परतरः स्तवः ॥२०॥ ॐ अस्य श्रीभवानीनामसहस्र
स्तवराजस्य ॥ श्रीमहादेवऋषिः ॥ आद्याशक्तिः ॥ भ
गवतीभवानीदेवता ॥ अनुष्टुप्छंदः ॥ श्रीमहादे
वीप्रीत्यर्थे सर्वकामनाप्राप्त्यर्थे जपे विनियोगः ॥ ॐ
बालार्कमंडलाभासं चतुर्बाहुं त्रिलोचनं ॥ पाशां
कुशशरांश्चापं धारयंतीं शिवां भजे ॥२१॥ अर्धेंदुमौ
लिममलाममराभिवंद्यां ॥ अंभोजपाशांकुशलिव

करकपालहस्ता॥ रक्तांगरागारक्तनाभरणीत्रिनेत्रा॥
ध्यायेपिकवस्नवनितांमदविह्वलांगीं॥ ईश्वर३वा
च॥ ॐमहाविद्याजगन्मातामहालक्ष्मीःशिवप्रि
या॥ विष्णुमायाशुभाशांतासिद्धासिद्धसरस्वती
१॥ क्षमाकांतिप्रभाज्योत्स्नापार्वतीसर्वमंगला॥ हिंगु
लाचंडिकादांतापद्मालक्ष्मीहरिप्रिया॥२॥ त्रिपुरा
नंदिनीनंदासुनंदासुरवंदिता॥ यज्ञविद्यामहामा

म॰
स॰
५

यावेदमातामुघाधृतिः॥३॥ प्रीतिःप्रियाप्रसिद्धाव
मृडानीविंध्यवासिनी॥ सिद्धविद्यामहाशक्तिः
पृथ्वीनारदसेविता॥४॥ पुरहूतप्रियाकांताकामि
नीपद्मलोचना॥ प्रह्लादिनीमहामातादुर्गादुर्गति
नाशिनी॥५॥ ज्वालामुखीसुगोत्राचज्योतिःकुमुद
हासिनी॥ दुर्गमादुर्लभाविद्यास्वर्गतिपुरवासि
नी॥६॥ अपर्णाशांबरीमायामदिरामृदुहासिनी

भ॰
स॰
६

ग्लवागीश्वरी निद्या निस्वह्निन्ना कृशोदरी ॥ ७ ॥ कामे
श्वरी च नीला च भोरुंडा वह्निवासिनी ॥ लंबोधरी महा
काली विद्या विद्येश्वरी तथा ॥ नरेश्वरी च सत्या च सर्व
सौभाग्यवर्धिनी ॥ संकर्षिणी नारसिंही वैष्णवी च
महोदरी ॥ कात्यायनी च चंपा च सर्वसंपत्तिकारिणी
नारायणी महानिद्रा योगनिद्रा प्रभावती ॥ प्रज्ञापा
रमिता प्रज्ञा तारा मधुमती मधु ॥ क्षीरार्णवसुधाहा

राकालिका सिंहवाहना ॥ ॐकारवस्तुधाकाराचेतना
कोपनाकृतिः ॥ अर्धबिंदुधराधारा विश्वमाताकला
वती ॥ पद्मावती स्ववस्त्राचप्रबुद्धाचसरस्वती ॥ ॐडास
नाजगद्धात्रीउद्धमाताजिनेश्वरी ॥ जिनमाताजिनेंद्रा
चशारदाहंसहवाहना ॥ राज्यलक्ष्मीर्वषट्कारासुधा
कारासुधात्मिका ॥ राजनीतिस्त्रयीवर्तादंडनीतिःक्रि
यावती ॥ सद्भूतिस्तारिणीश्रद्धासद्गतिसत्परायणा

सिंधुमेसाकिनीगंगायमुनाचसरस्वती॥गोदावरीवि
पाशाचकावेरीचशतद्रुका॥सरयूश्चंद्रभागाचकौ
शिकीगंडकीशुचा॥नर्मदाकर्मनाशाचचर्मण्वत्य
श्चवेदिका॥वेत्रवतीवितस्ताचवरदानरवाहना॥स
तीपतिव्रतासाध्वीसुचक्षुःकुंडवासिनी॥एकचक्षुः
सहस्राक्षीसुश्रोणिर्भगमालिनी॥सेनाश्रोणि
पताकाचसव्यूहायुद्धकांक्षिणी॥पताकिनीदया

भै स ७

रंभाविपंचीपंचमप्रिया॥ परापरकलाकान्तात्रिश
क्तिर्मोक्षदायिनी॥ ऐंद्रीमाहेश्वरीश्रीब्राह्मीकौमा
रीजलवासिनी॥ इच्छाभगवती॥ क्रि: कामधेनुःकृ
पावनी॥ वज्रायुधावज्रहस्ताचंडीचंडपराक्रमा॥ गौरी
गौरीसुवर्णवर्णा च स्थितिसंहारकारिणी॥ एकाने
कामहेस्या च पातवाह्नेमहाभुजा॥ भुजंगभूषणा
भूषाषट्चक्रक्रमवासिनी॥ षट्चक्रभेदिनीष्या

माकायस्याकायवर्जिता ॥ सूक्ष्मिना सूक्ष्मलीता
मामूलप्रकृतिरीश्वरी ॥ अजावयवऊवर्णाच पुरु
षार्थप्रवर्तिनी ॥ रक्तानीलासिताषपामाकल्मापी
नाचकर्त्रेराण ॥ सूधान्नमाजरातृष्णानहस्मीकल
लालया ॥ कलाकाष्ठामुहूर्तोचनिमिषाकाल
रूपिणी ॥ सुवर्णरसनानासाचक्षुस्पर्शवतीरसा
गंधप्रियासुगंधाचसुस्पर्शाचमनोगतिः ॥ म

गनाभिमेगासी च कर्पूरामोदधारिणी ॥ पद्मयो
निःसुकेशी च सुलिंगाभगरूपिणी ॥ योनिमुद्रा
महामुद्रा खेचरी खगगामिनी ॥ मधुश्रीर्माधवी
वल्ली मधुमात्ता मदोद्धता ॥ मातंगी शुकहस्ता च
पुष्पबाणेक्षुचापिनी ॥ रक्तांबरधराक्षीवारक्ता
पुष्पवतंसिनी ॥ शुभ्रांबरधराधीरा महाश्वेता
वसुप्रिया ॥ सुवेणी पद्महस्ता च मुक्ताहारविभू

घण्णा ॥ कर्पूरामोदनिश्वासा स्वापद्मिपद्ममंदिरा ॥ खड्गि
नी चक्रहस्ता च भुशुंडी परिघायुधा ॥ चापिनी पा
शहस्ता च त्रिशूलवरधारिणी ॥ सुभाग्या शंखि
हस्ता च मयूरवरवाहना ॥ वरायुधा घटावीरावी
र पानमदोत्कटा ॥ वसुधा वसुधारा च जयायाके
वरीशिवा ॥ विजया च जयंती च सुमस्तनी पाउ
नाशिनी ॥ अंबेनवेल्ली वेदमा...वेरदावरधारि

णी पूतनलाचस्वपूतिलाचबालग्रहविनाशिनी उन्मादी
चस्वपर्वीचकामाख्याकामवादिना जालंधरधरानंता
कामरूपनिवासिनी कामबीजवनीसत्यासत्यधर्मप
रायणा स्थूलमार्गस्थिता सूक्ष्मासूक्ष्मबुद्धिप्रबोधिनी
षट्कोणाचत्रिकोणात्रिनेत्रात्रिपुरसुंदरी वृषप्रिया
वृषारूढामहिषासुरघातिनी सुंभदर्पहरादीप्ता
दीप्तपावकसन्निभा कपालभूषणाकालीकपाल

मालधारिणी कपालकुंडला ह्रीं चों ध्रिवह्नि तिद्युत
धुनिः सिद्धिदा बुद्धिदा नित्या सत्यमार्गप्रबोधि
नी कंबुग्रीवा वसुमती छत्रच्छाया कृतालय
या ॥

नगकुंभीकुंडलिनी भुजंगाकारशायिनी॥ मोक्ष
सत्कप्रपमाचनाभिनालमृणालिनी॥ मला
सारा निराकारा वह्निकुंडकृतालया॥ वायुकुंड
सुखासीना निराधारा निराश्रया॥ श्वासोच्छ्
सगनिर्जीवा ग्राहिणी चक्रसंश्रया॥ वलीतंत्र
सम्यग्यानां षट्सारस्वादलोलुभां॥ नपस्विनी
नपसिद्धिस्वपरः सिद्धदायिनी॥ नपोनिष्ठा

पाण्डुकान्तापसीचतपःप्रिया ॥ मम्मथानमयीम्म

निर्मम्मथात्वंनराश्रया ॥ देहवृष्टिमेनवृष्टिरन्नवृ

ष्टिर्वेलोऽनना ॥ ओषधिर्वैद्यमानाचद्रव्यप्राप्तिश्र

बोधिनी ॥ वैद्यावैद्यचिकित्साचसुपथ्यारोगना

शिनी ॥ मृगयामृगमांसादामृगत्वंमृगलोच

ना ॥ वागुराबंधरूपाचवधरूपावधोद्यता ॥ वंदी

वंदिस्तुताकाराकाराबंधविमोचिनी ॥ शृंखला

भ॰ स॰

खलहाविद्याहृद्बंधविमोचिनी॥ अंबिकाबालि
कांबावाखला साधुजनार्चिता॥ कौलिकीकुल
विद्याधरकुलाकुलपूजिता॥ कालचक्रभ्रमि
धौंताविभ्रमाभ्रमनाशिनी॥ वामालीमेघमाला
सद्गुणैःसस्यवर्धिनी॥ अकाराद्यहकारांवउका
रेकाररूपिणी॥ ह्रींकारीबीजरूपा च क्लींकारां
चरवासिनी॥ सर्वाक्षरमयीमूर्तिरक्षरावर्णमा

भ॰
स॰
११

लिनी ॥ सिंहगा हलवक्त्रा च सिंहगा तिलकप्रि
या ॥ वषणा च वषपवीज्ञा च लोकवषणविभावि
नी ॥ नृपवषणा नृपसेव्या नृपवषणकवीप्रिया
महिषीनृपमान्या च नृमान्या नृपनंदिनी ॥ नृ
पधर्ममयी पन्याधनधान्यविवर्धिनी ॥ चतुर्वे
मयीमूर्त्तिश्चतुर्वेदांश्चपूजिता ॥ सर्वधर्ममयी
सिद्धिश्चतुराश्रमवासिनी ॥ ब्राह्मणी क्षत्रियां

वैष्णवाशूद्राचारवर्णगा ॥ वेदमार्गरतायज्ञा
वेदविश्वविभाविनी ॥ ऋग्वपासाममयीविद्याव
रासास्त्रधारिणी ॥ सुमेधासत्यमेधावभद्र
काल्यपराजिता ॥ गायत्रीसत्कृतिःसंध्यासावि
त्रीत्रिपदाश्रया ॥ त्रिसंध्यात्रिपदीधात्रीसुपर्वासा
मगायना ॥ पंचालीबालिकाबालाबालक्री
डासनातनी ॥ गर्भाधारधराशून्यागर्भाशयापर

निवासिनी ॥ स्तुताविद्यानिनीहृस्यासतनाव
तिलोत्तमा ॥ लज्जा रसवनीनंदा भवानी पा
नाशिनी ॥ पराम्बरधरागी निस्वगी निर्मान
लोचना ॥ सप्तस्वरमयी तंत्री षड्ज मध्यमदेवता
मूर्छनाग्रामसंस्थाना स्वरस्था स्वस्थानवासि
नी ॥ अट्टाट्टहासिनी प्रेता प्रेतासनविवासि
नी ॥ गीतनृत्यप्रियाकामा तुष्टिदा पुष्टिदा

भ० स०
२३

या ॥ निद्रासमस्तप्रिया भद्रालोकेशी च स्वरोमेमा
सविषाज्वालिनीज्वालाविषमोहार्त्तिनाशि
नी ॥ विषारिर्नागदमनी कुहूकुहूलामृतोद्भ
वा ॥ भुजभीतिहरा रक्तभूतावेशविनाशिनी
रक्षोघ्नी रात्रया त्रिशी चैव निद्रादिवागति ॥ चंद्रि
का चंद्रिकांतिश्च सूर्यकांतिर्निशाचरी ॥ डाकि
नी षूणकिनी शिष्या हाकिनी चक्रवाकिनी ॥ सि

भ॰
स॰
१८

नासिनप्रियास्वांगास्त्रकल्पावनदेवता ॥ गुरुरू
पधरागुर्वीमरत्नमोरीविभ्रमरदा ॥ महामार्ती
विनिंचतंत्रामरत्नविनीपिनी ५ चंद्रमंडलसं
काशचंद्रमंडलवासिनी ॥ अणिमादिगुणो
पेतास्वस्पृहाकामरूपिणी ॥ अष्टसिद्धिप्र
दाभोदाडुष्टदानवघातिनी ॥ अमादिनिधना
ध्रुविश्वकर्वीजास्वतनभैरवी ॥ वनःसमस्यय

नाचतुर्वर्गफलप्रदा॥ कामपुष्पवतीकामपामसंकें
वल्लोचना॥ भूतभव्याभविष्याचपौलजापौल
वासिनी॥ वाममार्गरतावामामापिववामांगवा
मिनी॥ वामाचारप्रियावृष्टालोपामुद्राप्रबो
धिनी॥ भूतात्मापरमात्माचभूतभावविभा
विनी॥ मंगलाचरणीलाचपरमार्थप्रबोधि
नी॥ दक्षिणादक्षिणामूर्तिः सुदक्षिणाहरिप्रि

भ॰
स॰
१५

या॥ योगिनी योगमुद्रा च योगांगा ध्यानशालि-
नी॥ योगपट्टधरा मुक्ता मुक्तानां परमागतिः॥ ना-
रसिंही सुजन्मा च त्रिवर्गफलदायिनी॥ धर्मदा
धनदा चैव का कामदा मोक्षदा द्युतिः॥ साक्षिणी-
क्षणदा दक्षा दृतिज्ञा कोटिरूपिणी॥ क्रतुः कात्या-
यनी स्वच्छा स्वच्छंदा च कविप्रिया॥ सत्याग-
मा बहिःस्था च काव्यशक्तिः कवित्वदा॥ मेना

पुत्री सती माता मैनाकभगिनी तडित् ॥ सौधामि
मिनी स्वधामा सुधामा धामशालिनी ॥ सौभा
ग्यदायिनी द्यौश्च सुभगा द्युतिवर्धिनी ॥ श्रीः कृ
त्तिवसना चैव चंडिका कलिनाशिनी ॥ रक्तबी
जवधोः हृष्टा सन्तानबीजसंतति ॥ जगज्जीवाज्ज
गद्धीना जगत्त्रयहितैषिणी ॥ चामीकररुचिं
चांद्री साक्षाद्या षोडशीकला ॥ यत्तत्पदानुबंधा

वयक्तिणीधनदार्चिता ॥ चित्रिणीचित्रमायाचवि
चित्राभुवनेश्वरी ॥ चामुंडामुंडहस्ताचचंडमुंडव
धोद्धुरा ॥ अष्टमेवमदघूर्णीघूर्णानवमीघमदेघणी ॥
अमाकलपाहस्ताचघूर्णोंभधराधरा ॥ अभीरु
भैरवीभीरभीमात्रिपुरभैरवी ॥ महारुंडाचघोरी
चमहाभैरवपूजिता ॥ निर्मुंडाहस्तिनीचंडाक
रालदशनानना ॥ करालाविकरालाचघोरा

भै॰
स॰
२२

दुरनाशिनी॥ रक्तदंतोः पंकेषणी च वंधूककुसुमा
हलगा॥ कादंबरी परा पूगा च कापमीरी ऊँ ऊमभि
या॥ सांतिवि ऋ स्ववर्णा चर तिवेऊ स्ववर्णदा॥ मा
तंगिनी वरारोहा मत्तमातंगगामिनी॥ हिंसाहं
सगतिर्हंसी हंसोज्वलशिरोरुहा॥ पूर्णचंद्रमु
खी श्यामा स्मितास्या मऊँडला॥ मणीचलेख
नीलेखा खलेखालेखकप्रिया॥ शंखिनीपं

त्वहस्ता चनलस्या जलरेचना ॥ अहल्तेश्वा वनिःका
शीमथुरा कांच्यवंतिका ॥ अयोध्या द्वारिका माया
तीर्था तीर्थकरप्रिया ॥ त्रिपुष्करा प्रमेया च कोश
स्था कोशवासिनी ॥ कौशिकी केन्ह अपणा वतीं को
शांबी कोशवर्धिनी ॥ कोशदा पद्मकोशाक्षी अ
ह्मा ऊह्मप्रिया ॥ तोतला च तुला कोटिः कू
टस्था कोटराश्रया ॥ स्वयंभूश्च सुरूपा च स्वरूपा

भ॰
स॰
२७

रूपवर्धिनी॥ तेजस्विनी स्वभिख्या चपलदाय
लदायिनी॥ महाकोपी महाबलोद्धि:सरस
दात्मिका॥ महाग्रहहरा सौम्या विपक्षकाघो
कनाशिनी॥ सात्विकी सत्वसंस्था च राजसी च
रजोवृता॥ तामसी च तमोयुक्ता गुणत्रयविभा
विनी॥ अव्यक्ताव्यक्तरूपा च वेदविद्या च शांभ
वी॥ शंकरा कल्पिनी कल्पा मनःसंकल्पसंत

ति:॥ सर्वलोकवशीकृतिः सर्वश्रवणगोचरा
सर्वज्ञानवतीवांछा सर्वतत्वावबोधिनी॥ जाग्र
तीच सुषुप्तिश्च स्वप्नावस्था तुरीयका॥ त्वरामं
दगतिर्मदा मदिरामोदधारिणी॥ पानभूमिः
पानपात्रा पानदानकरोद्यता॥ आघूर्णारुण
नेत्रा च किंचिदव्यक्तभाषिणी॥ आशापूरा च
दीक्षा च दक्षा दीक्षितपूजिता॥ नागवल्ली नाग

भ॰
स॰
२८

ति

वंन्या भोगिनी भोगवल्लभा ॥ सर्वशास्त्रवनी विद्या
सुसर्वधर्मवाधिनी ॥ श्रुतिः स्मृतिधराज्येष्ठा श्रेष्ठापा
तालवासिनी ॥ मीमांसातर्कविद्या च सुभक्तिर्भ
क्तवत्सला ॥ सुनाभिर्यातनाजातिः गंभीराभाव
वर्जिता ॥ नागपाशधरा मूर्तिरगाधानागकुंड
ला ॥ सुचक्रा चक्रमध्यस्था चक्रकोणनिवासि
नी ॥ सर्वमंत्रमयी विद्यासर्वमंत्राक्षरावलिः ॥ म

भ॰
स॰
२९

ध्रुवकाष्ठवंशीच भ्रामरी भ्रमरालका ॥ मार्तंडमं-
लमध्यस्था मार्तंडमंडलवासिनी ॥ ऊमावजननी-
क्रूराग्रहग्रहाज्वरनाशिनी ॥ अनीलाविघमाना
चभाविनी प्रीतिमंजरी ॥ सर्वसौख्यजनी श्रुति
राहारपथिगामिनी ॥ निदानंप्रचभूतानांभवस-
गरतारिणी ॥ अकृपाचग्रहवनी विग्रहाग्रहवर्जि-
ता ॥ रोहिणी भूमिगर्भा च कालभूः कालवर्ति-

नी॥कलंकरहितानारीचन्द्रःषष्ठमिधावती॥
जीर्णाचजीर्णवृद्धाचनूतनानववल्लभा॥अर
जाश्चरतिःप्रीतीरतिरागविवर्धिनी॥पंचवातग
तिर्भिन्नापंचश्लेष्मागणाधरा॥पंचपित्तवतीपु
क्तिःपंचस्थानविविर्धिनी॥कफवतीकामवती
बहिःप्रस्रवविणीस्पृहा॥रजःशुक्रधराशक्तिःज
रायुगर्भधारिणी॥त्रिकालज्ञात्रिलिंगाचत्रिमू

भ॰
स॰
२०

त्रिंपुरवासिनी ॥ अगाणामिवनत्वाचकंमनत्वाङ्गरा
गिनी ॥ प्राच्यवाचीप्रतीचीदृषदीचीदिग्विदिग्दि
धणा ॥ अहंकृतिरहंकारावालमायावलिप्रिया
स्मकृत्स्ववामामधेनीस्वश्वश्रूश्वश्रूदेवना ॥ माता
मातामहीनप्त्रिःपितृमातापितामही ॥ स्नुषा
दौहित्रिल्लीपुत्रीपौत्रीनप्त्रीपितृष्वप्रिया ॥ स्तन
दास्तनधाराचविश्वयोनिःस्तनंधयी ॥ पिप्श

संगधरादोलादोलाक्रीडाभिनंदिनी ॥ उर्वशी
कदलीकेकाविशिखाशिखिवर्तिनी ॥ खड्ग
धारिणीखड्गबाणपुंखानुवर्तिनी ॥ ल
क्ष्यप्राप्तिःकरालस्यालस्याचश्रुभलक्षण ॥
वर्तिनीस्वपथाचारापरिखाचखनिर्वृतिः ॥
प्राकारवलयावेलामर्यादाचमहोदधी ॥ पो
षणीपोषणीशक्तिःदीर्घकेशीसुलोमश

ललितांमांसलातन्वीवेदवेदांगपारिणी ॥ नरा
सकानमन्नाचनरमुंडास्थिभीषणा ॥ श्राहि
क्रीडारतिःप्रमरीप्रमरिकाम्बुकभाषिणी ॥ पा
खरीगाहडीविद्यावाहल्गीवहल्गविंना ॥ वा
राहीनंडस्रलाचदंष्ट्रोड्नवमुंदरा ॥ मीनस्मृति
धरामस्तोवदन्याप्रतिमाश्रया ॥ स्वमूर्तानि
धिरूपाचमालियामपिलाश्रुचिः ॥ स्मृतिः

भं
सं
२१

संस्काररूपा च सुसंस्काराद्य संस्कृतिः॥ प्राकृ
तादेशभाषा च गाथागीतिः प्रहेलिका॥ इडा च
पिंगला पिंगा सुषुम्णा सूर्यवाहिनी॥ शशि
स्रवा च ताल्वस्था काकिनी मृतजीविनी॥ अण
रूपा बृहद्रूपा लघुरूपा गुरुः स्थिरा॥ स्थावरा जंग
मा देवी कृतकर्मफलप्रदा॥ विषयाक्रांतदेहा
च निर्विशेषा जितेंद्रिया॥ विश्वरूपा चिदानंदा

परंब्रह्मप्रबोधिनी ॥ निर्विकारा च निर्वैरा विरतिः स-
न्यवर्धिनी ॥ उरुषाज्ञा च भिज्ञा च तांनिःश्रेयस्पदा-
यिनी ॥ विविक्तसेविनी प्रज्ञाजननी चिद्वीवर्ज्ञानि
निरीहा च समस्तैका सर्वलोकैकसेविता ॥ सेव
सेवाप्रिया सेव्या सेवाफलविवर्धिनी ॥ कलौ
कल्किप्रिया कालीदुष्टम्लेच्छविनाशिनी ॥ प्र
त्यंचा च धनुर्वेदेषिः खड्गधारा दुरानतिः ॥ अश्व

भ॰
स॰
२२

निःश्चवेलाचरत्तिसम्मत्रयारण्णा ॥ वीरस्तवी
रमालाचवीरस्तवीरनंदिनी ॥ जयश्रीजयदीक्षा
वज्रयस्याजयवर्धिनी ॥ सौभाग्यसुभगाकारा
सर्वसौभाग्यवर्धिनी ॥ क्षेमंकरीसिद्धिरूपास
त्कीर्तिःपथिदेवता ॥ सर्वतीर्थमयीमूर्तिःसर्व
देवमयीप्रभः ॥ सर्वसिद्धिप्रदाशक्तिःसर्वमंग
लमंगला ॥ १००० ॥ पुण्यंसहस्रनामेदमंबा

याशिवभाषितम्॥ यः पठेत्प्रातरुत्थाय शुचिर्भू
त्वासमाहितः॥ यश्चापिश्रृणुयान्नित्यंनरोनिश्च
लमानसः॥ एककालंद्विकालंवात्रिकालंश्र
द्धयान्वितः॥ सर्वदुःखविनिर्मुक्तोधनधान्यस
मन्वितः॥ तेजस्वीबलवान्शूराः शोकरोगवि
वर्जितः॥ यशस्वीकीर्तिमानधन्यः सुभगोलो
कपूजितः॥ रूपवान्गुणसंपन्नः प्रभावीर्यसम

भ॰
स॰
२३

न्वितः॥ श्रेयांसि लभते नित्यं निश्चलां च शुभा
श्रियं॥ सर्वपापविनिर्मुक्तो लोभक्रोधविवर्जि
ता॥ नित्यं बंधुसुतनाधारा पुत्रपौत्रमहोत्सवैः॥
नं रिनस्मे विनोभृत्यैर्वैकुभिशुचिमानसैः॥वि
घ्यानां पारगो विप्रः सात्त्विको विजयेरणे॥ वैषण
त्वधनलाभाढ्यः शूद्रः सुखमवाप्नुयात्॥ उ
थार्थे लभते पुत्रान्नार्थी विपुलं धनं॥ इपका

भ॰
स॰
२४

कामंनमार्थीधर्मार्थीधर्ममेवचरेयं ॥ कन्यार्थील
भतेकन्यांरूपशीलगुणान्वितां ॥ तत्रैवचवऊ
मस्यंस्याम्नावस्त्वेवऋडुत्यदा ॥ नास्तुभेनापर
स्मस्यनभयंन्नपथ्युद्भवः ॥ जायतेनास्तुभात्तुडि
लभतेअलडुर्पनं ॥ नचाधर्मेग्रहला स्मस्पन
रत्तांसिनपन्नगाः ॥ नपिशाचानडाकिन्यो
भूतावेतनरांडुकाः ॥ बालग्रहाअभिभूतानां

वालानां मृत्युनिवारकं ॥ द्वंद्वानां प्रनिभेदे च मैत्री
करणमुत्तमं ॥ लोहपाशै दृढंबद्धो वंदिवेश्म
नि दुर्गमे ॥ तिष्ठंश्रवणात्पठनान्मोक्षमुच्यते नात्र सं
शयः ॥ न दाराणां न पुत्राणां न बंधूनां न मित्रज
म् ॥ प्रपश्यंति न हि ते शोकं वियोगं चिरजीविनः
मंधत्वलभमे दृष्टिवत्तु रोगैर्न वाध्यते ॥ बधिरः
श्रुतिमाप्नोति मूको वाचं शुभां नरः ॥ पनकू

भोच यान्तारी स्थिरगर्भा प्रजायते ॥ स्नाविलीश्च

द्गर्भाच स्वमेव प्रसूयते ॥ कुष्ठिनः नीरोदेह

हयेगतकेणनत्वन्वच ॥ पठनाच्छ्रवणाद्धा

पिरिक्वका याभवन्ति ॥ येपठंति सदा मर्त्या

अविष्मजो जितेंद्रिया ॥ अपुत्रा प्राप्नुयःपुत्रा

श्रणुतो पिनसंशय ॥ महाव्याधि परिग्रस्ता

लभायेविविधैर्नरैः ॥ भक्ताभिषडू संज्ञाने

म॰ स॰ २९

मान्त्रिकमनीयकैः॥ अमेश्वरा हलोरोगैः पी
डमानाश्च मानवाः॥ गतबाधाः प्रजायंतेनैके
मानाश्च संग्रामः॥ श्रुतग्रंथधरोबालो दिव्यवा
दीकवीश्वरः॥ पठनाच्छ्रवणाद्वापि भवत्येवन
संशयः॥ अष्टम्यां वा चतुर्दश्यां नवम्यां चैवकार्ये
नराः॥ येपठंतिसदामर्त्या गतेवदुःखभाजनाः
नवरात्रं जिताहारो दृढभक्तिर्जितेंद्रियः॥ वं

ठिकायननेविद्वांशुचिष्मान्मनिसंनिधौ॥ एकाकी
ह्यमनावर्तेपठन्धीरश्चनिर्भयः॥ सासाङ्गवती
नेम्मेघयक्षेसीप्सितंफलं॥ सिद्धपीठेगिरौरम्ये
सिद्धक्षेत्रेसुरालये॥ पठनात्साधकस्याशुसि
द्धिर्भवतिवांछिता॥ दशमावर्तेपठेद्यस्तुभूमि
शायीनरःशुचि॥ स्वप्नेमूर्तिमतींदेवींवरदांसो
पिपश्यति॥ ग्यावर्तेनसहस्रैर्येपठंतिद्रुहषो

भ
स॰
२६

त्मा ॥ नेमिद्रा: सिद्धिदा लोकप्रणपानुग्रह
योत्तमा: ॥ कवित्वे संस्कृते नेषां प्रणम्या एण
व्याकृतौ स्वतः ॥ प्राज्ञि: प्रोन्मीलयते सांने नची
तै प्रपि भावती ॥ नखरागपिरोरत्न हिगुणी
कृतरोचिष: ॥ प्रयच्छन्तु समर्थं संसेवते लाभ
हेश्वरा: ॥ रोचना लिखितं धत्ते ॐ ॐ मेनम्रु
भेदिने ॥ धारयेद्यंत्रिमं देवप्रसन्न यंत्रा ॐ मारि

भ॰
स॰
२७

का॥ विप्रांश्च वरनारीश्च पूपैः अन्नमचंदनै॥ वीर
त्वं उज्यभोज्यं श्च भोजयित्वा सुभूषिताः॥ यथे
नि ये महारसां बालानां च विशेषतः॥ भवंति
नृपपापास्ते कीर्तिभाजो यशस्विनः॥ याव
तो न भयं ते षां दुर्जनेभ्यो न राजतः॥ न च दारा
भिचारेभ्यो न दारिद्र्यान्न दुर्गते॥ महार्णवे
महाघोरे पोतस्थे पिन भेद्भाचित॥ रणे हतेपि

वारेच विजयं ग्राम्यवंनिते ॥ न्रपाश्चवयमनांयां
तिन्रपमान्याश्चयेनरा: ॥ सर्वेत्रप्रमितालोके
वक्रमानपुरस्मरन् ॥ रतिरागाविरूढाश्चविक्र
मारकमपीडिता: ॥ यौवनाक्रांतदेहास्याश्च
यैनेवासमलोचना: ॥ लिखितं मर्पिकंठेवाधार
येघारसेगुचि: ॥ समप्रधाउज्ञमानंतंप्रतियो
हानपपपनि ॥ केनवौडंडुभायेषांतिष्ठेहलि

रिवितं रणे॥ मायासैन्यपरिग्रस्तान्कांदिशीका
हतोजनः॥ विचेतनान्विमूढांश्च पापबद्धकृपा
विवर्जितान्॥ निर्जितप्राणसंचारांल्लभते
विजयं ध्रुवं॥ नाभिचारो न पापघ्नबालवीरा
दिकीलनम्॥ डाकिनीपूतनाकृत्यमहामा
रीविपाकिनी॥ भूताप्रेतापिशाचाश्चरक्षां
सिव्यंतरादयः॥ नविशन्ति गृहे देहे लिखितं

भै॰
सं॰
२८

पद्मनिरुत्ति ॥ नपापानलतो योगाङ्गयंतस्योप
माघते ॥ दुर्द्दैवानां च पापानां बलहानिकरं
परं ॥ मंदुराकरिपूणलाहृगवांगोहेसम्यगहि
ता: ॥ पठेन्नरो षषणाम्यथैकूटपाकलनाख्यं
यमहूतानपदर्पतिनतेनिरयपातनं ॥ सर्वथा
धासहेयाराहसर्वदुःखनिवारणं ॥ सर्वमंगल
कन्हवंपपदिनवंसमाहिते: ॥ श्रोतव्यंचस

हामन्त्रोपरंसत्त्वमयनंमहत्॥ सहस्रनामकंपुण्यं
मंत्राद्याहृद्भाषितम्॥ चतुर्वर्गप्रदंसम्यंनंदिके
नप्रकाशितं॥ नानापरतरोमंत्रोनानापरतरः
स्तवः॥ नानापरतराविद्यानतीर्थंनानापरंपदं।
नैधन्याकृतपुण्यानांस्तेनपव्वधविप्रज्ञिनाः॥ ए
कभावंसुरानित्यंयेचर्चयंतिमहेश्वरी॥ देवता
नोदेवतायाश्रस्तासैर्याचपूजिना॥ भूयात्सा

भ॰
स॰
२९

वरदालोकेसाधकानांविष्णुमंगला ॥ एतामेवपु
राराध्यविद्यांत्रिपुरभैरवी ॥ त्रिलोक्यमोहनं
रूपंमाकाक्षोभगवान्महेश्वर ॥ इतिश्री रुद्रया
मलेतंत्रे नंदिकेश्वरसंवाद भवानीनामसहस्र
नवरात्नःसमाप्तः जप्रपापहरंअनंतबलकरं
संपज्जिनंश्रीकरं ॥ ध्यानंमानकरंस्तुतंपद
करंसभाषितंसिद्धिदं ॥ गोतंसंहरितंक्रि

नंघनतुलेनेपादपद्मद्वयं॥ भक्तानांभवभीतिभंज
नकरंसिद्धप्रदंपातुमाम्॥ ३ शुभमस्तु ३ भं
श्री गणेसाय नमः संवत १९१८ ६॰ आनव
टिं हू का विकाइं थि लि बतजा गा फा
गन कोटु दवेदि लिके [illegible] धं ॥ ॥

भं सं ३०

जवेसिंहं : ५

स्त्रुचमंत्र ॐ नमो भगवते

मातृ लां वुधि संमनं कुरु

कुरु स्वाहा मात्रशोक नर १०८

मंत्र जपे सिद्धिः ९० ॐ नमो

भघंकराय वज धारिणी मे

मातृ सैन्य पलाय मकुरु कुरु

स्वाहा ॥ इ शत्रुक नरम मंत्र

ॐ नमः चंडिकायै ॥ ॐजातवेदसेति मंत्रः ॥ जातवेशिखा-
यां ॥ वेदसे ललाटे ॥ सुनवाम कर्णयोः ॥ सोमं नासि-
कायां ॥ अराति चक्षुषोः ॥ यतनोष्ठयोः ॥ निदं दंतेषु ॥ द-
हाति ताल्लुनिः ॥ वेद जिह्वायां ॥ स ग्रीवायां ॥ नावा-
ह्वोः ॥ पर्षत् हृदि ॥ अति स्तनयोः ॥ दुः ऊदरो ॥ गानि ना-
भौ ॥ विश्वा पृष्ठे ॥ नावि पार्श्वा ॥ यक्षयोः ॥ सिंधुं शि-
श्ने ॥ दुः कट्यां ॥ इत ऊर्वोः ॥ अति जंघयोः ॥ अग्निः पादयोः

श्रीमन्नारास्त्ररारान्नूवरण्यां भोहहृदयी ॥ चराचरजगद्धा१
त्रीचंडिकां प्रणमाम्यहं ॥ १ ॥ शिरोरक्षतुब्रह्माणीमुखे
माहेश्वरीतथा ॥ कौमारीहृदयंरक्षेदुदरेवैस्नवीपरा
२ ॥ वाराहीचकट्यंगुल्फेमेंद्रेचोरूसदामम ॥ चामुंडाना
नेरेथांनपादोरक्षतुचंडिका ॥ ३ ॥ कंकटिकांभुजौपृष्ठे
दशपादभुजाननना ॥ अंगप्रत्यंगसंधीचसदारक्षतुमा
रः ॥ ४ ॥ नमोमंडलजांदेवींचंडिकानाममीश्वरीं ॥ अ१

ण्मममयसंयुक्तं पूजयेत विचक्षणः ॥ ४ ॥ सप्तमंडलगां
देवीं चंडिकानाममनोच्चरी ॥ गुहप्रणवसंयुक्तां देवीए
ज्ञां तत्कारयेत ॥ ६ ॥ पूजायेत्पूजन वैव्हैवतनत सन्निमित्तुनय
यं ॥ प्रथमं पूजयेत्कूटं पूजयेद्रूनिकाष्टकं ॥ ७ ॥ पूज्या
श्वाष्टौ च दिक्पालाः पूजातेषस्य मंडले ॥ वाहनं पूजये
द्व्यानं तं येन चराचरं ॥ ८ ॥ पंचप्रणवसंयुक्तां तामसी
वेव पूजयेत ॥ ॐ ह्रां ह्रीं ह्रूं ब्राह्म्यां नमः ॥ ॐ ह्रीं नर्मनी

ॐह्रूं मध्यमाभ्यां नमः ॥ ॐह्रैं अना ॥ ॐह्रौ कनि ॥ ॐह्रः
करतलकरपृष्ठाभ्यां नमः ॥ इति करन्यासः ॥ एवं षडंगन्या
मः ॥ ॐह्रां ग्लां ग्लीं गणपतये नमः ॥ ॐह्रीं क्षौं क्षौं क्षेत्रपाला
यनमः ॥ ॐह्रीं नीलाय कृष्णाय महिषाय नमः ॥ ॐह्रीं व
नस्पतिपुत्राय सिंहासनाय नमः ॥ इति द्वारपालाः ॥ ॐ
ह्रीं ब्रह्मणे नमः ॥ ॐह्रीं ब्राह्मण्यै नमः ॥ ॐह्रीं विष्णवे न
मः ॥ ॐह्रीं वैष्णव्यै नमः ॥ ॐह्रीं रुद्राय नमः ॥ ॐह्रीं रुद्रा

स्यैनमः॥ इतिमिथुनत्रयंदेवीपूजनः॥ ॐ ह्रीं कौमार्यै
नमः॥ ॐ ह्रीं वाराह्यैनमः॥ ॐ ह्रीं माहेश्वर्यैनमः॥ इतिर
त्रिणे॥ ॐ ह्रीं चंडिकायैनमः॥ ॐ ह्रीं चामुंडायैनमः॥ ॐ
ह्रीं महालक्ष्म्यैनमः॥ इतिदेवताचितयंपूजनः॥ ॐ नमः
पिनाकिनिकिनि॥ २॥ त्रिशूलंखड्गहस्तेनपाहि॥ २॥ श्म
गकागक्कएजोरहस्रु॥ २॥ सर्वसिद्धिंकुरु॥ २॥ ॐ ह्रीं चंडि
कायैनमः इष्याह्वानं॥ ॐ ह्रीं चामुंडायनमः॥ ॐ ह्रीं चा

दु॰ ए॰ ३

मुंडस्कंनेनमः॥ ॐ ह्रीं सः महागौरिचंडिकात्यायनिनमः॥
इति मूलमंत्रः॥ ॐ ह्रीं विंध्यवासिन्यैनमः॥ ॐ ह्रीं रक्तदं
तिकायैनमः॥ ॐ ह्रीं शताक्ष्यैनमः॥ ॐ ह्रीं शाकंभर्यै
नमः॥ ॐ ह्रीं भ्रामर्यैनमः॥ इति पूजा॥ ॐ ह्रीं चंडिके दी
पं गृह्ण॥२॥ स्वाहा धूपं गृह्ण॥२॥ समालभनमर्घ्यं नैवेद्यं
इति पूजांते॥ ॐ ह्रीं चंडिके चामुंडे गणपति क्षेत्रपाल स
हित पूजां गृह्ण॥२॥ स्वाहा॥ अनेन विधिना यस्तु पूज

यित्वा यथा वाचयेत ॥ न तस्मै देव्याः प्रत्यक्षं नित्यं निवि तरं निमहद्ध
नं ॥ अनेन विधिना यत्न विहीनं पुस्तकं पठेत ॥ न तस्य त
ष्यं भवेत्तत्र यथेमरणेन हधितं यथा ॥ ददाति विपुलां सिद्धिं
ददाति विपुलं धनं ॥ यो यत्नयेत्तस्य द्विः स्यात्ते मं प्राप्नोति
यत्नयतं ॥ पुस्तकं सम्प्रथानिकमनेन विधिनार्चयेत ॥ स
र्वान्कामानवाप्नोति हस्य वचनं यथा ॥ इति सप्तश
तिकास्तनाविधिं समाप्तं ॥ शुभं ॥ शुभमस्तु ॥ ॥ ॥

पु॰
१॰
४

ॐ श्रीमार्कंडेयउवाच ॥ श्रीमत्सुरासुराराध्यचरणांभो

रुहद्वयी ॥ चराचरंजगद्धात्रीं चंडिकांप्रणमाम्यहं ॥१॥ ना

रदउवाच ॥ यद्गुह्यंपरमंलोकेसर्वरक्षाकरंनृणां ॥ यन्न

कस्यचिदाख्यातंतन्मेब्रूहिपितामह ॥२॥ श्रीब्रह्मोवाच

अस्तिगुह्यतमंविप्रसर्वभूतोपकारकं ॥ देव्यास्तुकव

चंपुण्यंतच्छृणुष्वमहामुने ॥३॥ प्रथमंशैलपुत्रीति च

द्वितीयंब्रह्मचारिणी ॥ तृतीयंचंद्रघंटेतिकूष्मांडेतिच

तुर्थकं ॥४॥ पंचमंस्कंदमातेति षष्ठंकात्यायनीतिच ॥ स
प्तमंकालरात्रीति महागौरीतिचाष्टमं ॥५॥ नवमंसिद्धि
धात्रीच नवदुर्गाः प्रकीर्तिताः ॥ उक्तान्येतानि नामानि
ब्रह्मणैव महात्मने ॥६॥ अग्निनादह्यमानस्तु शत्रु
मध्यगतोरणे ॥ विषमेदुर्गमेचैव भयार्ताः शरणंग
ताः ॥७॥ नतेषांजायतेकिंचिदशुभंरणसंकटे ॥ नाप
दंतस्यपश्यंति शोकदुःखभयंकरी ॥८॥ यैस्तुभक्त्या

स्मनान्तनांतेषांहृदिःप्रजायते॥ येनसंस्थानतचाम्येरा
वाराहीमहिषासना॥२०॥ ऐंद्रीगजसमारूढावैसवी
गरुडासना॥ माहेश्वरीवृषारूढाकौमारीशिखिवाह
ना॥२१॥ लक्ष्मीपद्मासनादेवीपद्महस्ताहरिप्रिया॥
श्वेतरूपाधरादेवीईश्वरीवृषवाहना॥२२॥ ब्राह्मीहंस
समारूढासर्वाभरणभूषिता॥ नानाभरणशोभाढ्या
नानारत्नोपशोभितं॥२३॥ दृश्यंतेरथमारूढादेव्या

क्रोधसमाकुला ॥ पांचजन्यं गदां पद्मं किहलं च मुसलायु
धं ॥ २३ ॥ खेटकं तोमरं चैव परशुं पाशमेव च ॥ कुंतायुधं
त्रिशूलं च शार्ङ्गमायुधमुत्तमं ॥ २४ ॥ दैत्यानां देहनाश
य भक्तानामभयाय च ॥ धारयंत्यायुधानि[illegible]देवाना
मपि दुर्लभं ॥ २५ ॥ नमस्तेस्तु महारौद्री महाघोर
पराक्रमे ॥ महाबले महोत्साहे महाभयविनाशि
नी ॥ २६ ॥ त्राहि मां देवि दुःप्रेक्ष्ये शत्रूणां भयवर्द्धिनि ॥

माचांरक्तकमामैंडीमाग्नेयामग्निदेवता॥२७॥रक्तलो

रक्तवाराहीनेन्द्रत्वांरक्तकुधाविणी॥ ऊर्ध्वब्र[illegible]

ोद्धायचांमयवाहिनी॥२८॥डरीचांरक्तकौमारीई१

यान्यांस्थलधाविणी॥ ऊर्ध्वब्रह्माणिमेरक्षेदधस्ता

द्वैस्रवीनघा॥२९॥एवंदशदिशोरक्षेसामुंडाशववा

हना॥ जयामेचाग्रतःस्यातविजयास्यात्तुपृष्ठतः

॥ अजितावामपार्श्वेतुदक्षिणेचापराजिता॥ शि

३०॥

मनीचांवारुणी

खामुद्योतिनीरक्षेदुमामूर्ध्निव्यवस्थिता॥२१॥मालाधरी
ललाटेचभ्रुवौरक्षेद्यशस्विनी॥त्रिनेत्राचभ्रुवोर्मध्येयम
घंटाचनासिके॥२२॥शंखिनीचक्षुषोर्मध्येश्रोत्रयोर्द्वा
रवासिनी॥कपोलौकालिकारक्षेत्कर्णमूलेचशंकरी
२३॥नासिकायांसुगंधाचउत्तरोष्ठेनचर्चिका॥अधरेचा
मृतकलाजिह्वायांचसरस्वती॥२४॥दंतान्रक्षतुकौमा
रीकंठमध्येतुचंडिका॥घंटिकांचित्रघंटाचमहामाया

वत्सलके॥२५॥कामाता चिबुकं रक्षेत्कंठाच मे सर्वमंगला
ग्रीवायां भद्रकाली च पृष्ठं पातु धनुर्धरी॥२६॥नीलग्री
वा वह्निः कंठे नालिकां नलकूबरी॥ स्कंधयोः खड्गिनी
रक्षेद्वाहू मे वज्रधारिणी॥२७॥हस्तयोर्दंडिनी रक्षेदंबि
का चांगुलीस्तथा॥ नखान् शूलेश्वरी रक्षेत्कक्षौ रक्षे
न्नलेश्वरी॥२८॥स्तनौ रक्षेन्महादेवी मनःशोकविनाशि
नी॥ हृदये ललितादेवी उदरी शूलधारिणी॥२९॥ना

मौ॥ कामिनीरक्षेज्ज्ञानेनी विंघवासिनी॥ जंघेमहाबले रक्षेत्सर्वकामप्रदायिनी॥२०॥ गुल्फयोर्नारसिंहीच पादपृष्टेचतेजसी॥ पादांगुलीश्रीधरेरक्षेत्पादाधस्थ लवासिनी॥२१॥ दंष्ट्राकरालिनीरक्षेत्केशांश्चैवोर्द्धके शिनी॥ रोमकूपेषुकौमारीत्वचंवागीश्वरीतथा॥२२ रक्तमज्जावसामांसान्यस्थिमेधांसिपार्वती॥ अंत्रा णिकालरात्रीचपित्तंचमुकुटेश्वरी॥२३॥ पद्मावतीपर

१९

श्री
कं
८

मकोशोकाफेसदामलिरलया॥ज्वालामुखीनखाज्वा
लामभेद्यासर्वसंधिषु॥३४॥शुक्रंब्रह्माणिमेरक्षेच्छा
यंछत्रेश्वरीतथा॥अहंकारंमनोबुद्धिंरक्षमेसर्वधारि
णी॥३५॥प्राणापानौतथाव्यानंउदानंचसमानकं
वज्रहस्ताचमेरक्षेत्प्राणांकल्यंचशोभने॥३६॥रसेरू
पंचगंधंचशाद्बस्पर्शश्चयोगिनी॥सत्वंरजस्तमश्चैव
रक्षेन्नारायणीसदा॥३७॥आयुर्मेरक्षवाराहीधर्मंर

दु॰ श॰ ८

त्वं वैष्णवी॥ यशः कीर्त्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी
३८॥ गोत्रमिंद्राणि मे रक्षेत्पशून्मे रक्ष चंडिके॥ पुत्रान्रक्षेन्म
हादेवी भार्यां रक्षतु भैरवी॥ ३९॥ पंथानं सुपथा रक्षेन्मार्गे
क्षेमंकरी तथा॥ राजद्वारे महालक्ष्मी विजयः सर्वतः स्थि
ता॥ ४०॥ रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु॥ तत्स
र्वं रक्ष मे देवी जयंती पापनाशिनी॥ ४१॥ पदमेकं न गच्छे
त्तु यदीच्छेच्छुभमात्मनः॥ कवचेनावृतो नित्यं यत्र यत्रै

वगच्छति॥४२॥नज्वलज्ज्वायेलाभश्चविज्ञयस्सर्वेकामि
का॥ यंयंचिंतयतेकामंतंतंमाप्नोतिनिश्चितं॥४३॥
परमैश्वर्यमतुलंप्राप्नोतिविपुलांश्रमान्॥ निर्भयो
जायतेमर्त्यःसंग्रामेष्वपराजितः॥४४॥त्रैलोक्येचभ
वेत्पूज्यःकवचेनावृत्ताःश्रमान्॥ इदंतुदेव्याःकवचंदे
वानामपिदुर्लभं॥४५॥यःपठेत्प्रयतोनित्यंत्रिसंध्यंश्र
द्धयान्वितं॥ दैवीकलाभवेत्तस्यत्रैलोक्येष्वपराजिताः

नीवेदूर्षणानंसाग्रमपम्हमुविवर्जितः॥न यंपंनिव्याध
यः सर्वेलूताविस्फोटकादयः॥४७॥स्थावरंजंगमं
वापिकृत्रिमंवापियद्विषं॥अभिचाराणिसर्वाणिमं
त्रयंत्राणिभूतले॥४८॥भूचराखेचराश्चैवजलजाश्चोप
देशिकाः॥सहजाजलमालाडाकिनीशाकिनीतथा
४९॥अंतरिक्षचराघोराडिंभाश्चमहाबलाः॥ग्रहभूत
पिशाचाश्चयक्षगंधर्वराक्षसाः॥५०॥ब्रह्मराक्षसवेताला

पुं॰ सं॰ १०

कूष्मांडभैरवादयः॥ नपश्यंतिदृशोनान्नस्यकवचेहरिसंस्थि
ते॥५१॥ मानोन्नतिर्भवेद्राज्यंतेजोवृद्धिकरंपरं॥ यथासाव
ईतेसोपिकीर्त्तिमंडितभूतले॥५२॥ नपीत्वमप्रांतीचंडीरु
ल्लावत्कवचंपुरा॥ यावद्भूमंडलंधत्तेसशैलवनकाननं॥५३
नावन्निष्ठतिमेदिन्यांसंततिःपुत्रपौत्रकी॥ देहांतेपरमंस्था
नंयत्सुरैरपिदुर्लभं॥५४॥ प्राप्नोतिपुरुषोनित्यंमहामाया
प्रकृतः॥५५॥ इतिश्रीब्रह्माहरिहरविरचितेरेवाखंडेवपंसं

अर्गला॥ ॐ नमः चंडिकायै॥ ऋषिरुवाच॥ ॐ जयंतीमं
गलाकालीभद्रकालीकपालिनी॥दुर्गाक्षमाशिवाधा
त्रीस्वाहास्वधानमोस्तुते॥१॥मधुकैटभविद्राविविधा
तृवरदेनमः॥रूपंदेहिजयंदेहियशोदेहिद्विषोजहि॥
२॥महिषासुरनिर्नाशिविधात्रसुरवरदेनमः॥रूपंदेहि
जयंदेहियशोदेहिद्विषोजहि॥३॥रक्तबीजवधेदेविचं
डमुंडविनाशिनी॥रूपं०॥४॥शुंभस्यैवनिशुंभस्यधूम्रा

दु॰ अ॰ १

सद्दैमर्दिनी ॥ रूपं ॥ ५ ॥ अचिंत्यरूपचरिते सर्वशत्रुवि
नाशिनी ॥ रूपं ॥ ६ ॥ वंदितांघ्रियुगे देवि देवि सौभाग्य
दायिनि ॥ रूपं ॥ ७ ॥ नतेभ्यः सर्वदा भक्त्या चंडिके दुरिता
पहे ॥ रूपं ॥ ८ ॥ स्तुवद्भ्यो भक्तिपूर्वं त्वां चंडिके व्याधि
नाशिनी ॥ रूपं ॥ ९ ॥ चंडिके सततं ये त्वामर्चयंतीह भ
क्तितः ॥ रूपं ॥ विधेहि देवि कल्याणं विधेहि विपुलां श्रि
यं ॥ रूपं ॥ ११ ॥ विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः

हूपं·॥१२॥ प्रचंडदैत्यदर्पघ्ने चंडिके प्राणनायके ॥ हूपं
१३॥ सुरासुरशिरोरत्ननिर्घृष्टचरणेंबिके ॥ हूपं·॥१४
विद्यावंतं यशस्वंतं लक्ष्मीवंतं जनं कुरु ॥ हूपं·॥१५॥ देहि
सौभाग्यमारोग्यं देहि देहि देवि परं सुखं ॥ हूपं॥१६॥ रूपमे
नसंस्तुताहे देवि शत्रुवर्गभयापहे सदांबिके ॥ हूपं॥१७॥ हिमा
चलसुतानाथसंस्तुते परमेश्वरि ॥ हूपं॥१८॥ इंद्राणीप
तिसद्भावसुजिते परमेश्वरि ॥ हूपं·॥१९॥ देविप्रचंडदो

दु·
ष·
२२

ईऽदैमारपविनाशिनी ॥ रूपं ॥ २० ॥ देविभक्तजनोद्दाम
दत्तानंदोदयेंविके ॥ रूपं ॥ २१ ॥ पत्नीमनोरमांदेविमनो
वृत्तानुसारिणीं ॥ तारिणींदुर्गसंसारसागरस्यकुलो
द्भवां ॥ २२ ॥ इदंस्तोत्रंपठित्वातुमहास्तोत्रंपठेन्नरः ॥ स
प्तशतींसमाराध्यवरमाप्नोतिसंपदः ॥ २२ ॥ इतिश्रीअ
र्गलास्तुतिः ॥ ॐनमःचंडिकायै ॥ विशुद्धज्ञानदेहाय
त्रिवेदीदिव्यचक्षुषे ॥ श्रेयःप्राप्तिनिमित्तायनमःसो

माहेश्वरिले॥१॥सर्वमेतद्द्विनायस्त्वमंत्राण्णामपिकी
लकं॥सोपिविद्येमसवाप्नोतिसततंजप्यतन्मरः॥२॥
सिद्धांत्वस्यारनादीनिवस्तूनिसकलान्यपि॥एतेन
स्तवतांनित्यंस्तोत्रहृदयेनसिध्यति॥३॥नमंत्रमोषधं
तत्रनकिंचिदवशिष्यते॥विनाजाप्येनसिद्धेनसर्व
वेमुच्चाटनादिकं॥४॥समग्राण्यपिसिद्धानिलोकशं
कामिमांहर॥कृत्वानिमंत्रयामासमसर्वमेवमिदंशु

मं ॥५॥ स्तोत्रं वै चंडिकायास्तु तच्च गुप्तं चकार सः ॥ समा
प्तो यं स पुण्येन तां यथावन्निमंत्रणां ॥६॥ सोपि क्षेम
मवाप्नोति सततं जाप्यतत्परः ॥ कृष्णायां वा चतुर्द
श्यामष्टम्यां वा समाहितः ॥७॥ ददाति प्रतिगृह्णाति
नान्यथैषा प्रसीदति ॥ इत्थं रूपेण कीलेन महादेवे
न कीलितं ॥८॥ यो निःकीलां विधायैनां नित्यं जपति
संस्फुटं ॥ स सिद्धः सगणः सोपि गंधर्वो जायते वने ॥

नचैवापाद्यतेतस्यभयंक्वापिनतायते॥ नाल्पमप्युपशं
यातिस्त्रोमोहमवाप्नुयात॥२०॥ ज्ञात्वाप्यारभ्यकवी
नस्यकुर्वीत्योविनश्यति॥ ततोज्ञात्वैवसंपन्नमिदंप्रार
भ्यतेबुधैः॥२१॥ सौभाग्यादिचयत्किंचितदृश्यतेलर
लनाननैः॥ तत्सर्वंत्वप्रसादेनतेनजाप्यमिदंशुभं॥२२
ध्यानेस्तुजाप्यमानेस्मिंस्तोत्रेसंपत्तिरुच्चकैः॥ भवत्ये
वसमग्रापितनः प्रारभ्यमेवतत॥२३॥ ऐश्वर्येणत्वमसा

दु॰
की॰
१८

देनसौभाग्यारोगसंपदं॥ शत्रुहानिपरोमोक्षः स्तू
यतेसानकिंजनैः॥ १४॥ इतिभगवत्याःकीलकंसमा
प्तम्॥ शुभं॥

२२	३४	११	१
६	३	१८	३:
३३	२८	७	३२
२	५	२२	१५

ॐ ह्रीं यंत्रस्य

गंधेनैलीषणजालेदा
मधणदिववका

म	ङ	७	२	
क्त	५	७	६	
५	७	७	श्री	



ॐ नमः सरस्वत्यै ॥ नमः चंडिकायै ॥ तपस्विनं
महात्मानं मार्कंडेयं महामुनिं ॥ व्यासशिष्यो म
हातेजा जैमुनिं परिपृछति ॥ १ ॥ श्रीमार्कंडेय उ
वाच ॥ सावर्णिः सूर्यतनयो यो मनुः कथ्यतेष्ट
म ॥ निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥ २ ॥
महामायानुभावेन यथा मन्वंतराधिपः ॥ स ब
भूव महाभागः सावर्णिं तनयो रवेः ॥ ३ ॥ स्वारो

चिषेंतरे पूर्वं चैत्रवंशसमुद्भवः॥ सुरथोनामराजाभू
त्समस्तेक्षितिमंडले॥४॥तस्यपालयतः सम्यक्प्रजा
पुत्रानिवौरसान्॥ बभूवुः शत्रवोभूपाःकोलावि
ध्वंसिनस्तदा॥५॥तस्यैरभवद्युद्धमतिप्रबलदंडि
नः॥न्यूनैरपिसतैर्युद्धेकोलाविध्वंसिभिर्जितः॥
ततःस्वपुरमायातोनिजदेशाधिपोभवत्॥आक्रां
तःसमहाभागस्तैस्तदाप्रबलारिभिः॥७॥अमात्यै

श्री
दु.
२

र्बलिभिर्दुष्टैर्दुर्बलस्यदुरात्मभिः॥ कोशोबलंचापह
तंतत्रापिस्वपुरेततः॥८॥ ततोमृगयाव्याजेनहृत-
स्वाम्यःसभूपतिः॥ एकाकीहयमारुह्यजगामग
हनंवनं॥९॥ सतत्राश्रममद्राक्षीद्द्विजवर्यस्यमेध
सः॥ प्रशांतश्वापदाकीर्णंमुनिशिष्योपशोभितं
१०॥ तस्थौकिंचित्सकालंचमुनिनातेनसत्कृ-
तः॥ इतश्चेतश्चविचरंस्तस्मिन्मुनिवराश्रमे॥११॥

सोचिंतयन्नतदानत्र ममलोकस्य चेतसः ॥ मन्त्रैः
पालितं पूर्वैर्मयाहीनं पुरं हितन ॥ २१ ॥ मद्भृत्यैस्तैर
सद्वृत्तैः धर्म्मतः पाल्यतेनवा ॥ नजानेसप्रधानो
मेशूरहस्तीसदामदः ॥ २२ ॥ ममवैरिवशंयातः
कान्भोगानुपलप्स्यते ॥ येममानुगतानित्यं प्रसाद
धनभोजनैः ॥ २३ ॥ अनुवृत्तिं ध्रुवंतेघकुर्वन्त्यन्यम
हीभृतां ॥ असम्य ग्व्ययशीलैस्तैः कुर्वद्भिःसत

श्री
दु.
३

तं व्ययम् ॥२५॥ संचितः सोतिदुःखेन क्षयं कोषो गमि
ष्यति ॥ एतच्चान्यच्च सततं चिंतयामास पार्थिवः
॥२६॥ तत्र विप्राश्रमाभ्यासे वैश्यमेकं ददर्श सः ॥
स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेत्र कः ॥२७॥ स
शोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे ॥ इत्याकर्ण्य
वचस्तस्य भूपतेः प्रणयोदितं ॥२८॥ प्रत्युवाच स तं
वैश्यः प्रश्रयावनतो नृपं ॥ वैश्य उवाच ॥ समाधि

नामवैश्योहमुत्पन्नोधनिनांकुले ॥१९॥ पुत्रैर्दारैर्नि
रस्तश्चधनलोभादसाधुभिः ॥ विहीनस्वजनैर्दा
रैःपुत्रैरादायमेधनं ॥२०॥ वनमभ्यागतोदुःखीनि
रस्तश्चाप्तबंधुभिः ॥ सोहंनवेद्मिपुत्राणांकुश
लाकुशलात्मिकां ॥२१॥ प्रवृत्तिंस्वजनानांचदारा
णांचात्रसंस्थितः ॥ किंनुतेषांगृहेक्षेममक्षेमं
किंनुसांप्रतं ॥२२॥ कथंतेकिंनुसद्वृत्तादुर्वृत्ताःकिं

त्वमेतत्ताः॥ राजोवाच॥ येनिरस्तोभवांल्लुब्धैःस्वैर
दारादिभिर्द्धनैः॥२३॥ तेषुकिंभवतःस्नेहमनुब
ध्नातिमानसं॥ वैश्यउवाच॥ एवमेतद्यथाप्राहभ
वानस्मद्गतंवचः॥ किंकरोमिनबध्नातिममनि
ष्ठुरतांमनः॥२४॥ यैःसंत्यज्यपितृस्नेहंधनलुब्धै
र्निराकृतः॥ पतिःस्वजनहार्दंचहार्दितेष्वेवा
मेमनः॥२५॥ किमेतन्नाभिजानामिजानन्नपि

महामते ॥ यन्मे मम वरणं चित्तं विग्रलोम्नु पिवंध
षु ॥ २६ ॥ तेषां कृतेमे मेनि श्वासो दो मेन संचजा
यते ॥ करोमि किं यन्न मन्नो लेघ्रुप्रीति निश्चनि णु
रे ॥ २७ ॥ मार्कंडेय उवाच ॥ ततस्तौ समहितौ विप्र
तं मुनिं समुपस्थितौ ॥ सामाधिर्नाम वैश्योसौ
स च पार्थिवसत्तमः ॥ २८ ॥ कृत्वा तु तौ यथान्या
यं यथार्हं तेन संविदं ॥ उपविष्टौ कथाः काश्चि

श्री
द्रु
५

च्चक्रतुर्वैश्यपार्थिवौ ॥२९॥ राजोवाच ॥ भगवं
स्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ॥ दुःखाय य
न्मे मनसः स्वचित्तायत्ततां विना ॥३०॥ ममत्वं गत
राज्यस्य राज्यांगेष्वखिलेष्वपि ॥ जानतोपि यथाज्ञ
स्य किमेतन्मुनिसत्तम ॥३१॥ अयं च निःकृतः पु
त्रैर्दारैर्भृत्यैस्तथोज्झितः ॥ स्वजनेन च संत्यक्तस्तेषु
हार्दी तथाप्यति ॥३२॥ एवमेष तथाहं च द्वावप्यत्यं

नदुःखितौ ॥ दृष्टदोषेपि विषये ममत्वाकृष्टमानसौ ॥ ३३ ॥ तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि ॥ ममास्य च भवत्येषा विवेकांधस्य मूढता ॥ ३४ ॥ ऋषिरुवाच ॥ ज्ञानमस्ति समस्तस्य जंतोर्विषयगोचरे ॥ विषयश्च महाभाग याति चैवं पृथक्पृथक् ॥ ३५ ॥ दिवांधाः प्राणिनः केचिद्रात्रावंधास्तथापरे ॥ केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्य

श्री. दु. ६

हृदयः॥४८॥ज्ञानिनो मनुजाः सत्यं किन्तु ते नहि
केवलं॥ यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः
४९॥ ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणां॥
मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः॥५०
ज्ञानेपि सति पश्यैतान्पतंगान्छावचंचुषु॥ कण
मोक्षादृतान्मोहात्पीड्यमानानपि क्षुधा॥५१॥मा
नुषा मनुजव्याघ्र साभिलाषाः सुतान्प्रति॥ लोभा

तं

त्युपकारायनन्वेतान्किंनपश्यति ॥४०॥ तथापिम
मतावर्त्तेमोहगर्त्तेनिपातिताः ॥ महामायाप्रभावे
नसंसारस्थितिकारिणः ॥४१॥ तन्नात्रविस्मयःका
र्योयोगनिद्राजगत्पतेः ॥ महामायानुभावेनतया
संमोह्यतेजगत ॥४२॥ ज्ञानिनामपिचेतांसिदेवी
भगवतीहिसा ॥ बलादाकृष्यमोहायमहामाया
प्रयच्छति ॥४३॥ तयाविसृज्यतेविश्वंजगदेतच्च

श्री

राचरं ॥ सैषाप्रसन्नावरदानृणांभवतिमुक्तये ॥ ५७ ॥ सा
विद्यापरमामुक्तेर्हेतुभूतासनातनी ॥ संसारबंधहेतु
श्चसैवसर्वेश्वरेश्वरी ॥ ५८ ॥ राजोवाच ॥ भगवन्का
हिसादेवीमहामायेतियांभवान् ॥ ब्रवीतिकथमु
त्पन्नासाकर्मास्याश्चकिंद्विज ॥ ५९ ॥ यत्प्रभावाच
सादेवीयत्स्वरूपायदुद्भवा ॥ तत्सर्वंश्रोतुमिच्छा
मित्वत्तोब्रह्मविदांवर ॥ ६० ॥ ऋषिरुवाच ॥ नित्यैव

सैसाजगन्मूर्तिस्तयासर्वमिदंततं॥तथापितत्सम
त्पत्तिर्बहुधाश्रूयतांमम॥६४॥देवानांकार्यसिद्ध
र्थमाविर्भवतिसायदा॥उत्पन्नेतितदालोकेसानि
त्याप्यभिधीयते॥६५॥योगनिद्रांयदाविष्णुर्जग
त्येकार्णवीकृते॥आस्तीर्यशेषमभजत्कल्पां
तेभगवान्प्रभुः॥६६॥तदाद्वावसुरौघोरौविख्या
तौमधुकैटभौ॥विष्णुकर्णमलोद्भूतौहंतुंब्रह्मा

णमुद्यतो ॥५१॥ सनाभिकमले विष्णोस्थितो
ब्रह्माप्रजापतिः ॥ दृष्ट्वातावसुरौचोग्रौप्रसुप्तं
चजनार्दनं ॥५२॥ तुष्टावयोगनिद्रांतामेकाग्र
हृदयस्थितः ॥ विबोधनार्थायहरेर्हरिनेत्रकृ
तालयां ॥५३॥ श्रीब्रह्मोवाच ॥ विश्वेश्वरींजग
द्धात्रींस्थितिसंहारकारिणीं ॥ स्तौमिनिद्रांभग
वतींविष्णोरतुलांतेजसः ॥५४॥ त्वंस्वाहात्वंस्व

धात्वंहिवषट्कारस्वरात्मिके।।सुधात्वमक्षरेनि
त्येत्रिधामात्रात्मिकास्थिता।।५४।।अर्धमात्रास्थि
तानित्यायानुच्चार्याविशेषतः।।त्वमेवसंध्यासा
वित्रीत्वंदेवि जननीपरा।।५५।।त्वयैतद्धार्यतेवि
श्वंत्वयैतत्सृज्यतेजगत।।त्वयैतत्पाल्यतेदेवि
त्वमत्स्यंतेचसर्वदा।।५६।।विसृष्टौसृष्टिरूपात्वं
स्थितिरूपाचपालने।।तथासंहृतिरूपांतेजग

नोस्यजगन्मये॥७८॥महाविद्यामहामायामहामे
धामहास्मृतिः॥महामोहाभगवतीमहादेवीम
हेश्वरी॥७९॥प्रकृतिस्त्वंहिसर्वस्यगुणत्रयविभा
विनी॥कालरात्रिर्महारात्रिर्मोहरात्रिश्चदारुणा॥
८०॥त्वंश्रीस्त्वमीश्वरीत्वंह्रीस्त्वंबुद्धिर्बोधलक्षणा॥लज्जा
पुष्टिस्तथातुष्टिस्त्वंशान्तिःक्षान्तिरेवच॥८१॥खड्गि
नीशूलिनीघोरागदिनीचक्रिणीतथा॥शंखिनी

चापिनीबाणभुंसुंडीपरिघायुधा ॥८२॥ सौम्यासौम्य
तराशेषसौम्येभ्यस्त्वतिसुंदरी ॥ परापराणांपरमा
त्वमेवपरमेश्वरी ॥८३॥ यच्चकिंचित्क्वचिद्वस्तुसदस
द्वाखिलात्मिके ॥ तस्यसर्वस्ययाशक्तिःसात्वंकिंस्तू
यसेमया ॥८४॥ ययात्वयाजगत्स्रष्टाजगत्पात्यत्तियो
जगत् ॥ सोपिनिद्रावशंनीतःकस्त्वांस्तोतुमिहेश्वरः
८५ ॥ विष्णुःशरीरग्रहणमहमीशानएवच कारि

तास्तेयतोतस्त्वांकस्तोतुंशक्तिमान्भवेत् ॥ ८८ ॥ सा
त्वमित्थंप्रभावैःस्वैरुदारैर्देविसंस्तुता ॥ मोहयैतौ
दुराधर्षावसुरौमधुकैटभौ ॥ ८९ ॥ प्रबोधंचजगत्स्वा
मीनीयतामच्युतोलघु ॥ बोधश्चक्रियतामस्यहंतु
मेतौमहासुरौ ॥ ९० ॥ ऋषिरुवाच ॥ एवंस्तुतातदा
देवीतामसीतत्रवेधसा ॥ विष्णोःप्रबोधनार्थायनि
हंतुंमधुकैटभौ ॥ ९१ ॥ नेत्रास्यनासिकाबाहुहृदयेभ्य

दे॰
श्री
दुं॰
२२

स्तथोरसः ॥ निर्गम्य दर्शने तस्थौ ब्रह्मणोव्यक्तजन्मनः ॥ ७० ॥ उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः ॥ एकार्णवेहि शयनात्ततः स ददृशे च तौ ॥ ७१ ॥ मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ ॥ क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ॥ ७२ ॥ समुत्थाय ततस्ताभ्यां युयुधे भगवान्हरिः ॥ पंचवर्षसहस्राणि बाहुप्रहरणो विभुः ॥ ७३ ॥ तावप्यतिबलो

तौमहामायाविमोहितौ॥उक्तवंतौवरोस्मत्तोव्रिय
तामितिकेशवं॥७४॥श्रीभगवानुवाच॥भवेताम
द्यमेतुष्टौममवध्यावुभावपि॥किमन्येनवरेणात्र
एतावद्धिवृतंमया॥७५॥ऋषिरुवाच॥वंचिता
भ्यामितितदासर्वमापोमयंजगत्॥विलोक्यता
भ्यांगदितोभगवान्कमलेक्षणः॥७६॥प्रीतौस्वस
वयुद्धेनश्लाघ्यस्त्वंमृत्युरावयोः॥आवांजहिनयत्रो

र्वीसलिलेनपरिप्लुता ॥७७॥ तथेत्युक्त्वाभगवता ।
शंखचक्रगदाभृता ॥ कृत्वाचक्रेणवैछिन्नेजघने
शीरसीतयोः ॥७८॥ एवमेषासमुत्पन्नाब्रह्मणासं
स्तुतास्वयं ॥ प्रभावमस्यादेव्यास्तुभूयःशृणुवदा
मिते ॥७९॥ इतिश्रीमार्कंडेयपुराणेसावर्णिकेम
न्वंतरेश्रीदेवीमहात्म्येमधुकैटभवधोनामप्रथमो
ध्यायः ॥१॥ ऋषिरुवाच ॥ देवासुरमभूद्युद्धंपूर्णं

श्री दु. २२

मब्दशतंपुरा॥ महिषेसुराणामधिपेदेवानांचपुरंद
रे॥१॥ तत्रासुरैर्महावीर्यैर्देवसैन्यंपराजितं॥ जित्वाच
सकलांदेवानिंद्राभून्महिषासुरः॥२॥ ततःपराजिता
सर्वेपद्मयोनिंप्रजापतिं॥ पुरस्कृत्यगतास्तत्रयत्रेशग
रुडध्वजौ॥३॥ यथावृत्तंतयोस्तद्वन्महिषासुरचे
ष्टितं॥ त्रिदशाःकथयामासुर्देवाभिभवविस्तरं॥४॥
सूर्येंद्राग्न्यनिलेंदूनांयमस्यवरुणस्यच॥ अन्येषांचाधि

धिकारात्सः स्वयमेवाधितिष्ठति ॥५॥ स्वर्गो निराकृता

सर्वे तेन देवगणा भुवि ॥ विचरंति यथा मर्त्या महिषे

ण दुरात्मना ॥६॥ एतद्वः कथितं सर्वं ममरारि विचेष्टि

तं ॥ शरणं वः प्रपन्नोस्मि वधस्तस्य विचिंत्यतां ॥७॥ ऋ

षिरुवाच ॥ इत्थं निशम्य देवानां वचांसि मधुसूदनः

चकार कोपं शंभुश्च भृकुटी कुटिलाननौ ॥८॥ ततोति

कोपपूर्णस्य चक्रिणो वदनात्ततः ॥ निश्चक्राम महा

तेजो ब्रह्मणः शंकरस्य च ॥९॥ अन्येषां चैव देवानां श

क्रादीनां शरीरतः ॥ निर्गतं सुमहत्तेजस्तच्चैक्यं समग

च्छति ॥१०॥ अतीव तेजसः कूटं ज्वलंतमिव पर्वतं ॥

ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगंतरं ॥११॥ अतु

लं तत्र तत्तेजः सर्वदेवशरीरजं ॥ एकस्थं तदभून्नारी

व्याप्तलोकत्रयं त्विषा ॥१२॥ यदभूच्छांभवं तेजस्तेना

जायत तन्मुखं ॥ याम्येन चाभवन्केशा बाहवो विष्णुते

श्री.
दु.
१७

जसः ॥१३॥ सौम्येन स्तनयोर्युग्मं मध्यं चैन्द्रेण चाभ
वत् ॥ वारुणेन च जंघोरू नितंबस्तेजसा भुवः ॥१४॥
ब्रह्मणस्तेजसा पादौ तदंगुल्योर्कतेजसा ॥ वसूनां
च करांगुल्यः कौवेरेण च नासिका ॥१५॥ तस्यास्तु दं
ताः संभूताः प्राजापत्येन तेजसा ॥ नयनेत्रितयंयज्ञे
तथा पावकतेजसा ॥१६॥ भ्रुवौ च संध्ययोस्तेजः श्रव
णावनिलस्य च ॥ अन्येषां चैव देवानां संभवस्तेज

सो ध्रिवा ॥ २७ ॥ ततः पराजिता देवा नेत्रोराष्ट्रिंसमक्कवां
तां विलोक्य सुदंष्ट्राग्र मराममहिषार्दिताः ॥ २८ ॥ त
तोस्वादद्भुलस्यैस्वानि स्वान्यायुधानि च ॥ ऊचुः जय
जय त्वत्स्वेजंयंतीतिजयैषणा ॥ २९ ॥ शूलं शूलाद्वि
निःकृष्य ददौ तस्यै पिनाकधृक् ॥ चक्रं च दत्तवान्कृ
ष्णः समुत्पाद्य स्वचक्रतः ॥ ३० ॥ शंखं च वरुणः श
क्तिं ददौ तस्यै हुताशनः ॥ मारुतो दत्तवांश्चापं बाण

पूर्णेतथेषुधी ॥२१॥ वज्रमिंद्रःसमुत्पाद्यकुलिशाद
मराधिपः॥ ददौतस्यैसहस्राक्षोघंटामैरावताद्गजात्॥
२२॥ कालदंडाद्यमोदंडंपाशंचांबुपतिर्ददौ॥ प्राजाप
तिश्चाक्षमालांददौब्रह्माकमंडलुं॥२३॥ समस्तरोम
कूपेषुनिजरश्मीदिवाकरः॥ कालश्चदत्तवान्ख
ड्गंतस्यैवचर्मचनिर्मलं॥ क्षीरोदश्चामलंहारंमजरे
चतथांबरे॥२४॥ चूडामणिंतथादिव्यंकुंडलेकट

कानिच॥ अर्द्धचंद्रंतथाशुभ्रंकेयूरान्सर्वबाहुषु॥२५
नूपुरौविमलौतद्वद्ग्रैवेयकमनुत्तमं॥ अंगुलीयक
रत्नानिसमस्तास्वंगुलीषुच॥२६॥ विश्वकर्माददौ
तस्यैपरशुंचातिनिर्मलं॥ अस्त्राण्यनेकरूपाणि
तथाभेद्यंचदंशनं॥२७॥ अम्लानपंकजंमालांशिर
स्युरसिचापरां॥ अददज्जलधिस्तस्यैपंकजंचाति
शोभनं॥२८॥ हिमवान्वाहनंसिंहंरत्नानिविविधानि

विविधानि च ॥ ददावशून्यं सुरया पानपात्रं धनाधिपः ॥२९॥
शेषश्च सर्वनागेशो महामणिविभूषितं ॥ नागहारं ददौ
तस्यै धत्ते यः पृथिवीमिमां ॥३०॥ अन्यैरपि सुरैर्देवी भूष
णैरायुधैस्तथा ॥ सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मु
हुः ॥३१॥ तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥ अ
मायतातिमहता प्रतिशब्दो महानभूत् ॥३२॥ चुक्षुभुः
सकला लोकाः समुद्राश्च चकंपिरे ॥ चचालुः वसुधा चे

लुः सकलाश्च महीधराः ॥३३॥ जयेति च मुदा देवास्ता
मूचुः सिंहवाहिनीं ॥ तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्म
मूर्त्तये ॥३४॥ दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ॥
सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः ॥३५॥ आः
किमेतदिति क्रोधादाभाष्य महिषासुरः ॥ अभ्यधा
वत तं शब्दमशेषैरसुरैर्वृतः ॥३६॥ स ददर्श ततो देवीं
व्याप्तलोकत्रयां त्विषा ॥ पादाक्रांत्यानतभुवं किरीटो

श्री
दु:
१२

ल्लिखितांबरां ॥३७॥ क्षोभिताशेषपातालांधनुर्ज्या:नि
स्वनेनतां ॥ दिशोभुजसहस्रेणसमंताद्व्याप्यसंस्थितां ॥३८॥
ततःप्रववृतेयुद्धंतयादेव्यासुरद्विषां ॥ शस्त्रास्त्रैर्वहुधा
मुक्तैरादीपितदिगंतरं ॥३९॥ महिषासुरसेनानीश्चि
क्षुराख्योमहासुरः ॥ युयुधेचामरश्चान्यैश्चतुरंगबला
न्वितः ॥४०॥ अयुध्यतायुतानांचसहस्रेणमहाहनुः
पंचाशद्भिश्चनियुतैरसिलोमामहासुरः ॥४१॥ रथा

नामयुतैः षड्भिरुदग्राख्यो महासुरः॥ अयुतानां शतैः षड्भि-
र्बाष्कलो युयुधे रणे॥४२॥ गजवाजिसहस्रौघैरनेकैः प-
रिवारितः॥ वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत॥
४३॥ वृत्तः कालो रथानां च रणे पंचशानायुतैः॥ युयु-
धेः संयुगे तत्र तावद्भि परिवारितैः॥४४॥ विडाला-
ख्यो युतानां च पंचाशद्भिरथायुतैः॥ युयुधे संयुगे त-
त्र रथानां परिवारितः॥४५॥ अन्ये च तत्रायुतशो रथ-

नागहयैर्वृताः ॥ युयुधुः संयुगे देव्या सह तत्र महासु
राः ॥४६॥ कोटिकोटिसहस्रैस्तु रथानां दंतिनां तथा
हयानां च वृतो युद्धे तत्राभून्महिषासुरः ॥४७॥ तोम
रैर्भिंडिपालैश्च शक्तिभिर्मुसलैस्तथा ॥ युयुधुः
संयुगे देव्याः खड्गैः परशुपट्टिसैः ॥४८॥ केचिच्च चि
क्षिपुः शक्तीः केचित्पाशांस्तथापरे ॥ देवीं खड्गप्र
हारैस्तु ते तां हंतुं प्रचक्रमुः ॥४९॥ सापि देवी तत

स्तानि शस्त्राण्यस्त्राणि चंडिका ॥ लीलयैव प्रचि
च्छेद निजशस्त्रास्त्रवर्षिणी ॥ ५० ॥ अनायस्तानि
नादेवी स्तूयमाना सुरर्षिभिः ॥ मुमोचासुरदेहेषु
शस्त्राण्यस्त्राणि चेश्वरी ॥ ५१ ॥ सोपि क्रुद्धो धुतसटो
देव्यावाहनकेसरी ॥ चचारासुरसैन्येषु वनेष्विव
हुताशनः ॥ ५२ ॥ निश्वासान्मुमुचे यांश्च युध्यमा
नो रणेंबिका ॥ त एव सद्यः संभूताः गणाः शतस

मुसुधुसैपरशुभिर्भिंडिपालासिपट्टिसैः ॥ नाशयंतो सुरगणान्देवीशक्त्युपबृंहितः

हस्तथाः ॥५३॥ अवादयंत पटहान्गणाः शंखांस्तथा
परे ॥ मृदंगांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे ॥५४
ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः खड्गा
दिभिश्च शतशो निजघान महासुरान् ॥५६॥ पात
यामास चैवान्यान्घंटास्वनविमोहितान् ॥ असुरा
न्भुवि पाशेन बध्वा चान्यानकर्षयत् ॥५७॥ केचि
द्द्विधा कृतास्तीक्ष्णैः खड्गपातैस्तथापरे ॥ विपोथि

नानिपातेन गदयाभुवि घोरने ॥८८॥ वेमुष्टकेचिद्युधि

रंमसलेन भृशं हताः ॥ केचिन्निपतिताभूमौ भिन्ना

मुसलेन वक्षसि ॥८९॥ निरंतराःश्वभौचेलकृताकेचि

द्गलान्विरे ॥ घूपेनानुकारिणः प्राणान्मुमुचुश्चिद ला

ईनाः ॥९०॥ केषांचिद्बाहवःछिन्नाछिन्नग्रीवास्तथा

परे ॥ शिरांसि पितृन्येषां मन्ये मध्ये विदारिताः ॥९१॥

विछिन्नजंघास्त्व परेपेतुरुर्व्यां महाहवाः ॥ एकदा

श्री
दु.
२०

ह्वितिचरणाः केचिद्दिव्याङ्घ्रिघातिताः ॥६२॥ छिन्नेपि
चान्येशिरसिपतितः पुनरुत्थिताः ॥ कवंधायुयुधु
र्देव्या गृहीतपरमायुधाः ॥६३॥ ननृतुश्चापरे तत्र
युद्धेतूर्य्यलयाश्रिताः ॥ कवंधाश्छिन्नशिरसः खड्ग
शक्त्यृष्टिपाणयः ॥६४॥ तिष्ठतिष्ठेति भाषंतोदेवी
मन्येमहासुराः ॥ पातितै रथनागाश्वैरसुरैश्चवसुं
धरा ॥६५॥ अगम्या साभवत्तत्रयत्राभूत्स महारणः

श्रोणिनौचामहानघः सच्चलन्नविग्रश्नुनुः॥ मध्ये
वामरसैन्यस्यवारणस्वरवाजिनां॥ ९९॥ तलेनत
महासैन्यमरवराणांतघांविका॥ नित्येत्तयंयथा
वक्षिल्ललद्दाहमहाचय॥ ९७॥ सचसिंहमहाना
दमक्तजन्युनकेसरः॥ शरीरेभ्योमरारीणाम
सनिवविचिन्वति॥ ९८॥ देव्यागणैश्चतैस्तत्रकृतं
युद्धंमहासुरैः॥ यथैनांतुतुषुर्देवाः पुष्पवृष्टिमु

वोदिवि ॥ ६९ ॥ इतिश्रीमार्कंडेयपुराणेसावर्णि-
केमन्वंतरे श्रीदेवीमहात्म्ये महिषासुरवधोनाम
द्वितीयोध्यायः ॥ २ ॥ ऋषिरुवाच ॥ निहन्यर-
मानंतत्सैन्यमवलोक्य महासुरः ॥ सेनानीश्चि-
क्षुरः कोपाद्ययौयोद्धुमथांबिकां ॥ १ ॥ सदेवीश-
रवर्षेणववर्षसमरेसुरः ॥ यथामेरुगिरेःश्टंगंतो-
यवर्षेणतोयदा ॥ २ ॥ तस्यच्छित्वाततोदेवीलीलयै

श्री
दु०
२२

वा शिरोत्कारान् ॥ जघान तुरगान्बाणैर्यन्तारं चैव वाजि
नां ॥ ३ ॥ चिच्छेद च धनुः सद्यो ध्वजं चापि समुच्छ्रितं ॥ ऽ
विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः ॥ ४ ॥ स
छिन्नधन्वा विरथो हताश्वो हतसारथिः ॥ अभ्य
धावत्ततो देवीं खड्गचर्मधरोसुरः ॥ ५ ॥ सिंहमाह
त्य खड्गेन तीक्ष्णधारेण मूर्द्धनि ॥ आजघान भुजे
सव्ये देवीमप्यतिवेगवान् ॥ ६ ॥ तस्याः खड्गो भुजं

श्राप्यपफालनृपनंदन ॥ ततोजग्राहशूलंसकोपादरु

णलोचनः ॥७॥ चिक्षेपचततस्तत्तुभद्रकाल्यांमहा

सुरः ॥ जाज्वल्यमानंतेजोभीरविबिंबमिवांबरात् ॥८

दृष्ट्वातदापतच्छूलंदेवीशूलममुंचत ॥ तेनतच्छतधा

नीतंशूलंसचमहासुरः ॥९॥ हतेतस्मिन्महावीर्ये

महिषस्यचमूपतौ ॥ आजगामगजारूढश्चामरस्त्रिद

शार्दनः ॥१०॥ सोपिशक्तिंमुमोचाथदेव्यास्तामंबि

श्री
दु॰
२२

कात्कुलं ॥ हुंकाराभिहतां भूमौ पातयामास निष्प्रभां ॥ ११
भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः ॥ चिक्षेप
चामरः शूलं बाणैस्तदपि साछिनत् ॥ १२ ॥ ततः सिं
हः समुत्पत्य गजकुंभांतरे स्थितः ॥ बाहुयुद्धेन युयु
धे तेनोच्चैस्त्रिदशारिणः ॥ १३ ॥ युध्यमानौ ततस्तौ
तु तस्मान्नागान्महीं गतौ ॥ युयुधातेतिसंरब्धौ प्रहा
रैरतिदारुणैः ॥ १४ ॥ ततो वेगात्खमुत्पत्य निपत्य च

मृगारिणा ॥ करप्रहारेण शिरश्चामरस्य पृथक्कृतं ॥ २५ ॥
उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः ॥ दंतमुष्टि
तलैश्चैव करालश्च निपातितः ॥ २६ ॥ देवी क्रुद्धा गदा
पातैश्चूर्णयामास चोद्धतं ॥ वाष्कलं भिंडिपालेन
बाणैस्ताम्रं तथांधकं ॥ २७ ॥ उग्रास्यमुग्रवीर्यं च तथै
व च महाहनुं ॥ त्रिनेत्रा च त्रिशूलेन जघान परमेश्व
री ॥ २८ ॥ बिडालस्यासिना कायात्पातयामास वै शि

श्री॰ दु॰ २३

र:॥ डइंइरंड म्हे खं चो भो घोरे निर्म्मेयमदत्तयं॥१९॥ एवं
संक्षीयमाणेतु स्वसैन्यमहिषासुर:॥ माहिषेण
स्वरूपेन त्रासयामास तान्गणान्॥२०॥ कांश्चित्तुं
डप्रहारेण खुरक्षेपैस्तथापरान्॥ लांगूलताडितां
श्चान्यान्शृंगाभ्यांच विदारितान्॥२१॥ वेगेनकां
श्चिदपरान्नादेनभ्रमणेनच॥ निश्वासपवनेना
न्यान्पातयामासभूतले॥२२॥ निपात्यप्रमथा

नीकमभ्यधावतसोसुरः॥ सिंहंहत्वंमहादेव्याःको

पंचक्रोनतोंविकां॥२३॥ सोपिकोपान्महावीर्य

खुरक्षुस्समहीतलः॥ श्रृंगाभ्यांपर्वतानुच्चैःक्षिते

पचननादच॥२७॥ वेगभ्रमणविक्षुण्णमहीतस्यव

र्णोर्ण्यत॥ लांगूलेनाहतश्चाब्धिःप्लावयामासस

र्वत॥२९॥ धुतश्रृंगविभिन्नाःचखंडंखंडंययुर्घना

श्वासानिलास्तास्तावीर्णानिपेतर्नभसोचला॥२२

श्री

दु

२७

इतिक्रोधसमाध्मातमापतंतंमहासुरं॥ दृष्ट्वासाचंडिका
कोपंतद्वधायतदाकरोत्॥२७॥ साक्षिप्तंतस्यवैपाशंतं
बबंधमहासुरं॥ तत्याजमाहिषंरूपंसोपिबद्धोमहा
मृधे॥२८॥ ततःसिंहोभवत्सद्योयावत्तस्यांबिका
शिरः॥ छिनत्तितावत्पुरुषःखड्गपाणिरदृश्यत॥
२९॥ ततएवाशुपुरुषंदेवीचिच्छेदसायकैः॥ तंखड्
गचर्मणासार्द्धंततःसोभून्महागजः॥३०॥ करेणच

श्री
दु.
२५

महासिंहंतंचकर्षजगर्जच॥कर्षतस्तुकरंदेवीखड्गे
ननिरकृंतत॥३१॥ततोमहासुरोभूयोमाहिषंवपुरा
स्थितः॥तथैवक्षोभयामासत्रैलोक्यंसचराचरं॥३२
ततःक्रुद्धाजगन्माताचंडिकापानमुत्तमं॥पपौपुनः
पुनश्चैवजहासारुणलोचना॥३३॥ननर्दचासुरः
सोपिबलवीर्यमदोद्धतः॥विषाणाभ्यांचचिक्षे
पचंडिकांप्रतिभूधरान्॥३४॥साचतान्प्रहितांस्ते

नचूर्णयंतीशरोत्करैः ॥ उवाचतंमदोद्धूतंमुखरागाकु
लाक्षरं ॥ ३५ ॥ देव्युवाच ॥ गर्जगर्जक्षणंमूढमधु
यावत्पिबाम्यहं ॥ मयात्वयाहतेत्रैवगर्जिष्यंत्याशु
देवता ॥ ३६ ॥ ऋषिरुवाच ॥ एवमुक्त्वासमुत्पत्य
सारूढातंमहासुरं ॥ पादेनाक्रम्यकंठेचशूलेनैनम
ताडयत् ॥ ३७ ॥ ततःसोपिपदाक्रांतस्तयानिजमुखा
त्ततः ॥ अर्द्धनिष्क्रांतएवासीद्देव्यावीर्येणसंहृतः ॥ ३८

श्री
दु.
२८

अर्द्धनिःक्रांतएवासौयुध्यमानोमहासुरः॥ तयामहा
सिनादेव्याशिरश्छित्वानिपातितः॥३९॥ ततोहा
हाकृतंसर्वंदैत्यसैन्यंननाशतत्॥ प्रहर्षंचपरंज
ग्मुःसकलादेवतागणाः॥४०॥ तुष्टुवुस्तांसुरादे
वींसहदिव्यैर्महर्षिभिः॥ जगुर्गंधर्वपतयोननृतु
श्चाप्सरोगणाः॥४१॥ इतिमार्कंडेयपुराणेसाव
र्णिकेमन्वंतरेश्रीदेवीमहात्म्येमहिषासुरवधो॥

नामतृतीयोध्यायः॥३॥ऋषिरुवाच॥ततःसुर
गणाःसर्वेदेव्याइंद्रपुरोगमाः॥स्तुतिमारेभिरेक
मनिहतेमहिषासुरे॥२॥शक्रादयःसुरगणानि
हतेतिवीर्य्येतस्मिन्दुरात्मनिसुरारिबलेचदेव्या
तांतुष्टुवुःप्रणतिनम्रशिरोधरांसावाग्भिःप्रहर्ष
पुलकोद्गमचारुदेहाः॥२॥देव्युवाच॥देव्याय
याततमिदंजगदात्मशक्त्यानिःशेषदेवगणशक्ति

समूहमूर्त्या ॥ तामंबिकामखिलदेवमहर्षिपूज्यां
भक्त्यानताःस्मविदधातुशुभानिसानः ॥३॥ यस्याः
प्रभावमतुलंभगवाननंतोब्रह्माहरिश्चनहिवक्तु
मलंबलंच ॥ साचंडिकाखिलजगत्परिपालना
यनाशायचाशुभभयस्यमतिंकरोतु ॥४॥ याश्रीः
स्वयंसुकृतिनांभवनेष्वलक्ष्मीःपापात्मनांकृतधि
यांहृदयेषुबुद्धिः ॥ श्रद्धासतांकुलजनप्रभवस्य

श्री
दु.
२०

लन्नांतांत्वांननामसपरिपालयदेविविश्वं॥५॥किंव
र्णयामतवरूपमचिंत्यमेतन्किंचातिवीर्यमसुर
क्षयंकारिभूरि:॥किंचाहवेषुचरितानितवाद्भुता
निसर्वेषुदेव्यसुरदेवगणादिकेषु॥६॥हेतु:समर
स्तजगतांत्रिगुणापिदेवैर्नज्ञायसेहरिहरादिभिर
प्यपारा॥सर्वाश्रयाखिलमिदंजगदंशभूतमव्या
कृताहिपरमाप्रकृतिस्त्वमाद्या ॥७॥यस्या:सम

स्तसुरतासमुदीरणेनतृप्तिंप्रयातिसकलेषुमखेषुदेवि
स्वाहासिवैपितृगणस्यचतृप्तिहेतुरुच्चार्यसेत्वमत
एवजनैःस्वधाच॥८॥यामुक्तिहेतुरविचिंत्यमहाव्र
तात्वमभ्यस्यसेसुनियतेंद्रियतत्वसारैः॥मोक्षार्थिभि
र्मुनिभिरस्तसमस्तदोषैर्विद्यासिसाभगवतीपरमा
हिदेवि॥९॥शब्दात्मिकासुविमलर्ग्यजुषांनिधा
नमुद्गीथरम्यपदपाठवतांचसाम्नां॥देवीत्रयीभ

गवतीभवभावनायवार्त्तांचसर्वंजगतांपरिमार्त्तिह
न्त्री ॥ १० ॥ मेधासिदेविविदिताखिलशास्त्रसाराऽ
र्गासिदुर्गभवसागरनौरसंगा ॥ श्रीकैटभारिहृद
यैककृताधिवासागौरीत्वमेवशशिमौलिकृतप्र
तिष्ठा ॥ ११ ॥ ईषत्सहासममलंपरिपूर्णचंद्रबिंबा
नुकारिकनकोत्तमकांतिकांतं ॥ अत्यद्भुतंप्रहृतमा
त्तरुषातथापिवक्त्रंविलोक्यसहसामहिषासुरेण ॥

श्री
दु.
२८

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशांकसदृशच्छ
वि यन्न सद्यः ॥ प्राणान्मुमोच महिषस्तदतीव चित्रं कै
र्जीव्यते हि कुपितांतकदर्शनेन ॥ २३ ॥ देवि प्रसीद पर
मा भवती भवाय सद्यो विनाशयसि कोपवती कुला
नि ॥ विज्ञातमेतदधुनैव यदस्तमेतन्नीतं बलं सुवि
पुलं महिषासुरस्य ॥ २४ ॥ ते संमता जनपदेषु धनानि
तेषां तेषां यशांसि न च सीदति बंधुवर्गः ॥ धन्यास्त ए

वनिभृतात्मजभृत्यदारायेषांसदाभ्युदयदाभवतीप्र
सन्ना॥१५॥धर्म्माणिदेविसकलानितथैवकर्माण्य
त्याहृतःप्रतिदिनंसुकृतीकरोति॥स्वर्गाप्रयातिच
ततोभवतीप्रसादाल्लोकत्रयेपिफलदाननुदेविते
न॥१६॥दुर्गेस्मृताहरसिभीतिमशेषजंतोःस्वस्थैस्मृ
तामतिमतीवशुभंददासि॥दारिद्र्यदुःखभयहारि
णिकात्वदन्यासर्वोपकारकरणायसदार्द्रचित्ता॥

१७॥ एभिर्हतैर्जगदुपैति सुखं तथैते कुर्वंतु नाम नरका
यचिराय पापं॥ संग्राममृत्युमधिगम्य दिवं प्रयांतु
मत्वेति नूनमहितान्विनिहंसि देवि॥१८॥ दृष्ट्वैव किंन
भवती प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रं॥ लोकान्प्रयांतु रिपवोपि हि शस्त्रपूता इत्थं
मतिर्भवति तेष्वहितेषु साध्वी॥१९॥ खड्गप्रभानिकर
विस्फुरणैस्तथोग्रैः शूलाग्रकांतिनिवहेन दृशोसु

श्री
दु॰
३०

राणं ॥ यन्नागता विलयमंबुमरिंदुखंडयोग्यानतंनव
विलोकय यतांनदेनत ॥२०॥ दुर्द्दत्तवृत्तशमनंतववदे
विशीलं रूपंतथैवतववचिंत्यमतल्पमन्यैः ॥ वीर्यंचहं
त्रिहृतदेवपराक्रमाणां वैरिष्वपिप्रकटितैवदयात्व
येत्थं ॥२१॥ केनोपमाभवतुतस्यपराक्रमस्यरूपंचशत्रु
भयकार्यतिहारिकुत्र ॥ चित्तेकृपासमरनिष्ठुरता
चदृष्टात्वय्येववदेविवरदेभुवनत्रयेपि ॥२२॥ त्रैलोक्य

मेतदखिलंरिपुनाशनेनत्रातंत्वयासमरमूर्द्धनिते
पिहत्वा॥नीतादिवंरिपुगणाभयमप्यपास्तम
स्माकमुन्मदसुरारिभवंनमस्ते॥२३॥शूलेनपा
हिनोदेविपाहिखड्गेनचांबिके॥घंटास्वनेननः
पाहिचापज्यानिःस्वनेनच॥२४॥प्राच्यांरक्षप्रती
च्यांचचंडिकेरक्षदक्षिणे॥भ्रामणेनात्मशूलस्य
उत्तरस्यांतथेश्वरि॥२५॥सौम्यानियानिरूपाणि

त्रैलोक्ये विचरंति ते॥ यानि चात्यंतघोराणि तै र
क्षास्मांस्तथा भुवि॥२६॥ खड्गशूलगदादीनि या
नि चास्त्राणि तेंबिके॥ करपल्लवसंगीनि तैरस्मा
न्रक्ष सर्वतः॥२७॥ ऋषिरुवाच॥ एवं स्तुता सुरैः
दिव्यैः कुसुमैर्नंदनोद्भवैः॥ अर्चिता जगतां धात्री
तथा गंधानुलेपनैः॥२८॥ भक्त्या समस्तैस्त्रिदशै
र्दिव्यैर्धूपैः सुधूपिता॥ प्राह प्रसादसुमुखी

श्री
दु.
३२

समस्तानस्मदरातीन॥२९॥देव्युवाच॥व्रियतां
त्रिदशाःसर्वेयदस्मत्तोभिवांछितं॥ददाम्यहमः
तिप्रीत्यास्तवैरेभिःसुपूजिता॥३०॥कर्त्तव्यमपरंय
च्चदुष्करंतन्निवेद्यतां॥इत्याकर्ण्यवचोदेव्याःप्रसन्नाः
स्तेदिवौकसः॥३१॥देवाऊचुः॥भगवत्याकृतं
सर्वंनकिंचिदवशिष्यते॥यदयंनिहतःशत्रुर
स्माकंमहिषासुरः॥३२॥यदिचापिवरोदेयस्त्व

यास्माकंमहेश्वरि॥संस्मृतासंस्मृतात्वन्नोहिंसीथाः
परमापदं॥३३॥यश्चमर्त्यैस्तवैरेभिस्त्वांस्तोष्यत्यम
लानने॥श्रुचिरेकमनाधूणंतोभक्त्यात्रिभुवनेश्वरी
३४॥तस्यावित्तर्द्धिविभवैर्धनदारादिसंपदं॥वृद्धये
स्मत्प्रसन्नात्वंभवेथासर्वदांबिके॥३५॥ऋषिरु
वाच॥इतिप्रसादितादेवैर्जगतोर्थेतथात्मनः॥तथे
त्युक्त्वाभद्रकालीबभूवांतर्हितानृप॥३६॥इत्येतत्क

थितंभूपसंभूतासायथापुरा॥देवीदेवशरीरेभ्यो
जगत्त्रयहितैषिणी॥३७॥पुनश्चगौरीदेहात्सास
मुद्भूतायथाभवत्॥वधायदुष्टदैत्यानांतथाशुं
भनिशुंभयोः॥३८॥रक्षणायचलोकानांदेवा
नामुपकारिणी॥तच्छृणुष्वमयाख्यातंयथाव
त्कथयामिते॥३९॥इतिश्रीमार्कंडेयपुराणे
सावर्णिकेमन्वंतरेदेवीमहात्म्येशक्रादय

स्तुतिर्नामचतुर्थोध्यायः॥४॥ ऋषिरुवाच॥ पुराशुं
भनिशुंभाभ्यामसुराभ्यांशचीपतेः॥ त्रैलोक्यंय
ज्ञभागाश्चहृतामदबलाश्रयात्॥१॥ तावेवसू
र्यतांतद्वदधिकारंतथैंदवं॥ कौबेरमथयाम्यंच
चक्रातेवरुणस्यच॥२॥ तावेवपवनर्द्धिंचचक्रतु
र्वह्निकर्मच॥ ततोदेवाविनिर्धूताभ्रष्टराज्याःप
राजिताः॥३॥ हृताधिकारास्त्रिदशास्ताभ्यांसर्वे

निराकृता: ॥ महासुराभ्यां तां देवीं संस्मरंत्यपराजितां ॥

४॥ तयास्माकं वरो दत्तो यथापत्स्वस्मृताखिला: ॥ भ

वतांनाशयिष्यामि तत्क्षणात्परमापद: ॥५॥ इति कृ

त्वा मतिं देवा हिमवंतं नगेश्वरं ॥ जग्मुस्तत्र ततो देवी

विष्णुमायां प्रतुष्टुवु: ॥६॥ देवा ऊचु: ॥ नमो देव्यै महा

देव्यै शिवायै सततं नम: ॥ नम: प्रकृत्यै भद्रायै नियता:

प्रणता: स्मतां ॥७॥ रौद्रायै नमो नित्यायै गौर्यै धात्र्यै

श्री
दु.
२४

मैनमोनमः॥ ज्योत्स्नायैचेंदुरूपिण्यैसुखायैसततंन
मः॥८॥ कल्याण्यैप्रणतांवृद्ध्यैसिद्ध्यैकूर्म्यैनमोनमः
नैरृत्यैभूभृतांलक्ष्म्यैशर्वाण्यैतेनमोनमः॥९॥ दुर्गा
यैदुर्गपारायैसारायैसर्वकारिण्यै॥ ख्यात्यैतथैवकृ
ष्णायधूम्रायैसततंनमः॥१०॥ अतिसौम्यातिरौद्राय
नमस्तस्यैनमोनमः॥ नमोजगत्प्रतिष्ठायैदेव्यैकृत्यै
नमोनमः॥११॥ यादेवीसर्वभूतेषुविष्णुमायेतिशब्दि

ता॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥२२॥या
देवीसर्वभूतेषुचेतनेत्यभिधीयते॥नमस्तस्यैनमस्त
स्यैनमस्तस्यैनमोनमः॥२३॥यादेवीसर्वभूतेषुबु
द्धिरूपेणसंस्थिता॥नमस्तस्यै०॥२४॥यादेवीसर्वभू
तेषुनिद्रारूपेणसंस्थिता॥नमस्तस्यै०॥२५॥यादे
वीसर्वभूतेषुक्षुधारूपेणसंस्थिता॥नमस्तस्यै०॥
२६॥यादेवीसर्वभूतेषुछायारूपेणसंस्थिता॥न

श्री
दु.
२५

मस्तस्यै०॥१७॥ यादेवीसर्वभूतेषुशक्तिरूपेणसं
स्थिता॥ नमस्तस्यै०॥१८॥ यादेवीसर्वभूतेषुतृष्णा
रूपेणसंस्थिता॥ नमस्तस्यै०॥१९॥ यादेवीसर्वभू
तेषुक्षान्तिरूपेणसंस्थिता॥ नमस्तस्यै०॥२०॥ या
देवीसर्वभूतेषुजातिरूपेणसंस्थिता॥ नमस्तस्यै०
॥२१॥ यादेवीसर्वभूतेषुलज्जारूपेणसंस्थिता॥ नम
स्तस्यै०॥२२॥ यादेवीसर्वभूतेषुशांतिरूपेणसंस्थि

ना॥ नमस्तस्यै०॥२३॥ यादेवी सर्वभूतेषु श्रद्धारूपे
ण संस्थिता॥ नमस्तस्यै०॥२४॥ यादेवी सर्वभूतेषु
कांतिरूपेण संस्थिता॥ नमस्तस्यै०॥२५॥ यादेवी
सर्वभूतेषु लक्ष्मीरूपेण संस्थिता॥ नमस्तस्यै०॥२६
यादेवी सर्वभूतेषु वृत्तिरूपेण संस्थिता॥ नमस्त
स्यै०॥२७॥ यादेवी सर्वभूतेषु स्मृतिरूपेण संस्थि
ता॥ नमस्तस्यै०॥२८॥ यादेवी सर्वभूतेषु दयारूपे

श्री
दु०
२८

णसंस्थिता॥ नमस्तस्यै॥ २९॥ यादेवीसर्वभूतेषु
तुष्टिरूपेणसंस्थिता॥ नमस्तस्यै॥ ३०॥ यादेवीसर्व
भूतेषुभ्रांतिरूपेणसंस्थिता॥ नमस्तस्यै॥ ३१॥ या
देवीसर्वभूतेषुमातृरूपेणसंस्थिता॥ नमस्तस्यै॥
३२॥ यादेवीसर्वभूतेषुमायारूपेणसंस्थिता॥ नम
स्तस्यै॥ ३३॥ इंद्रियाणामधिष्ठात्रीभूतानांचाखि
लेषुया॥ भूतेषुसततंतस्यव्याप्तैदेव्यैनमोनमः॥ ३४

चितिरूपेणयाकृत्स्नमेतद्व्याप्यस्थितंजगत॥ नमः
स्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥३५॥स्तुतासु
रैःपूर्वमभीष्टसंश्रयात्तथासुरेंद्रेणदिनेषुसेविता॥
करोतुसानःशुभहेतुरीश्वरीशुभानिभद्राण्यभिहं
तुचापदः॥३६॥यासांप्रतंचोद्धतदैत्यतापितैरस्मा
भिरीशाचसुरैर्नमस्यते॥ याचस्मृतातत्क्षणमेवहं
तिनःसर्वापदोभक्तिविनम्रमूर्तिभिः॥३७॥ ऋषि

मे

रुवाच॥ एवंस्तवादियुक्तानांदेवानांतत्रपार्वती॥
स्नातुमभ्याययौतोयेजाह्नव्यानृपनंदने॥३८॥
साब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिःस्तूयतेत्रका॥ शरी
रकोशतश्चास्याःसमुद्भूताब्रवीच्छिवा॥३९॥ स्तोत्रं
ममैतत्क्रियतेशुंभदैत्यनिराकृतैः॥ देवैःसमस्तैःस
मरेनिशुंभेनपराजितैः॥४०॥ शरीरकोशाद्यत्त
स्याःपार्वत्यानिःसृतांबिका॥ कौशिकीतिसमस्तेषु

श्री
दु.
२८

ततोलोकेषुगीयते ॥४१॥ तस्यांविनिर्गतायांतुकृ
ष्णाभूत्सापिपार्वती ॥ कालिकेतिसमाख्याता
हिमाचलकृताश्रया ॥४२॥ ततोंबिकांपरंरूपंबिभ्रा
णांसुमनोहरं ॥ ददर्शचंडोमुंडश्चभृत्यौशुंभनि
शुंभयोः ॥४३॥ ताभ्यांशुंभायचाख्यातात्यतीव
सुमनोहरा ॥ काप्यास्तेस्त्रीमहाराजभासयंतीहि
मावलं ॥४४॥ नैवतादृक्कचिद्रूपंदृष्टंकेनचिदुत्त

मे॥ ज्ञायतांकाप्यसौदेवीगृह्यतांचासुरेश्वर॥९५
स्त्रीरत्नमतिचार्वंगीद्योतयंतीदिशस्त्विषा।सा
तुतिष्ठतिदैत्येंद्रतांभवान्द्रष्टुमर्हसि॥९६॥या
निरत्नानिमणयोगजाश्वादीनिवैप्रभो॥त्रैलो
क्येतुसमस्तानिसांप्रतंभांतितेगृहे॥९७॥ऐरा
वतसमानीतोगजरत्नंपुरंदरात॥पारिजाततरु
श्चायंतथैवोच्चैःश्रवाहयः॥९८॥विमानंहंससं

युक्तमेतत्तिष्ठतितेंगणे ॥ रत्नभूतमिहानीतंयदा
सीद्वेधसोद्भुतं ॥ ४९ ॥ निधिरेषमहापद्मसमानीतो
धनेश्वरात् ॥ किंजल्किनींददौचाब्धिर्मालामम्ला
नपंकजां ॥ ५० ॥ छत्रंतेवारुणंगेहेकांचनस्रा
वितिष्ठति ॥ तथायंस्यंदनवरोयःपुरासीत्प्रजा
पतेः ॥ ५१ ॥ मृत्योरुत्क्रांतिदानामशक्तिरीशत्व
याहृता ॥ पाशःसलिलराजस्यभ्रातुस्तवपरिग्र

हे ॥९२॥ निशुंभस्याब्धिजाताश्चसमस्तारत्नजातयः
वह्निरपिददौतुभ्यमग्निशौचेचवाससी ॥९३॥ एवं
दैत्येंद्ररत्नानिसमस्तान्याहृतानिते ॥ स्त्रीरत्नमे
षाकल्याणीत्वयाकस्मान्नगृह्यते ॥९४॥ ऋषिरु
वाच ॥ निशम्येतिवचःशुंभःसतदाचंडमुंडयोः
प्रेषयामाससुग्रीवंदूतंदेव्यामहासुरः ॥९५॥
इतिचेतिचवक्तव्यासागत्वावचनान्मम ॥ यथा

श्री
दु
५०

चाभ्येतिसंप्रीत्यांतथाकार्य्यंत्वयालघु ॥५६॥ सतत्र
गत्वायत्रास्तेशैलोद्देशेतिशोभने ॥ तांचदेवींततः
प्राहश्लक्ष्णंमधुरयागिरा ॥५७॥ दूतउवाच ॥ दे
विदैत्येश्वरः शुंभस्त्रैलोक्येपरमेश्वरः ॥ दूतोहंप्रे
षितस्तेनत्वत्सकाशमिहागतः ॥५८॥ अव्याहता
ज्ञः सर्वासुयः सदादेवयोनिषु ॥ निर्जिताखि
लदैत्यारिः सयदाहशृणुष्वतत् ॥५९॥ ममत्रैलो

क्यमखिलं मम देवा वशानुगाः॥ यज्ञभागानहं सर्वा
नुपाश्नामि पृथक् पृथक्॥२०॥ त्रैलोक्ये वररत्नानि
मम वश्यान्यशेषतः॥ तथैव गजरत्नं च हृतं देवेंद्र
वाहनं॥२१॥ क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः
उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितं॥२२॥ यानि
चान्यानि देवेषु गंधर्वेषूरगेषु च॥ रत्नभूतानि भूता
नि तानि मय्येव शोभने॥२३॥ स्त्रीरत्नभूतां त्वां देवी

श्री॰
दु॰
४१

लोकेमन्यामहेवयं॥ सात्वमस्मानुपागम्य यतोर
त्नभुजोवयं॥६४॥ मांवाममानुजंवापिनिशुंभमु
रुविक्रम॥ भजत्वंचंचलापांगिरत्नभूतासिवैयतः
॥६५॥ परमैश्वर्यमतुलंप्राप्स्यसेमत्परिग्रहात्॥ ए
तद्बुध्यासमालोच्यमत्परिग्रहतांव्रज॥६६॥ ऋषि
रुवाच॥ इत्युक्तासातदादेवीगंभीरांतःस्मिताजग
गौ॥ दुर्गाभगवतीभद्राययेदंधार्यतेजगत॥६७॥

देव्युवाच॥ सत्यमुक्तंत्वयानात्रमिथ्याकिंचित्त्वयो
दितं॥ त्रैलोक्याधिपतिःशुंभोनिशुंभश्चापिताट
शः॥६८॥ किंत्वत्रयत्प्रतिज्ञातंमिथ्यातत्क्रियतेक
थं॥ श्रूयतामल्पबुद्धित्वात्प्रतिज्ञायाकृतापुरा
६९॥ योमांजयतिसंग्रामेयोमेदर्पंव्यपोहति॥
योमेप्रतिबलोलोसमेभर्ताभविष्यति॥७०॥त
दागच्छतुशुंभोत्रनिशुंभोवामहासुरः॥ मांजि

त्वाकिंचिरेणात्रपाणिंशक्रात्वमेलत्रुः॥७१॥हतौ
वाच॥ अवलिप्तासिमैवत्वंदेविशक्तिसमाश्रतः
त्रैलोक्यैकःपुमांस्तिष्ठेदग्रेशुंभनिशुंभयोः॥७२
अन्येषामपिदैत्यानांसर्वेदेवानवैयुधि॥तिष्ठंति
संमुखंदेवीकिंपुनःस्त्रीत्वमेकिका॥७३॥इंद्रा
द्याःसकलादेवास्तस्थुर्येषांनसंयुगे॥शुंभादी
नांकथंतेषांस्त्रीयांस्यसिचसन्मुखं॥७४॥सात्वं

गछमयैवोक्तापार्श्वंसुंभनिसुंभयोः ॥ केशाकर्ष
णनिर्धूतगौरवामागमिष्यसि ॥ ७५ ॥ देव्युवा
च ॥ एवमेतद्बलीसुंभोनिसुंभश्चातिवीर्यवान् ॥
किंकरोमिप्रतिज्ञामेयदनालोचितापुरा ॥ ७६
सात्वंगछमयैवोक्तंयदेतत्सर्वमादृतः ॥ तदाच
क्ष्वासुरेंद्रायसचयुक्तंकरोतुयत् ॥ ७७ ॥ इतिश्री
मार्कंडेयपुराणेसावर्णिकेमन्वंतरे श्रीदेवीम

हात्म्येदूतसंवादोनामपंचमोध्यायः॥५॥ऋषिरु
वाच॥ इत्याकर्ण्यवचोदेव्याःसदूतोमर्षपूरितः॥ स
माचष्टसमागम्यदैत्यराजायविस्तरात्॥१॥तस्यदू
तस्यतद्वाक्यमाकर्ण्यासुरराट्ततः॥सक्रोधःप्राह
दैत्यानामधिपंधूम्रलोचनं॥२॥हेधूम्रलोचना
शुत्वंस्वसैन्यपरितः॥तामानयबलाद्दुष्टांकेशा
कर्षणविह्वलां॥३॥तत्परित्राणदःकश्चिद्यदिवो

निष्ठतेपरः ॥ सहंतव्योमरोवापियक्षगंधर्वएवच ॥
४ ॥ ऋषिरुवाच ॥ तेनाज्ञप्तस्ततः शीघ्रंसदैत्योधूम्रलो
चनः ॥ वृतः षष्ट्यासहस्राणामसुराणांद्रुतंययौ ॥
५ ॥ सदृष्ट्वातांततोदेवींतुहिनाचलसंस्थितां ॥ ज
गादोच्चैः प्रयाहीतिमूलंशुंभनिशुंभयोः ॥ ६ ॥ नचे
त्प्रीत्याद्यभगवतीमद्भर्तारमुपैष्यसि ॥ ततोबला
न्नयाम्येषकेशाकर्षणविह्वलां ॥ ७ ॥ देव्युवाच

दैत्येश्वरेणप्रहितोबलवान्बलसंवृतः॥ बलान्नय
स्यमामेवंततःकिंतेकरोम्यहं॥८॥ ऋषिरुवाच॥
इत्युक्तः सोभ्यधावत्तामसुरोधूम्रलोचनः॥ हुंका
रेणैवतंभस्मसाचकारांबिकाततः॥९॥ अथक्रु
द्धंमहासैन्यमसुराणांतथांबिका॥ ववर्षसायकै
स्तीक्ष्णैस्तथाशक्तिपरश्वधैः॥१०॥ ततोधुतसटः
कोपात्कृत्वानादंसुभैरवं॥ पपातासुरसेनायांसिं

हादेव्यास्ववाहनः॥२५॥कांश्चित्करप्रहारेणदैत्याना
स्येनचापरान्॥आक्रांत्याचतथैवान्यान्सजघानम
हासुरान्॥२६॥केषांचित्पाटयामासनखैःकोष्टा
निकेसरी॥तथातलप्रहारेणशिरांसिकृतवान्
पृथक्॥२७॥विछिन्नबाहुशिरसःकृतास्तेनतथा
परे॥पपौचरुधिरंकोष्टादन्येषांधुतकेसरः॥२८॥
क्षणेनतद्बलंसर्वंक्षयंनीतंमहात्मनः॥तेनकेसरि

एतद्देव्यावाहनेनातिकोपिना ॥ २२ ॥ श्रुत्वातमसुरं
देव्यानिहतंधूम्रलोचनं ॥ बलंचक्षयितंकृत्स्नंदे
वीकेसरिणाततः ॥ चुकोपदैत्याधिपतिःशुंभःप्र
स्फुरिताधरः ॥ आज्ञापयामासचतौचंडमुंडौम
हासुरौ ॥ २३ ॥ हेचंडहेमुंडबलैर्बहुभिःपरिवारि
तौ ॥ तत्रगच्छतगत्वाचसासमानीयतांलघुः ॥ २४
केशेष्वाकृष्यबद्ध्वावायदिवःसंशयोयुधि ॥ तदा

शेषायुधैः सवैरसुरैर्विनिहतं निन्ये ॥१९॥ तस्यां हत

नायां दुष्टायां सिंहेच विनिपातिते ॥ शीघ्रमागम्य

तां वधामहीत्वा नामयांबिकां ॥२०॥ इति श्रीमार्कं

डेयपुराणे सावर्णिके मन्वंतरे श्री देवीमहात्म्ये धू

म्रलोचनवधोनाम षष्टोध्यायः ॥६॥ ऋषिरुवाच

ज्ञाज्ञाप्तास्तेततो दैत्याश्चंडमुंडपुरोगमः ॥ चतुरंगब

लोपेतायपुरभ्युद्यतायुधा ॥२॥ ददृशुस्ते ततो देवी

मीषद्धासांव्यवस्थितां॥ सिंहस्योपरिशैलेंद्रश्रृंगेम
हतिकांचने॥१॥तेदृष्ट्वातांसमादातुमुद्यमंचक्रुरु
द्यताः॥ आकृष्टचापासिधरास्तथान्येतत्समीप
गाः॥२॥ततःकोपंचकारोच्चैरंबिकातानरीन्प्रति
कोपेनचास्यावदनंमषीवर्णमभूत्तदा॥३॥भ्रुकुटी
कुटिलात्तस्याःललाटफलकाद्रुतं॥कालीकराल
वदनाःविनिष्क्रांतासिपाशिनी॥४॥विचित्रख

श्री
३
४६

ड्वांगधानरमालाविभूषणा॥ द्वीपिचर्मपरीधाना
शुष्कमांसातिभैरवं॥५॥ अतिविस्तारवदनाजिह्वा
ललनभीषणा॥ निमग्नारक्तनयनानादापूरित
दिङ्मुखा॥६॥ सावेगेनाभिपतिताघातयंतीमहा
सुरान्॥ सैन्येतत्रसुरारीणामभक्षयततद्बलं॥७
पार्ष्णिग्राहांकुशग्राहियोद्धघंटासमन्वितान्॥ स
मादायैकहस्तेनमुखेचिक्षेपवारणान्॥८॥ तथै

वयोऽहं त्वरगैरथं सारथिना सह ॥ निवृत्तिप्रवकेरणेर
श्ववेयत्पातिभैरवं ॥२०॥ एकं जन्माहके शोभ्यश्रीवाय
मघवापरं ॥ पादेनाक्रम्य चैवान्यान्तुरसाम्यमपो
षयत् ॥२१॥ नैमेकानि चगृणस्वाम्गिमहात्स्वाणित
षामरः ॥ स्तवेन जन्माहहषादणानेमेथिन्नान्यपि ॥
२२॥ बलिनां तद्बलं सर्वे मरुराणां दुरात्मनां ॥ मम
हृभक्तयश्चान्यान्नान्यां स्वातान्ताऽयन्तरा ॥२३॥ प्रसि

श्री
४०

नानिःहताःकेचित्केचित्खड्गताडिताः॥जग्मु
र्विनाशमसुरादंताग्राभिहतास्तथा॥२४॥क्षणे
नतद्बलंसर्वमसुराणांनिपातितं॥दृष्ट्वाचंडोऽ
भिदुद्रावतांकालीमतिभीषणां॥२५॥शरवर्षै
र्महाभीमैर्भीमाक्षींतांमहासुरः॥छादयामा
सचक्रैश्चमुंडःक्षिप्तैःसहस्रशः॥२६॥तानिचक्रा
ण्यनेकानिविशमानानितन्मुखं॥बभुर्यथार्

श्री
दु.
४८

केचिंवानिहवह्नहनिचनोदरं ॥२७॥ नेतोऽट्टहासानिह
षाभीमंभैरवनादिनी ॥ कालीकरालवक्रांतर्दुर्दर्श
नोज्वला ॥२८॥ उत्थायचमहासिंहंदेवीचंडमधा
वत ॥ गृहीत्वाचास्यकेशेषुशिरस्तेनासिनाछि
नत् ॥२९॥ छिन्नेशिरसिदैत्येंद्रश्चक्रेनादंसभैरवं
तेननादेनमहताल्लाषितंभुवनत्रयं ॥३०॥ म्यपत्रं
उपधावंतांदृष्टाचंडनिपातितं ॥ नमप्यपातयद्

मोसाचक्राभिहतंरुषा ॥२१॥ हतशेषंततःसैन्यंद
ष्ट्वाचंडंनिपातितं ॥ मुंडंचसुमहावीर्यंदिशोभेजेभया
तुरं ॥२२॥ शिरश्चंडस्यकालीचगृहीत्वामुंडमेवच
प्राहप्रचंडाट्टहासमिश्रमभ्येत्यचंडिकां ॥२३॥ दे
व्युवाच ॥ मयातवात्रोपहृतौचंडमुंडौमहापशू
न् ॥ युद्धयज्ञेस्वयंशुंभंनिशुंभंचहनिष्यति ॥२४॥
ऋषिरुवाच ॥ तावानीतौततोदृष्ट्वाचंडमुंडौमहा

सुरो॥ उवाचकालींकल्याणींललितंचंडिकांवचः

२५॥ देव्युवाच॥ यस्माच्चंडंचमुंडंचगृहीत्वात्वमुपा

गता॥ चामुंडेतिततोलोकेख्यातादेवीभविष्यति॥

२६॥ इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंत

रेश्रीदेवीमहात्म्येचंडमुंडवधोनामसप्तमोध्या

यः॥ ७॥ ऋषिरुवाच॥ चंडेतिनिहतेदैत्येमुंडच

विनिपातिते॥ बहुलेषुचसैन्येषुक्षपितेष्वसुरेश्व

श्री

दु

५८

र:॥१॥ततःकोपपराधीनःचेताशुंभःप्रतापवान्॥
उद्योगंसर्वसैन्यानांदैत्यानामादिदेशह॥२॥अद्यस
र्वबलैर्दैत्याःषडशीतिरुदायुधाः॥कंबूनांच
तुरशीतिर्निर्यांतुस्वबलैर्वृताः॥३॥कोटिवीर्या
णिपंचाशदसुराणांकुलानिवै॥शतंकुलानिधौ
म्राणांनिर्गच्छंतुममाज्ञया॥४॥कालकादौर्हृदा
मौर्याःकालिकेयास्तथासुराः॥युद्धायसज्यानि

र्यांत्वाज्ञापयात्वरितामम ॥२॥ इत्याज्ञाप्यासुरपतिःशुं
भोभैरवशासनः ॥ निर्जगाममहासैन्यःसहस्रैर्बहुभि
र्वृतः ॥३॥ आयंतंचंडिकादृष्ट्वातत्सैन्यमतिभीषणं ॥
ज्यास्वनैःपूरयामासधरणीगगनांतरं ॥४॥ ततःसिं
होमहानादमतीवकृतवान्नृप ॥ घंटास्वनेनतन्ना
दमंबिकाचोपबृंहयत ॥५॥ धनुर्ज्यासिंहघंटानां
नादापूरितदिङ्मुखा ॥ निनादैर्भीषणैःकालीजि

श्री
दु·
४०

तेविस्मारितानना॥९॥तंनिनादमुपाकर्ण्यदैत्यसैन्यैश्च
तुर्दिशं॥देवीसिंहस्तथाकालीसरोषैःपरिवारिता:
१०॥एतस्मिन्नंतरेभूपविनाशायसुरद्विषां॥भवा
यामरसिंहानामतिवीर्यबलान्विता:॥११॥ब्रह्मेश
गुहविष्णूनांतथेंद्रस्यचशक्तय:॥शरीरेभ्योविनि
ष्क्रम्यतद्रूपैश्चंडिकांययु:॥१२॥यस्यदेवस्ययद्रूपं
यथाभूषणवाहनं॥तद्वदेवहितच्छक्तिमसुरानयो

श्री॰
दु॰
४१

डुमाययौ॥१२॥ हंसयुक्तविमानस्था साक्षसूत्रकमं
डलुः॥ आयाता ब्रह्मणः शक्तिः ब्रह्माणी साभिधीय
ते॥१३॥ माहेश्वरी वृषारूढा त्रिशूलवरधारिणी॥ म
हाहिवलया प्राप्ता चंद्ररेखाविभूषणा॥१४॥ कौमा
री शक्तिहस्ता च मयूरवरवाहना॥ योद्धुमभ्याययौ दै
त्यानंबिकागुहरूपिणी॥१५॥ तथैव वैष्णवी शक्तिर्ग
रुडोपरि संस्थिता॥ शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्युपा

यथो॥१७॥ यज्ञवाराहमतुलं रूपं या बिभ्रती हरेः॥ शक्तिः साप्याययौ तत्र वाराही बिभ्रती तनुं॥१८॥ नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः॥ प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः॥१९॥ वज्रहस्ता तथैवैंद्री गजराजोपरि स्थिता॥ प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा॥२०॥ ततः परिवृतस्ताभिरीशानो देवशक्तिभिः॥ हन्यंतामसुराः शीघ्रं मम प्रीत्याह चंडिकां

२१॥ततोदेवीशरीरात्तुविनिष्क्रांतातिभीषणा॥चंडि
काशक्तिरत्युग्राशिवाशतनिनादिनी॥२२॥साचा
हधूम्रजटिलमीशानमपराजिता॥दूतत्वंगच्छभ
गवान्पार्श्वंशुंभनिशुंभयोः॥२३॥ब्रूहिशुंभंनिशुं
भंचदानवावतिगर्वितौ॥येचान्येदानवास्तत्रयुद्धा
यसमुपस्थिताः॥२४॥त्रैलोक्यमिंद्रोलभतांदेवाः
संतुहविर्भुजः॥यूयंप्रयांतुपातालंयदिजीवितु॥

श्री
दु०
२२

मिच्छत ॥२५॥ बलावलेपादथचेद्भवंतो युद्धकांक्षि
णः ॥ तदागच्छततृप्यंतु मच्छिवाः पिशितेन वः ॥
२६॥ यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयं ॥२
शिवदूतीति लोकेस्मिंस्ततः सा ख्यातिमागता
२७॥ तेपि श्रुत्वा वचो देव्याः सर्वाख्यातं महासुराः ॥
अमर्षापूरिता जग्मुः यत्र कात्यायनी स्थिता ॥२८॥
ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ॥ ववर्षु

हृद्गमर्षोल्लांदेवीममनाशय:॥२९॥साचताननुस्मि

हितानप्यारणान्स्मूलशक्तिपरस्त्वथान्॥चिक्केर

लीलयाधमातयन्तमैतोमहेभूभि:॥३०॥नस्वाग्र

नलयाकालीस्मूलपातविदारितान्॥स्वद्वांगपो

थितांस्तारीनकर्वतीव्यचरन्नरा॥३१॥कमंडलुज

लाक्षेपहतवीर्यानहतौजस:॥ब्रह्माणीचाक

रोच्छत्रुन्येनयेनास्मधावति॥३२॥माहेश्वरीत्रिशू

श्री० दु० १२

लेनतथाचक्रेणवैष्णवी ॥ दैत्यान्जघानकौमारीत
थाशक्त्यातिकोपना: ॥३३॥ ऐंद्रीकुलिशपातेनश
तशोदैत्यदानवा: ॥ पेतुर्विदारिता: पृथ्व्यांरुधिरौघ
प्रवर्षिण: ॥३४॥ तुंडप्रहारविध्वस्तादंष्ट्राग्रक्षतवक्ष
स: ॥ वाराहमूर्त्यान्यपतंश्चक्रेणचविदारिता: ॥३५
नखैर्विदारितांश्चान्यान् ॥ भक्षयंतीमहासुरान् ॥ ना
रसिंहीचचाराजौनादापूरितदिग्भ्रमा ॥३६॥ चंडाट्ट

हासैरसुराःशिवदूत्याभिदूषिताः॥पेतुःपृथिव्यांपति
तांस्तांश्चखादाथचंडिका॥३७॥इतिमातृगणंक्रुद्धं
मर्दयंतंमहासुरान्॥दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवा
रिसैनिकाः॥३८॥पलायनपरान्दृष्ट्वादैत्यान्मातृ
गणार्दितान्॥योद्धुमभ्याययौक्रुद्धोरक्तवीजोम
हासुरः॥३९॥रक्तविंदुर्यदाभूमौपतत्यस्यशरीरत
नः॥समुत्पततिमेदिन्यांतत्प्रमाणोमहासुराः॥४०॥

श्री
दु॰
२८

युयुधे सगदापाणिरिंद्रशक्त्या महासुरः॥ ततश्चैंद्री
स्ववज्रेण रक्तबीजमताडयत्॥४१॥ कुलिशेनाहत
स्याशु बहु सुस्राव शोणितं॥ समुत्तस्थुस्ततो यो
धास्तद्रूपास्तत्पराक्रमाः॥४२॥ यावंतः पतितास्त
स्य शरीराद्रक्तबिंदवः॥ तावंतः पुरुषा जातास्त
द्वीर्यबलविक्रमाः॥४३॥ ते चापि युयुधुस्तत्र पुरुषा
रक्तसंभवाः॥ समं मातृभिरत्युग्रशस्त्रपातातिभी

घलं ॥ ४४ ॥ उनस्त्र वज्रपातेन ततमस्य शिरो यदा ॥ व

वाहरकं पुलघास्ततो जाता: सहस्रशः ॥ ४५ ॥ वैस

वीसमरे चैनं चक्रेण भिन्न यानहा ॥ गदया ताडया

मास ऐं द्रीतमहासुरे श्वरं ॥ ४६ ॥ वैसवी चक्र भिन्नस्य

रुधिरस्रावं संभवैः ॥ सहस्रशोऽजगद्व्याप्तं तत्प्रमा

णैर्महासुरैः ॥ ४७ ॥ पाकाजघान कौमारी वारा

हीचतथासिना ॥ माहेश्वरी त्रिशूलेन रक्तबीजं म

श्री॰ दु॰ ५९

हासुरं॥४८॥सचापिगदयादैत्यःसर्वेएवाहनत्पृथ
क्॥मातॄःकोपसमाविष्टोरक्तबीजोमहासुरः॥४९
तस्याहतस्यबहुधाशक्तिशूलादिभिर्भुवि॥पपा
तयोवैरक्तौघस्तेनासंछतशोसुरः॥५०॥तैश्चासृ
क्संभूतैरसुरैसकलंजगत्॥व्याप्तमासीत्ततो
देवाभयमाजग्मुरुत्तमं॥५१॥तान्विषिण्णान्सुरान्
दृष्ट्वाचंडिकाप्राहसत्वरा॥उवाचकालींचामुंडे

विस्तीर्णवदनंकुरु॥५२॥मच्छस्त्रपातसंभूतान्रक्तविं
दून्महासुरान्॥रक्तविंदोःप्रतीच्छत्वंवक्त्रेणानेन
वेगिना॥५३॥भक्षयंत्याचररणेतदुत्पन्नान्महासु
रान्॥एवमेषःक्षयंदैत्यःक्षीणरक्तोगमिष्यति॥५४
भक्षमाणास्त्वयाचोग्रानचोत्पत्स्यंतिचापरे॥ऋ
षिरुवाच॥इत्युक्त्वातांततोदेवीशूलेनाभिजघा
नतं ५५ मुखेनकालीजगृहेरक्तबीजस्यशोणि

तं ॥ ततोसावाजघन्नाथगदयातत्रचंडिकां ॥४६॥ नचास्यावेदनांचक्रेगदापातोल्पिकामपि ॥ तस्याहतस्यदेहात्तुबहुसुस्रावशोणितं ॥७॥ यतस्ततःस्तद्वक्रेणचामुंडासंप्रतीच्छति ॥ मुखेसमुद्गतायेस्यारक्तपातान्महासुरान् ॥४८॥ तांश्चखादाथचामुंडापपौतस्यचशोणितं ॥ देवीशूलेनवज्रेणबाणैरसिभिरृष्टिभिः ॥४९॥ जघानरक्तबीजंतंचामुंडापीतशोण

णितं ॥ सपपात महीपृष्ठे शस्त्रसंघसमाहतः ॥ ६० ॥

नीरक्तश्च महीपाल रक्तबीजो महासुरः ॥ ततस्ते हर्ष

मतुलमवापुस्त्रिदशा नृप ॥ ६१ ॥ तेषां मातृगणो जा

तो ननर्तासृङ्मदोद्धतः ॥ ६२ ॥ इति श्रीमार्कंडेयपुराणे

सावर्णिके मन्वंतरे श्रीदेवीमहात्म्ये रक्तबीजवधो

नामाष्टमोध्यायः ॥ ८ ॥ ॐ राजोवाच ॥ विचित्रमि

दमाख्यातं भगवं भवता मम । देव्याश्चरितमाहात्म्यं

श्री. दु. ५०

रक्तवीजवधाश्रितं ॥१॥ भूयश्चेच्छाम्यहं श्रोतुं रक्तवी
जेनिपातिते ॥ चकार शुंभो यत्कर्म निशुंभश्चातिको
पिनः ॥२॥ ऋषिरुवाच ॥ चकार कोपमतुलं रक्तवी
जेनिपातिते ॥ शुंभासुरो निशुंभश्च हतेष्वन्येषु चाहु
वे ॥३॥ हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन्
अभ्यधावन्निशुंभोथ मुख्ययासुरसेनया ॥४॥ तस्या
ग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः ॥ संदष्टोष्ठ

टाः क्रुद्धा हंतुं देवीमुपाययुः ॥५॥ आजगाम महावीर्य
श्शुंभोपि स्वबलैर्वृतः ॥ निहंतुं चंडिकां कोपात्कृत्वा
युद्धं तु मातृभिः ॥६॥ ततो युद्धमतीवासीद्देव्या शुं
भनिशुंभयोः ॥ शरवर्षमतीवोग्रं मेघयोरिव वर्ष
तोः ॥७॥ चिच्छेदास्ताञ्छरांस्ताभ्यां चंडिकास्वश
रोत्करैः ॥ ताडयामास चांगेषु शस्त्रौघैरसुरेश्वरौ
॥८॥ निशुंभो निशितं खड्गं चर्म चादाय सुप्रभं ॥ अता

म॰ श्री दु॰ ५८

ऽयन्मूर्द्धिसिंहंदेव्यावाहनमुत्तमं॥९॥ताडितेवाहिने
देवीक्षुरप्रेणासिमुत्तमं॥निशुंभस्याशुचिच्छेदचर्म
चाप्यष्टचंद्रकं॥१०॥छिन्नेचर्मणिखड्गेचशक्तिंचि
क्षेपसोऽसुरः॥तामप्यस्यद्विधाचक्रेचक्रेणाभिमु
खागतां॥११॥कोपाध्मातोनिशुंभोथशूलंजग्राह
दानवः॥आयांतंमुष्टिपातेनदेवीतच्चाप्यचूर्णय
त्॥१२॥आविध्याथगदांसोपिचिक्षेपचंडिकांप्र

नि॥ सापि देवी त्रिशूलेन भित्त्वा भस्मत्वमागता॥२३॥ ततः
परशुहस्तं तमायान्तं दैत्यपुंगवं॥ आहत्य देवी बाणौघै
रपातयत भूतले॥२४॥ तस्मिंनिपतिते भूमौ निशुंभे
भीमविक्रमे॥ भ्रातर्यतीव संक्रुद्धः प्रययौ हंतुमंबिका
२५॥ स रथस्थस्तथात्युच्चैः गृहीतपरमायुधैः॥ भुजै
रष्टाभिरतुलैः व्याप्याशेषं बभौ नभः॥२६॥ तमायांतं स
मालोक्य देवी शंखमवादयत्॥ ज्याशब्दं चापि धनुष

श्चकारातीवदुःसहं ॥२७॥ पूरयामासककुभोनिजघंटा
स्वनेनच ॥ समस्तदैत्यसैन्यानांतेजोवधविधायिना
२८ ॥ ततःसिंहोमहानादैस्त्याजितेभमहामदैः ॥ पूर
यामासगगनंगांतथैवदिशोदश ॥२९॥ ततःकाली
समुत्पत्यगगनंक्ष्मामताडयत् ॥ कराभ्यांतन्निनादेन
प्राक्स्वनास्तेतिरोहिताः ॥३०॥ अट्टाट्टहासमशिवं
शिवदूतीचकारह ॥ तैःशब्दैरसुरास्त्रेसुःशुंभःकोपप

श्री
दु.
२०

रंयया ॥२१॥ दुगान्सति हुतिनिहुतिव्याजहासांविकायस्रा
तसानयेसभिहिनं देवैराकाशसंस्थितैः ॥२२॥ सुंभे
नागमयाघातिमें कान्वालानिभीषणा ॥ श्वायांती
वक्त्रिकूराभासानिरस्तामहोल्कया ॥२३॥ सिंहना
देनसंभस्यव्याप्तलोकत्रयांतरं ॥ निर्घातनिस्वनोघो
रोजितवानवनीपते ॥२४॥ संभस्कानशरान्देवीशुं
भंस्समसहितान्भूरान ॥ चिच्छेदस्वशरैःहुँग्रैश्रानयपा

ग

घसहस्रशः ॥२५॥ ततः साचंडिकाक्रुद्धाशूलेनाभि
जघानतं ॥ सतदाभिहतोभूमौमूर्छितोनिपपात
ह ॥२६॥ ततोनिशुंभःसंप्राप्यचेतनामात्तकार्मुकः
आजघानशरैर्देवींकालींकेसरिणंतथा ॥२७॥ पु
नश्चकृत्वाबाहूनामयुतंदनुजेश्वरः ॥ चक्रायुधेन
दितिजश्छादयामासचंडिकां ॥२८॥ ततोभगवतीक्रु
द्धादुर्गादुर्गार्तिनाशिनी ॥ चिच्छेदतानिचक्राणि

श्री· दु· ४१

स्वशरैः सायकांस्तान् ॥२९॥ ततो निशुंभो वेगेन गदा
मादाय चंडिका ॥ अभ्यधावत वै हंतुं दैत्यसेनासमावृ
तः ॥३०॥ तस्यापतत एवाशु गदां चिच्छेद चंडिका ॥
खड्गेन शितधारेण स च शूलं समाददे ॥३१॥ शूल
हस्तं समायांतं निशुंभममरार्दनं ॥ हृदि विव्याध
शूलेन वेगाविद्धेन चंडिकां ॥३२॥ भिन्नस्यं शूलेन
हृदयानिःसृतापरः ॥ महाबलो महावीर्यस्ति

ष्ठेतिव्रुहषोवदन् ॥३३॥ तस्यानिःक्रामतोदेवीप्र
हस्यस्वनवत्ततः ॥ शिरश्छिच्छेदखड्गेनततोसावप
तद्भुवि ॥३४॥ ततःसिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरो
धरान् ॥ असुरांस्तांस्तथाकालीशिवदूतीतथाप
रान् ॥३५॥ कौमारीशक्तिनिर्भिन्नाकेचिन्नेशुमहा
सुराः ॥ ब्रह्माणीमंत्रपूतेनतोयेनान्येनिराकृता ॥
३६ ॥ माहेश्वरीत्रिशूलेनभिन्नाःपेतुस्तथापरे ॥

वाराहीतुंडघातेन केचिच्चूर्णीकृता भुवि ॥३७॥ खंडखंडं
च चक्रेण वैष्णवे दानवाः कृताः ॥ वज्रेण चैंद्रीहस्ताग्रवि
मुक्तेन तथापरे ॥३८॥ केचिद्विनेशुरसुराः केचिन्नष्टा
महाहवात् ॥ भक्षिताश्चापरे कालीशिवदूतीमृ
गाधिपैः ॥३९॥ इति श्रीमार्कंडेयपुराणे सावर्णि
केमन्वंतरे श्रीदेवीमहात्म्ये शुंभनिशुंभवधोना
म नवमोध्यायः ॥९॥ ऋषिरुवाच ॥ निशुंभं

निहतेदृष्ट्वाभ्रातरंप्रणसंमितं॥ हन्यमानंवलंचै
वस्वंधः क्रुद्धोब्रवीद्वचः॥२॥ वलावलेपाद्दुष्टेत्वं
मादुर्गेगर्वमावह॥ अन्यासंवलमाश्रित्ययुद्ध्य
सेचातिमानिनी॥२॥ देव्युवाच॥ एकैवाहंजगत्य
त्रद्वितीयाकाममापरा॥ पश्यैतादुष्टमय्येवविशं
त्योमद्विभूतयः॥३॥ ऋषिरुवाच॥ ततःसमस्ता
स्तादेव्याब्रह्माणीप्रमुखालयं तस्यादेव्यास्तनौ

जग्मुरेकैवासीत्तदांबिका॥४॥ देव्युवाच॥ अहंवि
भूत्याबहुभिरिहरूपैर्यदास्थिता॥ तत्संहृतंमयै
कैवतिष्ठाम्याजौस्थिरोभव॥५॥ ऋषिरुवाच॥
ततःप्रववृतेयुद्धंदेव्याःशुंभस्यचोभयोः॥ पश्यतां
सर्वदेवानामसुराणांचदारुणं॥६॥ शरवर्षैःशि
तैःशस्त्रैस्तथास्त्रैश्चैवदारुणैः॥ तयोर्युद्धमभू
द्भूयःसर्वलोकभयंकरं॥७॥ दिव्यान्यस्त्राणिश

श्री. ३. ६३

नयोगस्तुस्तुचेयात्म्यांविका॥ भवंजनानिदेमें
इत्थमतीजातकार्नेभिः॥८॥ स्तुकानितेनयाम्वा
णिदिव्यानिपरमेश्वरी॥ वभंजलीलयेवोग्रंॐ
कारोस्वारण्णादिभि॥७॥ ततःसायस्पानेदेवीमा
कादयतसोस्तरः॥ मापिनत्कपिनादेवीपवर
श्चिक्केरचेष्ठभिः॥१०॥ क्षिनेधनषिदेसंइलया
पात्किमपाददे॥ चिक्केदेवीचक्रेणतांमप्पस

केरस्थितां ॥२१॥ ततःखड्गमुपादायश-चंद्रंच
भानुमान् ॥ अभ्यधावत्तदादेवींदैत्यानामधिपेश्व
रः ॥२२॥ तस्यापततएवाशुखड्गंचिछेदचंडिका ॥
धनुर्मुक्तैःशितैर्बाणैश्चर्मचार्ककरामलं ॥२३॥ ह
ताश्वःसतदादैत्यछिन्नधन्वाविसारथिः ॥ जग्राह
मुद्गरंघोरमंबिकानिधनोद्यतः ॥२४॥ चिछेदप
ततस्तस्यमुद्गरंनिशितैःशरैः ॥ तथापिसोभ्यधा

श्री
दु.
२४

वत्तांमुष्टिमुद्यम्यवेगवान्॥२४॥समुष्टिंपातयामास
हृदयेदैत्यपुंगवः॥देव्यास्तंचापिसादेवीतलेनोरस्यता
डयत्॥२५॥तलप्रहाराभिहतोनिपपातमहीतले॥स
दैत्यराजःसहसापुनरेवतथोत्थितः॥२६॥उत्पत्यच
प्रगृह्योच्चैर्देवींगगनमास्थितः॥तत्रापिसानिराधा
रायुयुधेतेनचंडिका॥२७॥नियुद्धंखेतदादैत्यश्चंडि
काचपरस्परं॥चक्रतुःप्रथमंयुद्धंमुनिविस्मयकार

श्री
दु
६९

कं ॥२५॥ ततो नियुद्धं सुचिरं कृत्वा तेनांबिका सह ॥ उ
त्पाद्य भ्रामयामास चिक्षेप धरणीतले ॥२६॥ स क्षिप्तो
धरणीं प्राप्य मुष्टिमुद्यम्य वेगवान् ॥ अभ्यधावत दु
ष्टात्मा चंडिकानिधनेछया ॥२७॥ तमायांतं ततो देवी
सर्वदैत्यजनेश्वरं ॥ जगत्यां पातयामास भित्वा शूले
न वक्षसि ॥२८॥ स गतासुः पपातोर्व्यां देवीशूलाग्रवि
क्षतः ॥ चालयन्सकलां पृथ्वीं साब्धिद्वीपां सपर्वतां

२३॥ ततः प्रसन्नमखिलं हतेतस्मिन्दुरात्मनि॥ जग
त्स्वास्थ्यमतीवापनिर्मलंचाभवन्नभः॥ २४॥ उत्पातमे
घाःसोल्कायेप्रागासंस्तेशमंययुः॥ सरितोमार्गवा
हिन्यास्तथासंस्तत्रपातिते॥ २५॥ ततोदेवगणाः
सर्वेहर्षनिर्भरमानसाः॥ बभूवुर्निहतेतस्मिन्गंध
र्वाललितंजगुः॥ २६॥ अवादयंस्तथैवान्येननृतु
श्चाप्सरोगणाः॥ ववुःपुण्यास्तथावाताःसुप्रभोऽभू

श्री
दु.
९९

दिवाकरः॥ जज्वलुश्चाग्नयः शांताः शांतदिग्जनितस्व
नाः॥२८॥ इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वं
तरेश्रीदेवीमहात्म्येशुंभनिशुंभवधोनामदशमो
ध्यायः॥१०॥ ऋषिरुवाच॥ देव्याहतेतत्रमहासुरेंद्रे
सेंद्राःसुराःवह्निपुरोगमास्तां॥ कात्यायनींतुष्टुवुरि
ष्टलाभाद्विकाशिवक्त्राब्जविकाशिताशाः॥२॥ देवा
ऊचुः॥ देविप्रपन्नार्तिहरेप्रसीदप्रसीदमातर्जगतो

तोखिलस्य॥ प्रसीदविश्वेश्वरिपाहिविश्वंत्वमीश्व
रीदेविचराचरस्य॥२॥ आधारभूताजगतस्त्वमे
कामहीस्वरूपेणयतःस्थितासि॥ अपांस्वरूप
स्थितयात्वयैतदाप्यायतेकृत्स्नमलंघ्यवीर्ये॥३
त्वंवैष्णवीशक्तिरनंतवीर्याविश्वस्यबीजंपरमासि
माया॥ संमोहितंदेविसमस्तमेतत्त्वंवैप्रसन्नाभु
विमुक्तिहेतुः॥४॥ विद्यासमस्तास्तवदेविभेदाः

श्री. दु. ६०

स्त्रियः समस्ताः सकला जगत्सु ॥ त्वयैकया पूरितमंब
यैतत्का ते स्तुतिः स्तव्यपरापरोक्तिः ॥ ५ ॥ सर्वभूत
यदा देवि स्वर्गमुक्तिप्रदायिनि ॥ त्वं स्तुता स्तुतये का
वा भवंतु परमोक्तयः ॥ ६ ॥ सर्वस्य बुद्धिरूपेण जन
स्य हृदि संस्थिते ॥ स्वर्गापवर्गदे देवि नारायणि
नमोऽस्तु ते ॥ ७ ॥ कलाकाष्ठादिरूपेण परिणामप्र
दायिनि ॥ विश्वस्योपरतौ शक्ते नारायणि नमो

स्तुते ॥८॥ सर्वमंगलमंगल्येशिवेसर्वार्थसाधके
शरण्येत्र्यंबकेगौरिनारायणि० ॥९॥ सृष्टिस्थिति
विनाशानांशक्तिभूतेसनातनी ॥ गुणाश्रयेगुण
मयेनारायणि० ॥१०॥ शरणागतदीनार्तपरित्रा
णपरायणे ॥ सर्वस्यार्तिहरेदेविनारायणि० ॥११
हंसयुक्तविमानस्थेब्रह्माणीरूपधारिणि ॥ कौ
शांभःक्षरिकेदेविनारायणि० ॥१२॥ त्रिशूलचंद्रा

हिधरेमहावृषभवाहिनी॥ माहेश्वरीस्वरूपेणनारा
यणि॥१६॥ मयूरकुक्कुटवृतेमहाशक्तिधरेनघे
कौमारीरूपसंस्थानेनारायणि॥१७॥ शंखचक्र
गदाशार्ङ्गगृहीतपरमायुधे॥ प्रसीदवैष्णवीरूपे
नारायणि॥१८॥ गृहीतोग्रमहाचक्रेदंष्ट्रोधृतवसुं
धरे॥ वाराहरूपिणिशिवेनारायणि॥१९॥ नृसिंह
रूपेणोग्रेण॥ हंतुंदैत्यान्कृतोद्यमे॥ त्रैलोक्यत्राण

श्री
उ.
६८

सहितेनारायणि ॥२७॥ किरीटिनिमहावज्रे सह
स्रनयनोज्ज्वले ॥ वृत्रप्राणहरेचैंद्रिनारायणि ॥२८
शिवदूतीस्वरूपेणहतदैत्यमहाबले ॥ घोररूपेम
हारावेनारायणि ॥२९॥ दंष्ट्राकरालवदनेशिरो
मालाविभूषणे ॥ चामुंडेमुंडमथनेनारायणि ॥
३०॥ लक्ष्मिलज्जेमहाविद्येश्रद्धेपुष्टिस्वधेध्रुवे ॥ म
हारात्रिमहाविद्येनारायणि ॥३१॥ मेधेसरस्वतिव

रेभ्यस्त्वाध्वविनामसि॥ नियते त्वं प्रसीदेशे नारायणि॥
२२॥ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते॥ भयेभ्यः
स्त्राहि नो देवि नारायणि॥२३॥ सर्वतः पाणिपादं
तसर्वतोक्षिशिरोमुखे॥ सर्वतः श्रवणघ्राणे नारा
यणि नमोस्तु ते॥२४॥ एतत्ते वदनं सौम्यं लोचनत्र
यभूषितं॥ पातु नः सर्वभीतिभ्यः कात्यायनि नमो
स्तु ते॥२५॥ ज्वालाकरालमत्युग्रमशेषासुरसूद

नं ॥ त्रिशूलंपातुनोभीतेर्भद्रकालिनमोस्तुते ॥२६॥
हिनस्तिदैत्यतेजांसिस्वनेनापूर्ययाजगत् ॥ साघं
टापातुनोदेविपापेभ्योनःसुतानिव ॥२७॥ असुरा
सृग्वसापंकचर्चितस्तेकरोज्वलः ॥ शुभायखड्गो
भवतुचंडिकेत्वांनतावयं ॥२८॥ रोगानशेषानपहं
सितुष्टारुष्टातुकामान्सकलानभीष्टान् ॥ त्वामा
श्रितानांनविपन्नराणांत्वामाश्रिताह्याश्रयतांप्र

यांति॥२९॥एतत्कृतंयत्कदनंत्वयाद्यधर्मद्विषांदेविम
हासुराणां॥रूपैरनेकैर्बहुधात्ममूर्त्तिंकृत्वांबिके
तत्प्रकरोतिकान्या॥३०॥विद्यासुशास्त्रेषुविवेकदी
पेष्वाद्येषुवाक्येषुचकात्वदन्या॥ममत्वगर्त्तेतिमहां
धकारेविभ्रामयत्येतदतीवविश्वं॥३१॥रक्षांसियत्रो
ग्रविषाश्चनागायत्रारयोदस्युबलानियत्र॥दावा
नलोयत्रतथाब्धिमध्येतत्रस्थितात्वंपरिपासिवि

स्व ॥३२॥ विश्वेश्वरित्वंपरिपासिविश्वंविश्वात्मिका
धारयसीतिविश्वं ॥ विश्वेशवंद्याभवतीभवंतिवि
श्वाश्रयायेत्वयिभक्तिनम्राः ॥३३॥ देविप्रसीदपरि
पालयनोरिभीतेर्नित्यंयथासुरवधादधुनैवसद्यः
पापानिसर्वजगतांप्रशमंनयाशुउत्पातपाकज
नितांश्चमहोपसर्गान् ॥३४॥ प्रणतानांप्रसीदत्वं
देविविश्वार्तिहारिणि ॥ त्रैलोक्यवासिनामीड्ये

लोकानांवरदाभव॥३५॥देव्युवाच॥वरदाहंसुरग
णावरंयन्मनसेछथ॥तंवृणुध्वंप्रयछामिजगताम
पकारकं॥३६॥देवाऊचुः॥सर्वबाधाप्रशमनंत्रै
लोक्यस्याखिलेश्वरि॥एवमेवत्वयाकार्यमस्म
द्वैरिविनाशनं॥३७॥वैवस्वतेंतरेप्राप्तेअष्टाविंश
तिमेयुगे॥शुंभोनिशुंभश्चैवान्याउत्पत्स्येतेमहा
सुरौ॥३८॥नंदगोपगृहेजातायशोदागर्भसंभवा

श्री
दु.
७२

ततस्तौ नाशयिष्यामि विंध्याचलनिवासिनी ॥३९॥
पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ॥ अवतीर्य ह
निष्यामि वैप्रचित्तांस्तु दानवान् ॥४०॥ भक्षयंत्याश्च
तानुग्रान्वैप्रचित्तान्महासुरान् ॥ रक्तादंता भविष्यं
ति दाडिमीकुसुमोपमाः ॥४१॥ ततो मां देवताः स्वर्गे
मर्त्यलोके च मानवाः ॥ स्तुवंतो व्याहरिष्यंति सततं
रक्तदंतिकां ॥४२॥ भूयश्च शतवार्षिक्यामनावृष्ट्या

मनंभसि ॥ मुनिभिः संस्तुताभूमौ संभविष्याम्ययो
निजा ॥४३॥ ततः शतेन नेत्राणां निरीक्षिष्यामिय
न्मुनीन् ॥ कीर्त्तयिष्यंति मनुजा शताक्षीमिति मांत
तः ॥४४॥ ततोहमखिलंलोकमात्मदेहसमुद्भवैः ॥
भविष्यामि सुराशाकैरावृष्टेः प्राणधारकैः ॥४५॥ शा
कंभरीति विख्यातं तदा यास्याम्यहं भुवि ॥ तत्रैव च व
धिष्यामि दुर्गमाख्यं महासुरं ॥४६॥ दुर्गादेवीति

विख्यातिं तन्मे नाम भविष्यति॥ पुनश्चाहं यदा भीमं
रूपं कृत्वा हिमाचले॥४७॥ रक्षांसि भक्षयिष्यामि
मुनीनां त्राणकारणात्॥ तदा मां मुनयः सर्वे स्तोष्यं
त्यानम्रमूर्त्तयः॥४८॥ भीमादेवीति विख्यातं तन्मे
नाम भविष्यति॥ यदारुणाख्यस्त्रैलोक्ये महाबाधां क
रिष्यति॥४९॥ तदाहं भ्रामरं रूपं कृत्वासंख्येयष
ट्पदं॥ त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरं

श्री
५.
७३

भ्रामरीतिचमांलोकास्तदास्तोष्यंतिसर्वतः॥इत्थं
यदायदाबाधादानवोत्थाभविष्यति॥५१॥तदात
दावतीर्याहंकरिष्याम्यरिसंक्षयं॥५२॥इतिश्रीमा
र्कंडेयपुराणेसावर्णिकेमन्वंतरेश्रीदेवीमहात्
म्येनारायणिस्तुतिर्नामैकादशोऽध्यायः॥देव्यु
वाच॥एभिस्तवैश्चमांनित्यंस्तोष्यतेयःसमाहि
तः॥तस्याहंसकलांबाधांशमयिष्याम्यसंशयः

२॥ मधुकैटभनाशंचमहिषासुरघातनं॥ कीर्त्तयिष्यंति
येतद्वद्वधंसुंभनिसुंभयोः॥२॥ अष्टम्यांचचतुर्दश्यां
नवम्यांचैकचेतसः॥ श्रोष्यंतिचैवयेभक्त्याममम
हात्म्यमुत्तमं॥३॥ नतेषांजायतेकिंचिद्दुःकृतोत्था
नचापदः॥ भविष्यंतिनदारिद्र्यंनचैवेष्टवियोजनं
४॥ शत्रुतोनभयंतस्यदस्युतोवानराजतः॥ नशा
स्त्रानलतोयौघात्कदाचित्संभविष्यति॥५॥ तस्मान्म

चौ

मेतन्माहात्म्यंपठितव्यंसमाहितैः॥ श्रोतव्यंचसदा
भक्त्यापरंस्वस्त्ययनंमहत्॥६॥उपसर्गानशेषांस्तु
महामारीसमुद्भवान्॥ तथात्रिविधमुत्पातंमाहा
त्म्यंशमयेन्मम॥७॥यत्रैतत्पठ्यतेसम्यङ्नित्यमा
यतनेमम॥ सदानतद्विमोक्ष्यामिसान्निध्यंतत्रमेस्थि
तं॥८॥बलिप्रदानेपूजायामग्निकार्येमहोत्सवे॥
सर्वममैतच्चरितमुच्चार्यंश्राव्यमेवच॥९॥जानताऽजा

श्री
दु.
७४

नता:वापिवलिपूजांतथाकृतां॥प्रतीच्छिष्याम्यहंप्री
त्यावह्निहोमंतथाकृतं॥१०॥शरत्कालेमहापूजाक्रि
यतेयाश्चवार्षिकी॥तस्यांममैतन्माहात्म्यंश्रुत्वाभ
क्तिसमन्वितः॥११॥सर्ववाधाविनिर्मुक्तोधनधान्यसु
तान्वितः॥मनुष्योमत्प्रसादेनभविष्यतिनसंशयः॥
१२॥श्रुत्वाममैतन्माहात्म्यंतथाचोत्पत्तयःशुभाः॥
पराक्रमंचयुद्धेषुजायतेनिर्भयःपुमान्॥१३॥रिपवः

श्री
दु
७५

संक्षयं यांति कल्याणं चोपपद्यते ॥ नंदते च कुलं पुंसां
माहात्म्यं मम शृण्वतां ॥ १० ॥ शांतिकर्माणि सर्वत्र
तथा दुःस्वप्नदर्शने ॥ ग्रहपीडासु चोग्रासु माहात्म्यं
शृणुयान्मम ॥ ११ ॥ उपसर्गाः शमं यांति ग्रहपीडाश्च
दारुणाः ॥ दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥ १२
बालग्रहाभिभूतानां बालानां शांतिकारकं ॥ संघातभे
दे च नृणां मैत्रीकरणमुत्तमं ॥ १३ ॥ दुर्वृत्तानामशेषाणां

बलहानिकरंपरं॥रक्षोभूतपिशाचानांपठनादेवनाश
नं॥८॥सर्वंममैतन्माहात्म्यंममसान्निध्यकारकं॥पशु
पुष्पार्घधूपैश्चगंधदीपैस्तथोत्तमैः॥९॥विप्राणांभो
जनैर्होमैःप्रोक्षणीयैरहर्निशं॥अन्यैश्चविविधैर्भोगैः
प्रदानैर्वत्सरेणया॥१०॥प्रीतिर्मेक्रियतेसास्मिन्सकृ
त्सुचरितेश्रुते॥श्रुतंहरतिपापानितथारोग्यंप्रयच्छ
ति॥११॥रक्षांकरोतिभूतेभ्योजन्मनांकीर्तनंमम॥

श्री रा ७८

पुंडेक्षुचरितंयन्मेदृष्टैस्तानिवर्हेलं ॥२२॥ नतस्मिन्स्वस्तनेवै
रिकृतंभयंपुंसांनजायते ॥ उभाभिस्तनयोयाश्चयाः
श्चयाश्चब्रह्मर्षिभिःकृता: ॥२३॥ ब्रह्मणावकृतारक्षा
स्वप्नयकंतच्छुभांमतिं ॥ आरण्येप्रांतरेवापिदावाग्नि
परिवारितः ॥२४॥ दस्युभिर्वाकृतःस्कन्येगृहीतोवापि
शत्रुभिः ॥ सिंहव्याघ्रानुयातोवावनेवावनहस्तिभिः
२५॥ राजाज्ञकृदेनचात्तग्रावंध्योवंधगतोपिवा ॥ समु

र्णितोवावातेनस्थितःपोतेमहार्णवे ॥२६॥ पतत्सु
चापिशस्त्रेषुसंग्रामेभृशदारुणे ॥ सर्वबाधासुघो
रासुवेदनाभ्यर्दितोपिवा ॥२७॥ स्मरन्ममैतच्चरितंन
रोमुच्येतसंकटात् ॥ ममप्रभावात्सिंहाद्यादस्यवोवैरि
णस्तथा ॥२८॥ दूरादेवपलायंतेस्मरतश्चरितंमम
ऋषिरुवाच ॥ इत्युक्त्वासाभगवतीचंडिकाचंडविक्र
मा ॥२९॥ पश्यतामेवदेवानांतत्रैवांतरधीयत ॥ तेपि

देवानिगतंकार्याधिकारान्यथापुरा॥यज्ञभागभुजः
सर्वेचक्रुर्विनिहतारयः॥दैत्याश्चदेव्यानिहतेशुंभेदेवरि
पौयुधि॥३१॥जगद्विध्वंसिनितस्मिन्महोग्रेतुलविक्र
मे॥निशुंभेचमहावीर्येशेषाःपातालमाययुः॥३२॥
एवंभगवतीदेवीसानित्यापिपुनःपुनः॥संभूयकुरुते
भूपजगतःपरिपालनं॥३३॥तयैतन्मोह्यतेविश्वं
सैवविश्वंप्रसूयते॥सायाचिताचविज्ञानंतुष्टाऋद्धिं

प्रयछति॥३४॥व्याप्तंतयैतत्सकलंब्रह्मांडंमनुजे-
श्वरं॥महाकाल्यामहाकालीमहामारीस्वरूपया
॥३५॥सैवकालीमहामारीसैवसृष्टिर्भवत्यजा॥
स्थितिंकरोतिभूतानांसैवकालीसनातनी॥३६॥
भवकालेनृणांसैवलक्ष्मीर्वृद्धिःप्रदागृहे॥सैवभा
वेतथालक्ष्मीर्विनाशायोपजायते॥३७॥स्तुतासं
पूजितापुष्पैर्धूपगंधादिभिस्तथा॥ददातिवित्तंपुत्रांश्च

मनिंधर्मेनघाम्नुभां॥२८॥इतिश्रीमार्कंडेयपुराणेसा
वर्णिकेमन्वंतरेश्रीदेवीमहात्म्येपुराणस्तुतिर्नाम
द्वादशोध्यायः॥१२॥ऋषिरुवाच॥एतत्तेकथितंभू
पदेवीमहात्म्यमुत्तमं॥एवंप्रभावसादेवीययेदंधार्य
तेजगत॥१॥विद्यातथैवक्रियतेभगवद्विष्णुमायया
तयात्वमेषवैश्यश्चतथैवान्येविवेकिनः॥२॥मोह्यंते
मोहिताश्चैवमोहमेष्यंतिचापरे॥तामुपैहिमहारा

श्री
दु.
७८

नंशरणंपरमेश्वरी ॥३॥ आराधितासैवनृणांभोग
स्वर्गापवर्गदा ॥ श्रीमार्कंडेयउवाच ॥ इतितस्यवचः
श्रुत्वासुरथःसनराधिपः ॥४॥ प्रणिपत्यमहाभाग
तमृषिंसंशितव्रतं ॥ निर्विण्णोतिममत्वेनराज्यापहर
णेनच ॥५॥ जगामसद्यस्तपसेसचवैश्योमहामुने
संदर्शनार्थमंबायानदीपुलिनसंस्थितः ॥६॥ सच
वैश्यस्तपस्तेपेदेवीसूक्तंपरंजपन् ॥ तौतस्मिन्पुलि

श्री·
दु·
७८

नेदेव्याःकृत्वामूर्त्तिंमहीमयीं ॥७॥ अर्हणंचकृतंतत्
स्याःपुष्पधूपाग्नितर्पणैः ॥ निराहारौयताहारौतन्
मनस्कौसमाहितौ ॥८॥ ददतुस्तौबलिंचैवनिजगात्रा
सृगुक्षितं ॥ एवंसमाराधयतोस्त्रिभिर्वर्षैर्यतात्मनो
ः ॥ परितुष्टाजगद्धात्रीप्रत्यक्षंप्राहचंडिका ॥ देव्युवा
च ॥ यत्प्रार्थ्यतेत्वयाभूपत्वयाचकुलनंदन ॥१०॥ सो
पिवैश्यस्ततोज्ञानंवव्रेनिर्विण्णमानसः ॥ ममेतिह

मितिमात्रसंगविच्युतकारकं ॥२२॥ देव्युवाच ॥ स्व
ल्पैरहोभिर्नृपतेस्वंराज्यंप्राप्स्यसेभवान् ॥ हत्वारिपू
नस्खलितंतवतत्रभविष्यति ॥२३॥ मृतश्चभूयःसंप्रा
प्यजन्मदेवाद्विवस्वतः ॥ सावर्णिकोमनुर्नामभवा
न्भुविभविष्यति ॥२४॥ वैश्यवर्यत्वयायश्चवरोस्म
त्तोभिवांछितः ॥ तंप्रयच्छामिसंसिद्ध्यैतवज्ञानंभवि
ष्यति ॥२५॥ श्रीमार्कंडेयउवाच ॥ इतिदत्वातयोर्दे

वीयथाभिलषितंवरं॥ वभूवांतर्हितासद्योभक्त्यातान्
भ्यामभिष्टुता॥१२॥ एवंदेव्यावरंलब्ध्वासुरथःक्षत्रिय
र्षभः॥ सूर्यजन्मसमासाद्यसावर्णिर्भवितामनुः॥१३
इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेश्री
देवीमहात्म्येवैश्यवरंप्रदानंनामत्रयोदशोध्या
यः॥१३॥ अथदेवीसूक्तं॥ नमःसरस्वत्यै॥ अहं
रुद्रेभिःवसुभिःचरामिहमादित्यैरुतविश्वदेवैः॥ अहं

मित्रावरुणोभाविभर्म्यहमिंद्राग्नीअहमश्विनोभा॥अहं
सोममाहनसंबिभर्म्यहंत्वष्टारमुतपूषणंभगं॥अहं
दधामिद्रविणंहविष्मतेसुप्रव्येयजमानायसुन्वते॥
अहंराष्ट्रीसंगमनीवसूनांचिकितुषीप्रथमायज्ञि
यानां॥तांमादेवाव्यदधुःपुरुत्राभूरिस्थात्रांभूर्यावे
शयंती॥मयासोअन्नमत्तियोविपश्यतियःप्राणि
तियईंशृणोत्युक्तं॥अमंतवोमांतउपक्षियंतिश्रुधि

तःश्रुद्धिवंतेवदामि ॥ अहमेवस्वयमिदंवदामिजुष्टं
देवेभिःरुतमानुषेभिः ॥ यंकामयेतंतमुग्रंकृणोमितं
ब्रह्माणंतमृषिंतंसुमेधसां ॥ अहंरुद्रायधनुरातनो
मिब्रह्मद्विषेशरवेहंतवाउ ॥ अहंजनायसमदंकृणोमि
अहंद्यावापृथिवीआविवेश ॥ अहंसुवेपितरमस्य
मूर्द्धन्ममयोनिरप्स्वंतःसमुद्रे ॥ ततोवितिष्ठेभुव
नानिविश्वातामूंद्यांवर्ष्मणोपस्पृशामि ॥ अहमे

वतानरूवप्रवम्यारभमाणाभुवनानिविश्वा॥ परोदि

वापरयनएपृथिव्यैतावतीमहिमानासंवभूव॥ इति

देवीसूक्तंसमाप्तं॥ ॐनमःत्रिपुरसुंदर्यै॥ अस्यश्रील

घ्वाचार्यस्तोत्रस्य॥ सनत्कुमारऋषिः॥ त्रिष्टुपछंदः॥ श्री

त्रिपुरभैरवीदेवता॥ ऐंवीजं॥ क्लीं शक्तिः॥ सौंकीलकं

मनविंथपुरुषार्थेजपेविनियोगः॥ ॐऐंदृसेवप्राण

मनस्वरधनीमध्येललाटप्रभां॥ प्रोक्लींकांनिम

त्रस्य गौरि विषिमस्यानन्तनी सर्वतः ॥ एषा सौ त्रिपुरा
हृरिस्थानिलहृदि फतिरिवोल्लां ग्रोसदा हृस्थिता
किंर्द्धजं सहसा परैस्त्रिभिरचंज्योतिर्मयी वाङ्म
यी ॥ २ ॥ या मात्रा त्रपुसीलतानन्तलसत्तंतुस्थिति
स्पर्धिनी ॥ वाग्बीजे प्रथमे स्थितातव सदा तां मन्म
हे ते वयं ॥ शक्तिः कुंडलिनीति विश्वजननव्यापार
बद्धोद्यमा ॥ ज्ञात्वेत्थं न पुनः स्पृशंति जननीगर्भेर्भ

श्री
२
१२

कत्वंबुधः ॥४॥ दृष्ट्वासंभ्रमकारिवस्तुसहसाऐऐइति
व्याहृतं ॥ येनाकूतवशादपीहवरदेबिंदुंविनाप्यक्षरं
तस्यापिध्रुवमेवदेवितरसाजातेतवानुग्रहे ॥ वाचः
सूक्तिसुधारसद्रवमुचोनिर्यांतिवक्त्रांबुजात् ॥५॥ य
न्नित्येतवकामराजमपरंमंत्राक्षरंनिष्कलं ॥ तत्सार
स्वतमित्यवैतिविरलःकश्चिद्बुधश्चेद्भुवि ॥ आख्यानं
प्रतिपर्वसत्यतपसोयत्कीर्तयंतोद्विजाः ॥ प्रारंभेप्रण

श्री
र
१२

वास्यदमष्टयित्वांनीत्वोद्धरंनिस्फुटं ॥ ७ ॥ यत्संप्रोव
पसांप्रहन्निकरणेहृष्टप्रभावंवुधे ॥ स्वामीयंतदहंन
मामिमनसायद्वीजमिंदुप्रभं ॥ ब्रह्मोवोपिसरस्वती
मनुगतोज्ञाग्रांतुविछिन्नये ॥ गौरयाह्वोगिरिवर्नेतेसनि
यतंयोगंविनासिद्धिदः ॥ ८ ॥ एकैकंतवदेवविबीजम
नघंसव्यंजनाव्यंजनं ॥ ह्रस्वंपरदीर्घपृथक्क्रमगतं
यद्वास्थितंसुन्कमात ॥ यंयंकाममपेक्षयेनविधिना

केनापिवाचिंतितं॥ जन्मंवासफलीकरोति[illegible]मानंतस
मस्तंतत्फलं॥२॥ वामेपुस्तकधारिणीमभयदांसाक्षात्स
नंदायिनी॥ भक्तेभ्योवरदानपेशलकरांकर्पूरकुंदोज्व
लां॥ उज्जृंभांबुजपत्रकांतनयनस्निग्धप्रभालोकिनी॥
येत्वामंबनशीलयंतिमनसासाकविन्वंकृतः॥७॥ ये
त्वांपांडुरपुंडरीकपटलस्पष्टाभिराममभांसिंचंतीम
मृतद्रवैरिवशिरोध्यायंतिमूर्ध्निस्थिनां॥ आश्रांतंवि

नं तं

स्निं

करस्मृत्तरसरपदानि यांतिवक्रांतुजानेषांभारानि भारतीसु
रसरिन्कल्लोललोलोर्मिभिः ॥ ५ ॥ येसिंदूरपरागपुंज
पिहितंत्वनेनसायामि मां ॥ उवीचापिविलीनयावक
रसप्रस्तारमग्नामिव ॥ पश्यंतित्त्वलमप्यनन्यमनसस्ते
मामनंगज्वरक्रांता [illegible] ञंगपश्यवकदृश्गेवपश्याः भ
वंतिस्त्रियः ॥ ६ ॥ वंचत्कांचनकुंडलांगदधरामाबद्ध
कांचीस्रजं ॥ येत्वांचेतसितन्वतेस्तणमपिध्यायंतिकृ

न्मास्थिरं॥ तेषांवेश्मनिविभ्रमादहरहस्फारीभवंत्यश्विरं॥
माद्यत्कुंजरकर्णतालतरलाःस्थैर्यंभजंतेश्रियः॥१०॥ श्यार
